No. १५२०

Title गदाधरी अनुमान मणि दीधिति टिप्पनी

Author गदाधर:

Extent ११० Age ०८

Subject न्याय वैशेषिकम्

१९० पत्रे

गादाधरी अनुमानमणिदीधितिटिप्पनी

१५२०

सव्यभिचारसामान्यलक्षणमुक्त्वा मणिकृतस्तद्विभजनमाक्षिपति यद्यपीति लक्षणतः लक्षणवाक्यतः
सामान्यं साधारणानुपसंहारित्रितयसाधारणधर्मश्च प्रतीतवतः अन्यतमत्वमिति विशेषः विशेषजिज्ञासा
नुदयात् अवांतरधर्मप्रकारकज्ञानेच्छोत्पत्त्यसंभवात् सामान्यज्ञानस्य विशेषजिज्ञासायां स्वातंत्र्येण हेतुसा
धनतात्तानधर्मितावच्छेदकज्ञानसंपादकतया वा हेतुत्वादिति भावः सामान्यलक्षणानंतरं सव्यभि
चारसामान्यलक्षणानंतरं विभागः सव्यभिचारविभागः सव्यभिचारत्वावांतरधर्मप्रकारेण धर्मिप्र
तिपादनमिति यावत् नायं ग्रंथो विभागपरः अपितु साधारणानुपसंहारिणोर्लक्ष्यतासंभवनिबंधनवि
स्मरणासामान्यलक्षणातिव्याप्तिभ्रमनिराकरणाय तयोर्लक्षणप्रदर्शनपर इति समाधत्ते तथापीति सा
धारणमात्रे प्रसिद्धतया भूरिप्रयोगविषयसाधारणमात्रकतया तन्मात्रस्य साधारणमात्रस्यातिव्याप्तिः प्रतीयेत
इति वध्यते तद्व्यावृत्तस्यासाधारणादिव्यावृत्तस्य साधनतानिर्दोषतालक्ष्यत्वमिति तथा च सव्यभिचार इति
मूलस्य वक्ष्यमाणसव्यभिचारसामान्यलक्षणलक्ष्य इत्यर्थः एतद्ग्रंथस्य विभागपरत्वमुपपादयतो मतमाह
कश्चिदिति सामान्यज्ञानाधीनः सामान्यज्ञानसामान्याधीनः तल्लक्षणप्रत्ययलक्षणवाक्याधीनसामान्यज्ञान
मात्रं अत्र च विभागो यद्युक्तस्य सामान्यज्ञानस्योपायांतरतोऽभ्युपगमे स्यात्तदपि सामान्यलक्षणानः तल्लक्ष
णप्रत्ययलक्षणवाक्याधीनसामान्यज्ञानमात्रं अत्र च विभागो यदुक्तस्य सामान्यज्ञानस्योपायांतरतोऽ
भ्युपगमे स्यात्तदपि सामान्यलक्षणाभिधानमसंगतमनाकांक्षितत्वादित्यस्वरसस्तद्वानायकश्चिदित्यु
क्तं अथवा सामान्यज्ञानाधीनः त्रितयसाधारणयत्किंचिद्धर्मज्ञानाधीनः तल्लक्षणप्रत्ययं सव्यभिचार
पदार्थतावच्छेदकं वक्ष्यमाणलक्षणज्ञानं अवेदने अत इति नाद्यपालक्षणज्ञानेपि सव्यभिचारपदार्थयपवकी

गदा० इष्टरूपत्वेन जिज्ञासोद्देशेन नतु सव्यभिचारपदार्थः कतीति प्रथमं विभागोऽनुचित इत्यस्वरसाद्बीजं प्रत्यं जकप
दस्यानुमापकाद्यारेकयोरेकतरमात्रपरत्वेऽसाधकत्वादित्यादिदोषद्वयासंगतेस्तत्संगमनाय प्रसक्ति
पदार्थं वितर्कयति प्रसक्तिरिति प्रसर्वकसंजधात्वर्थ इत्यर्थः तत्कोटिव्याप्यस्यापि व्याप्तिभ्रमेण तद्विसंद
कोटेरापादकत्वमनुमापकत्वं च संभवतीति एकस्योभयं प्रत्यसाधकत्वादित्यादिदोषासंगतिरित्यत आपाद्यमूद्रय
ति तदुपधानमिति प्रसक्त्युपधायकत्वमित्यर्थः अव्यापकमिति येन हेतुना कदाचिदपि साध्यस्य तद-
भावस्य वा व्याप्यत्वमिति व्याप्तिर्वा न ज्ञानेन तावप्रत्येकमपि तदसंग्राहकमित्यर्थः तथापि विधेति साध्याभाववन्निरूपि
तेत्यर्थः तद्योग्यताप्रसक्तियोग्यता वा व्याप्यसंतेकपदेन विवक्षणीया योग्यता व्याप्तत्वरूपयोग्यज्ञानविषयता
रूपत्वे व्याप्तिभ्रमविषयतायाद्रूपपुनरुक्तदोषप्रसंगादित्यतो योग्यतां व्याचष्टे साचेति तत्तत्कोटिप्रसक्तियोग्यता
चेत्यर्थः व्याप्यादिरूपात् तत्कोटिनिरूपितव्याप्यादिरूपा साध्यसंदेह इत्यादि यथाश्रुतमूलग्रंथात् पक्ष-
धर्मताज्ञानस्य साध्यसंदेहजनकत्वं कोटिद्वयोपस्थितिजनकत्वं च लभ्यते तत्र च नित्यत्वादिसाध्यकज्ञाना
दिहेतौ वक्ष्यमाणानिव्याप्तिर्वोद्धर्तुमशक्यैव नित्यत्वतदभावविषयकज्ञानवानयमिति ज्ञानस्य नि
त्यत्वतदभावोपस्थापकत्वात् धर्मितावच्छेदकप्रकारकज्ञानमुद्रया तादृशज्ञानवत्त्वावच्छिन्नधर्मिकनिर-
त्यत्वसंशयहेतुत्वाच्च न च फलीभूतसंशयधर्मितावच्छेदकतया तादृशधर्मे पर्याप्तताव्याप्यधर्मावच्छिन्नवि-
शेष्यकयत्प्रकारकज्ञानत्वेन संशयं प्रति हेतुतेति विवक्षणीनायं दोषः तादृशज्ञानस्य धर्मितावच्छेदकप्र-
कारकज्ञानमुद्रया नित्यत्वतदभावविषयकज्ञानवादिदेत्वपर्याप्तधर्मितावच्छेदकतकसंशयं प्रत्येव हेतु
त्वात् तादृशधर्मधर्मितावच्छेदकोक्तत्वोक्तज्ञानवत्त्वानवगाहित्वात् शुद्धमिदंत्वधर्मितावच्छेदकोक्त

त्यो ज्ञाज्ञानवत्त्वानवगाहित्वात् स्फुरदिमिदं त्वं धर्मितावच्छेदकीकृत्यैव तत्त्वस्यागाहित्वादिति वाच्यं एवम् सं-
तिवक्ष्यमाणधर्मितावच्छेदकातिव्याप्तेरप्रसक्तत्वात् कोटिद्वयोपस्थापकत्वनिवेशवैयर्थ्यप्रसंगादित्यतो ऽ-
लमन्यथाव्याचष्टे   साध्येतीति कोटिद्वयोपस्थापकं यदिति एतेन कोटिद्वयोपस्थापकत्वे साध्यसंदेह-
जननोद्देश्यतावच्छेदकता लभ्यते एवं च धनवान् स्यान्नवेत्यादौ धनादेः स्वप्रयोजनकताबोधस्यात्र भा-
विकतया उद्देश्यविप्रयभावस्थले ऽप्रसक्तिबाधके उद्देश्यतावच्छेदकविषययोः प्रयोज्यप्रयोजकभावबोधस्य
व्युत्पत्तिसिद्धत्वात् कोटिद्वयोपस्थितिजनकतायाः साध्यसंदेहजनननिर्वाहकतालाभेन व्यापारजनक-
तायाः स्वफलजनननिर्वाहकत्वात् कोटिद्वयोपस्थितेर्द्वारतालाभ इति कोटिद्वयोपस्थितिद्वारा साध्यसंदे-
हजनकत्वं लभ्यते तर्हि तज्ज्ञानस्य च धर्मितावच्छेदकप्रकारकज्ञानमुद्रया साक्षादेव साध्यसंदेहजन-
कतया नातिप्रसंगः कोटिद्वयोपस्थितिद्वारा साध्यसंदेहजनकत्वे च साध्यसंदेहजनककोटिद्वयोप-
स्थितिजनकत्वे सति साध्यसंदेहजनकत्वं तत्र विशेष्यांशनिवेशो निष्फलः सत्यंतदलमात्रनिवेशेनैव सा-
मंजस्यात् नत्वेवं परित्यज्य निष्कृष्टार्थमाह   साध्यसंदेहजनकेति   जनकांतनिवेशप्रयोजनमाह १
श्रावणत्वेत्यादिना श्रावणत्वव्याप्यविषयतया वा नित्यत्वानित्यत्वोपस्थापकस्य नित्यत्वानित्यत्वोपस्थि-
तिजनकीभूतश्रावणत्वादिरूपसंबंधज्ञानविषयस्य ज्ञानस्य नित्यत्वे साध्ये वारणाय नित्यत्वसाध्यकस्थले
तथाभिव्याप्त्यभावः संभावनार्थत्वादर्थः एकज्ञानस्यानित्यत्वतदभावोभयश्रावणताविरहाद् श्रावणता सं-
बंधमादाय यथाश्रुतेनातिव्याप्तिसंभवात् श्रावणत्वं हि ज्ञानत्वव्याप्यत्वसंबंधेन स्मरणीयः अत एव तद्वयात्तया
लघुसंबंधमादाय व्याप्तेति महाविषयितयावेति   एकज्ञानस्य तदुभयविषयकत्वे निष्प्रत्यूहमेवेति ध्येयं

गदा॰ समवायेन हेतावतिव्याप्तिमुक्त्वा संयोगेन हेतुत्वावच्छिन्नमाह अनुद्भूतत्वेति अनुद्भूतत्वं सामानाधिकरण्यं
व्याहतत्वं विरोधः ताभ्यां वह्निज्ञानतदभावोपस्थापकस्य वह्निज्ञानतदभावोपस्थितिजनकीभूतत्वहेतुशसंबंध
सव्य॰ रूपज्ञानविषयस्य धूमस्य वह्निसाध्ये वह्निसाध्यकस्थलेवारणाय व्यभिचारत्वाभावसंपादनायेत्य
र्थः जनकांतरस्य वारकत्वे हेतुमाह तच्छ्योपस्थितेरिति तादृशसंबंधज्ञानजन्योपस्थितिरित्यर्थः सं
२ देहाजनकत्वादिति संदेहं प्रति साधारणधर्मो साधारणधर्मवद्धर्मिविप्रतिपत्तिज्ञानजन्याया एव कोट्यु
पस्थितिहेतुत्वादितिभावः जनकता च साध्यसंशयत्वावच्छिन्नजन्यतानिरूपितत्वाख्यातः संबंधा
नवज्ञानजनकोद्बुपस्थितेर्विशेषणज्ञानादिसंशयसाध्यसंशयहेतुत्वेपि न क्षतिः यद्यसाधारणधर्मज्ञा
नादिजन्यसंशये व्यभिचारवारणाय साधारणधर्मादिज्ञानजन्योपस्थितिजन्यतावच्छेदककोटौ तादृशो
पस्थित्यव्यवहितोत्तरत्वनिवेशस्यावश्यकतया साध्यसंशयत्वे तत्र प्रयोजनविरहेण न तन्निवेशनीयं वि
शेषणज्ञानादिजन्यता च न न्यूनवृत्तिरिति नातिप्रसंगः नचैवमपि घटनित्यत्वानित्यत्वाभावसंदेहवति
न प्रमेयत्ववान् घटनित्यत्वतदभावविषयकज्ञानवांश्चायमित्याकारकज्ञानाभ्यां नित्यत्वतदभावविष
यण्णीचकैकोपस्थितिर्जनिता तत्र तादृशोपस्थितिजनकपक्षधर्मताज्ञानविषयत्वमादाय ज्ञानेतिव्याप्तिः
उक्तरीत्या तादृशोपस्थितिव्यक्तसाधारणधर्मवत्ताज्ञानजन्यतया साध्यसंशयत्वावच्छिन्नं प्रतिजनकत्वादिति
वाच्यं साध्यसंशयत्वावच्छिन्ननिरूपितजनकतानियतजन्यतानिरूपकीभूतजनकतया एव पक्षधर्मताज्ञा
नविशेषणत्वोपगमान्नित्यत्वानित्यत्वविषयकज्ञानवत्ताज्ञानजन्यतायाः संशयाजनकसाधारणधर्मव ७
त्ताज्ञानाजन्यतदुभयोपस्थितिसाधारणतया संशयत्वावच्छिन्ननिरूपितजनकताव्यभिचारित्वेनातिप्रसं

गविरहात् साधारण्यादिविशिष्टधर्मवत्ताज्ञानजन्यतदुभयोपस्थितीनां च सर्वासां तादृशोपस्थिति
त्वेन संशयत्वावच्छिन्नं प्रति हेतुत्वं तथा तादृशज्ञाननिरूपितकोटिद्वयोपस्थितिनिष्ठजन्यतायाः संशयत्वावच्छि
न्ननिरूपितजनकतानियतत्वमस्त्वेव अन्यथाऽतिप्रसंगवारणाय तादृशजनकतावच्छेदकावच्छि
न्नत्वमेव जन्यतायां निवेशनीयं अव्यवहितोत्तरत्वसंबंधेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानवत्तावे
५ च्छेदकं नैवं तादृशज्ञानविशिष्टत्वकोटिद्वयोपस्थितित्वरूपतादृशज्ञानजन्यतावच्छेदकधर्मस्यैव च संशयज
नकतावच्छेदकः न तु तादृशज्ञानजन्यतत्तत्कोटिद्वयोपस्थितित्वजन्यतापेक्षया तत्तद्घटकस्याव्यवहितोत्तरत्व
स्य लघुत्वात् तस्मादन्वयेण साधारण्यादिधर्मवत्ताज्ञानजन्यत्वस्य तादृशज्ञानजन्यतावच्छेदकत्वेपि न क्ष
तिः जनकतावच्छेदकावच्छिन्नत्वं च जनकतावच्छेदकपर्याप्त्यवच्छेदकताकत्वं तेन साध्यसंदेहजनकता
वच्छेदकघटकज्ञानत्वादेर्नित्यत्वतदभावविषयकज्ञानवत्ताज्ञानादिजन्यतावच्छेदकत्वेपि न क्षतिः जनक
तावच्छेदकतायाः पर्याप्तिर्न निवेश्यते प्रयोजनविरहात् तेन साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्य जन्य
तावच्छेदककोटौ नैव विशिष्टमात्रनिवेशेनैवोपपत्तौ प्रयोजनविरहेण संशयजनकतावच्छेदकघटकस्य सा
ध्योपस्थितित्वादेर्निवेशोपि न क्षतिः नचैवं साध्यसंशयनिवेशनैव्यर्थ्यं यत्किंचिज्जनकतावच्छेदकावच्छिन्न
जन्यत्वनिवेशेनैवोपपत्तेः नित्यत्वतदभावविषयकज्ञानवत्ताज्ञानीयजन्यतावच्छेदकस्याव्यवहितोत्तरत्व
संबंधेन तादृशज्ञानविशिष्टनित्यत्वादिविषयकोपस्थितित्वस्य किंचिदपि कार्यं प्रति जनकतावच्छेदकत्वा
भावेनातिप्रसंगविरहादिति वाच्यं तथासति वन्यादौ रासभतदभावसाहचर्यादिप्रकारकज्ञानसाध्य
साधावतिप्रसंगापातात् प्रकृतसाध्यसंदेहजनकतायामवश्यं निवेशनीयत्वात् नच कोटिद्वयपदस्य

गद

मृतसाध्यतावच्छेदकावच्छिन्नतदभावप्रकारकतया प्रकृतसाध्यतावच्छेदकावच्छिन्नादिविषयकोपस्थितित्व
चरितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिवेशेनैवं यद्धूनि व्याप्तिरिति वाच्यं एवं सत्येतल्लाभायै
वसंग्रहाय पदोपादानात् ननु साध्यसंदेहजनकपक्षधर्मताज्ञानविशेषेणैव साधारणस्य कोटिद्वयोपस्थाप
कत्वाद्यनिवेशेऽनति प्रयोजनकत्वात् शंकामपनेतुं तत्प्रयोजनमाह धर्मितावच्छेदकेति नद्वारणायव
ह्न्यादिव्याप्यतद्विसंदेहविशेषणे हेतुत्वात्तादृशवह्न्यादिव्यभिचारित्ववारणाय कोटिद्वयेति न च साध्यसंदेहजन
कोपस्थितिजनकतात्वमेव निवेश्यतां किमुपस्थितौ कोटिद्वयविषयकत्वनिवेशनेनेति वाच्यं तथा सति
व्याप्यविरुद्धयोरिति व्याप्तिस्तथाहि संशयं प्रति तत्तत्कोटिसहचरितताज्ञानजन्यतदुपस्थितित्वेन तदभावकोटि
सहचरितताज्ञानजन्यतदुपस्थितित्वेन तदभावकोटिसहचरितधर्मवत्ताज्ञानजन्यतदभावोपस्थितिं प्र
त्यपि तथैव तत्तत्कोटिसहचरितधर्मवत्ताज्ञानत्वेन हेतुतादृश्यं च वह्न्यभावसहचरितधूमवानिति ज्ञान
जपवह्न्यभावोपस्थितिसहकारेण वह्निसंशयजनकवह्न्युपस्थितिजनकीभूतवह्निसहचरितधूम
वानिति ज्ञानमादाय धूमे वह्निसहचरितजलत्ववानिति ज्ञानजन्यवह्न्युपस्थितिसहकारेण वह्निसंश
यजनकवह्न्यभावोपस्थितिजनकीभूतवह्न्यभावसहचरितजलत्ववानिति ज्ञानमादाय च जलत्वेऽप्र
तिव्याप्तिः कोटिद्वयोपस्थितिनिवेशे च तथाविधज्ञानयोः प्रत्येकं कोटिद्वयोपस्थापकत्वाभावान्नातिप्रसंगः
न च वह्निसहचरितधूमवान् वह्न्यभावसहचरितधूमश्चेत्येतादृशसमूहालंबनज्ञानस्य कोटिद्वयोपस्थापक
त्वेनैतद्दोषतादवस्थ्यमिति वाच्यं साध्योपस्थितिजनकतावच्छेदकीभूततया साध्याभावोपस्थितिजनकता
वच्छेदकीभूतप्रकारतातदाश्रयत्वनिवेशात्तादृशसमूहालंबनज्ञाननिरूपितयोर्वह्नितदभावसहचर्या

वच्छिन्नप्रकारतयोः प्रत्येकं तादृशजनकतावच्छेदकत्वविरहेणातिप्रसंगविरहाद्धूमसहचरितवह्नि
मान्धूमाभावसहचरितवह्निमांश्च पर्वत इत्यादिसमूहालंबनज्ञाने प्रकारतावच्छेदकभेदेन वह्न्यादिप्रका
रताभेदात् प्रत्येकं कस्याश्चिदपि प्रकारतायास्तादृशजनकतावच्छेदकत्वासंभवेपि धूमधूमाभावसहच
रितवह्निमान्पर्वत इत्यादिज्ञानीयोभयधर्मावच्छिन्नविलक्षणैकप्रकारतायास्तथात्वेनैव व्याप्तेर्लक्षणा
समन्वयः वह्नितदभावसहचरितधूमवान्पर्वत इत्याद्याकारकोभयसहचर्यावच्छिन्नप्रकारताशालिज्ञान
मादायातिप्रसंगस्तत्तादृशप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वविवक्षया स्वयमेव निराकरिष्यति
अथ वह्निसहचर्यमात्रेण वह्न्यभावसहचर्यमात्रेण चावच्छिन्ना व्याप्यस्यादिकस्य वा प्रकारता तस्याश्च
उद्बोधकानवस्थानात् साध्यतदभावोभयविषयकसमूहालंबनरूपसाध्योपस्थितिजनकतानीयतया प्रत्येकं सा
ध्योपस्थितिजनकतायां साध्याभावोपस्थितिजनकतायां चावच्छेदकत्वेनातिप्रसंगः यदि च साध्यविशेषण
कोपस्थितिवृत्तिसाध्यसंदेहजनकतानियतं यज्जन्यत्वं तन्निरूपितायां तद्दृशोपस्थित्यवृत्तिसाध्यसंदेहजनक
तानियतं च यज्जन्यत्वं तन्निरूपितायां च जनकतायामवच्छेदिकाया प्रकारतातस्याः साध्याभावविषयक
त्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नकतानिरूपितायां तादृशधर्मानवच्छिन्नसाध्यविषयकत्व
घटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजनितानिरूपितायां च जनकतायाः प्रकारत्वात् तस्या वानि
वेशान्नोक्तदोषः साध्याभावोपस्थितित्वावच्छिन्नायाश्चापि जनकतायाः साध्यविषयकत्वघटितधर्मा
वच्छिन्नतया विरहादतिव्याप्तेरुक्तेन या साध्यविषयकत्वघटितधर्मावच्छिन्नजनकतायां साध्याभावविष
यकत्वानवच्छिन्नत्वप्रवेशात् साध्यस्त्वे विशेष्यताघटितधर्मावच्छिन्नत्वं निवेशो वचनाद्दृष्णातिव्याप्तिर्वार

गदा० णीयेत्युच्यते तथापि वह्निमद्वृत्तिवह्न्यभाववद्यावृत्तधूमवानयं वह्निमद्व्यावृत्तवह्न्यभाववद्वृत्तिजलत्ववा
नयमिति ज्ञानीयधूमादिप्रकारतामादायातिप्रसंगो दुर्वार एव वह्निमद्वृत्तिधूमवत्ताज्ञानजन्यवह्न्युप॰
सव्य० स्थितेर्वह्न्यभाववद्वृत्तिज्ञानजन्यवह्न्यभावोपस्थितिसहकारेण संशयजनकत्वाद्वह्न्यभाववद्व्यावृत्तधर्म
वत्ताज्ञानजन्यवह्न्यभावोपस्थितेरपि वह्निमद्व्यावृत्तधर्मवत्ताज्ञानजन्यवह्न्युपस्थितिसहकारेण संशयज
नकत्वात् तादृशज्ञानीयधूमप्रकारतायाः वह्निसाध्यकावच्छिन्नत्वेन संशयजनकवह्न्युपस्थितिज॰
नकतायो वह्न्यभाववद्व्यावृत्तित्वावच्छिन्नत्वेन च तथाविधवह्न्यभावोपस्थितिजनकतायां तादृशा॰
ज्ञानीयजलत्वप्रकारतायाश्च वह्निमद्व्यावृत्तत्वावच्छिन्नत्वेन तथाविधवह्न्युपस्थितिजनकतायां वह्न्य॰
४ भाववद्वृत्तित्वावच्छिन्नत्वेन च तथाविधवह्न्यभावोपस्थितिजनकतायामवच्छेदकत्वात् मैवं संशयविषय
कात्वघटितधर्मावच्छिन्नजनकतावच्छेदको यो धर्मस्तदवच्छिन्नजन्यतानिरूपितायां तदवच्छिन्नसहका
रितावच्छेदकसाध्याभावविषयकात्वघटितधर्मावच्छिन्नजनकतावच्छेदकावच्छिन्नजन्यतानिरूपिता॰
यां च जनकतायामवच्छेदकीभूतप्रकारतानिवेशेन नातिप्रसंगः तदवच्छिन्नसहकारितावच्छेदकीभू
तत्वं कात्वं च तदवच्छिन्नासमवधानप्रयुक्तफलोपधायकत्वाभाववत्त्वावच्छिन्नकात्वमित्यलेप्रहवि
तेन तत्संशयधर्मितावच्छेदके हेत्वादिकं असाधारण्यतयेति संशयविषयमानवृत्तित्वेन सपक्षविपक्ष
व्यावृत्तत्वादिभावाः संशयाद्यमेव संशयपदप्राप्यां सव्यभिचारसामान्यलक्षणलक्ष्यमेव तथा च संशयपदप्राप्यां
लक्ष्यतयैव नातिव्याप्तिसंभवः तदवच्छिन्नसाध्यादिनिश्चयपदप्राप्यां च तत्प्रकारकत्वानस्य संशयाजनक २
तया संशयजनकताघटितलक्षणस्येव तत्साधारण्येन संभवतीति हृदयं तादृशनिश्चयपदप्राप्यामेवातिव्या

ति संगमयति तथात्वेपि तद्व्यक्तित्वविशेष्यकसंशयदशायां तस्य लक्ष्यत्वप्रतीत्यर्थः तदुत्तीर्णता
दशायामसाधारण्योत्तीर्णतादशायां तादृशधर्मवति साध्यस्य तदभावस्य वा निश्चयदशायामिति
यावत् विशेषदर्शनात् विपरीतनिश्चयात् तज्जननयोग्यताया इति तत्प्रकारकज्ञानस्या
प्तिः अतिहृतेरिति अतिव्याप्तेरिति शेषः वक्ष्यमाणदोषेण फलोपधायकत्वानिवेशासंभवादिति भा
वः इत्युपलक्षणं फलोपधायकतानिवेशेपि संशयजनकज्ञानशून्यतादशायां साधारण्याव्याप्त्यु
भयेन तादृशज्ञानस्योपलक्षणविधयैव लक्षणे निवेशनीयतया संशयोपधायककालीनतादृशज्ञा
नविषयतामादायातिव्याप्तिः संभवतीति बोध्यं अन्यथा फलोपधायकज्ञानस्याविशेषणविधया ल
क्षणघटकत्वे पक्षतादाविति पदे साध्यादिनिश्चयसत्वेपि धर्मितावद्विशेष्यकसाध्यसंदेहजनकता
मादायापि लक्षणसमन्वयसंभवादादिपदे हेतुमत्ताज्ञानविशेष्यीभूतपक्षेतरयावद्धर्मिपदं नि
श्चयदशायामित्युपलक्षणं साधारण्यादिविशिष्टप्रकारकधर्मिज्ञानशून्यतादशायामप्यव्या
प्तिर्बोध्या साधारण्याव्याप्तीति साधारण्यस्यानित्यदोषतया तदा तस्यालक्ष्यतोपगमासंभवादिभावः को
टिद्वयोपस्थापकत्वाशास्य प्रयोजनान्तरं वर्णयतो मतमाह सत्यामिति पक्षेति स्वमते व्याप्यवत्तानिश्च
यस्य संशयप्रतिबंधकत्वमेव न तु कारणत्वं विरोधिपरामर्शयोरप्रामाण्यग्रहे तु साधारण्यादिधर्मज्ञाना
देव संशय इत्यतो जनकत्वपक्ष इति हेतुवारणाय व्याप्यस्य सस्यवान्तराणायनस्यापि परामर्शान्तरकसं
शयजनकपक्षधर्मताज्ञानविषयत्वादिति भावः न तु साधारण्यादिविशिष्टधर्मवत्ताज्ञानस्यैव परामर्श
योरपि साध्यतदभावोपस्थितिद्वारैव संशयजनकत्वान्न कोटिद्वयोपस्थितिनिवेशोपि न तौ कारत्वस्य तत्राह

गदा॰ हेतुनेति तदुभयोपस्थापकत्वं साध्योपस्थितिजनकतावच्छेदका सती तदभावोपस्थितिजनकताव
च्छेदकीभूता या प्रकारता तदाश्रयत्वं निश्चितसाध्याभाववद्वृत्तित्वस्य साधारण्यघटकतामते केवलविद्य
मानेऽपि साध्याभावनिश्चयसत्त्वे च साधारण्यस्यानपायात्त्वसंभवतीत्यभिप्रेत्याह यानिश्चयसत्त्वे सहचरिते
यत्किंचिद्धर्मकसपक्षतालाभाय दृष्टमिति साधारणधर्मवद्धर्मिज्ञानस्यानित्यत्वानित्यत्वसहच
५ रिताणुत्ववद्व्यणुकज्ञानस्य धर्मिणि द्व्यणुकेऽनित्यत्वसाध्यकस्थले तस्य लक्ष्यत्वसूचनाय सदे
तावितिः प्रसंगोऽतिव्याप्ति नच सहचारित्वविषयतामादायातिप्रसंगस्य वारणाय कोटिद्वयोप
स्थितिजनकतावच्छेदकीभूतविषयताश्रयत्वपर्यंतनिवेशनमावश्यकं तथा च कथं धर्मिण्यतिव्याप्तिः
यतः तत्तत्कोटिसहचरितोऽयं तत्कोटिसाहचर्यादिविशिष्टविषयकज्ञानत्वेनैव हेतुता नतु तद्विशिष्टवद्ध
र्मिज्ञानत्वेन संबंधिविशेष्यकज्ञानादपि संबंध्यंतरस्मरणात् अन्यथा यं हस्तिसंबंधी घटपदं घटपदे पा
ठामित्याकारकज्ञानाद्धस्तिघटादिस्मरणानुदयप्रसंगात् तथा च धर्मिविषयतायाः कोटिद्वयोप
स्थापकतावच्छेदकत्वमेव नास्तीति वाच्यं एकसंबंधीतिविशिष्टधर्मिज्ञानत्वेनैवापरसंबंधिस्मारक
तेति मतानुसारेणैव तल्लक्षणप्रणयनात् एतन्मतस्यानिर्यासिकतया पक्षधर्मतापदस्य निष्प्रयो
जनकत्वमाकलय्योक्तं परित्यागेन सिद्धांतलक्षणस्य वक्ष्यमाणत्वात् वस्तुतस्तु साध्यसंदेहजनक
कोटिद्वयोपस्थितिजनकज्ञानविषयत्वमित्यकोटिद्वयोपस्थितिनिष्ठाया साध्यसंदेहजनकताजन्य
तासंबंधेनावच्छिन्नत्वसंबंधेन वावच्छिन्नायां तदवच्छेदकतायामवच्छेदिकाया विषयतायास्तदाश्र
यत्वमर्थः एवं च साधारणादिधर्मविशेष्यकज्ञानस्य कोटिद्वयस्मरणजनकत्वेऽपि संशयेधर्मिभान

नियमायत्ततद्धर्मिकसंशयं प्रतीसाधारणादिविशिष्टधर्मवत्तद्धर्मिज्ञानविशिष्टकोट्युपस्थि-
तित्वेन हेतुत्वेनेति धर्मिविषयतायाश्चपिताहृशसंदेहजनकतावच्छेदकतायामवच्छेदकत्वादिति व्या
मिरतः पक्षधर्मतापदोपादानमवश्यकमिति पक्षधर्मतेति न च पक्षधर्मतापदोपादानेऽपि द
र्शितादृश्यं धर्मिणोऽपि पक्षधर्मताज्ञानविषयत्वादिति वाच्यं तदुपादानबलेन निरुक्तायां जनक-
तातदवच्छेदकतायां चावच्छेदकतायां वावच्छेदकीभूताया धर्मिविषयतानिरूपिताविषयताप्रका
रतापर्यवसिता तदाश्रयत्वस्य लाभेनातिप्रसंगविरहात् प्रकारतायाः प्रकारतात्वेनावच्छेदकत्वावि
वक्षणीयं तेन साधारणधर्मादिर्धर्मितावच्छेदकीभूते सद्वैतेनातिप्रसंगः धर्मितावच्छेदकीयविषयतायाः
प्रकारतात्वव्याप्येन धर्मितावच्छेदकतात्वेनैवानिवेशात् प्रकृतपक्षस्य प्रकृतपक्षतायाश्च निवेश
प्रयोजनाभावात् पक्षपदं धर्मिमात्रपरतया व्याचष्टे पक्षपदमिति धर्मिमात्रेति मात्रपदेन पक्षतानिवे
शव्यवच्छेदः यत्र धर्मिपदमत्र प्रत्येकविशेष्यपरं तेन वह्निवह्न्यभावसहचरितधूमवद्वृत्तिप्रमेयत्व
वान्पर्वत इत्यादिज्ञानीयधूमादिविषयतामादाय नातिप्रसंग इति तच्च साहचर्यधर्मितावच्छेदकीयविषय
ताया जनकतावच्छेदककोटौ प्रयोजनविरहेणानिवेशान्निवेशेऽपि वा धर्मितावच्छेदकतात्वेनैव तत्-
स्यानिवेशनीयतया प्रकारतात्वेनानिवेशात्सहचरधर्मितावच्छेदकविषयतातः यानिधूमादि-
विषयतामादायातिप्रसंगाभावात् पक्षपदस्य पक्षताविशिष्टप्रकृतपक्षपरत्वमात्रपकंशन्य-
थाघटादिज्ञपक्षे शब्दत्वादिनानित्यत्वसाधने बाधस्यासिद्धेर्वाऽवतारदशायामपि सपक्षविपक्षव्यावृ-
त्तशब्दत्ववान्शब्द इत्यादिज्ञानविषयतामादाय शब्दत्वादेः सव्यभिचारत्वापत्तिर्न चेष्टापत्तिर्दोषांतर-

गदा. रप्रसंगात् अस्मन्मते च पक्षताविशिष्टप्रकृतपक्षवृत्तिताज्ञानस्य विशेषणविधया लक्षणघटकत्वान्ना
तिप्रसंगः बाधग्रहस्थले पक्षताया असिद्ध्यवत्वे च हेतौ प्रकृतपक्षधर्मताज्ञानस्याभावादित्याशंकते
नैवमिति पक्षपदस्य धर्मिमात्रपरत्वे बाधसंधेहनायाः नित्यत्वस्य साध्यत्वानुसरणं एवं च घटो ...मत्वे इति
नित्य इत्यत्रापि नत्र प्रसंगप्रसंकया नित्यत्वसाध्यकत्वेन स्फुटीभवतीति नित्यो घट इत्यत्र बाधादौ नित्यत्व
स्याद्विनासिद्धिपरिग्रहः असाधारण्यापत्तिः असाधारणज्ञानमादाय सव्यभिचारत्वापत्तिः पुनेनास
६ सव्यभिचारसामान्यलक्षणतयापत्तदतिप्रसंगो असाधारण्यानापादकत्वादसंगतिरित्यपास्तं सप
6 क्षानुवृत्तित्वेन साधारणस्य केवलान्वयिधर्मस्य पक्षतानवच्छेदकत्वादनुपसंहारित्वस्य चासंभवात् पवि
शेषेण साधारण्यापत्तिरिति वार्थः तदानीं सपक्षविपक्षव्यावृत्तत्वसत्वे दोषांतरावतारेऽपि सव्यभिचार
त्वमसाधारण्यं चेष्टमेव तज्ज्ञानविरहादित्याशयेनाह इष्टत्वादिति अन्यथा पक्षधर्मताज्ञानस्य वावि
शेषणत्वे बाधासिद्ध्योरिति बाधस्यासिद्धेर्वाऽवतारदशायां हृदादौ धूमादिसाधनेव ह्न्यादेरसंग्र
हापत्तेरित्यर्थः साधारणस्यानित्यदोषत्वया तत्रेष्टापत्तिर्न संभवतीति भावः ननु दोषांतरावतारदशा
यां सव्यभिचारत्वं व्यापिनेष्यत एव भवतु साधारण्यानित्यदोषत्वेत्यत आह असिद्धेति साधारण्य
भ्रमसाधीयेति यथा यत्र साध्याभाववद्वृत्तित्वांशे भ्रमात्मकं साधारण्यज्ञानमादायेत्यर्थः धर्मिताप
लीभूतसंशयधर्मितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्ने यद्रूपावच्छिन्नवत्ताज्ञानं यद्रूपावच्छिन्न ७
प्रकारताशालिज्ञानत्वावच्छिन्नं साध्यसंदेहजनकमिति एतच्च संशयप्रतिकोट्युपस्थितिविशे
षणज्ञानादिसहायैव हेतुः साधारणधर्मवद्धर्मिज्ञानं च सामान्यादेव तथेति निष्टाष्टमतेकोट्युपस्थि

निर्विशेषणज्ञानादिमूद्रयैव हेतुः साधारणधर्मद्धर्मितानंच साक्षादेव तत्रैवेति निष्कृष्टमते कोट्युपस्थि
तिजनकतावच्छेदितमेव लक्षणे कर्तव्यमित्यभिप्रायेण यथाश्रुतमूलानुरोधेन संशयजनककोटिद्व-
योपस्थितिजनकत्वमेव निवेशनीयं साध्यसंशयजनकं साध्यसंशयजनककोटिद्वयोपस्थितिजनक
मित्यपि व्याचक्षते तन्मते धर्मिणीति प्रकारतात्वेनावच्छेदकत्वलाभायेति ध्येयं अथैवं साधारणादि
दृष्टकेवलसाध्यवद्वृत्तित्वाद्यवच्छिन्नत्वयाऽतिप्रसंगो दुर्वारः न च धर्मितावच्छेदकावच्छिन्नविशे-
ष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिज्ञानत्वं संशयत्वं तेनाति विपक्षावृत्तित्वस्य साध्यसंशयजनक
तया उभयकोटिसाहचर्यादेस्तादृशधर्मत्वादिति वाच्यं तद्रूपेणैकैकहेतुनाकल्पनेऽपि एककोटिस
हचर्याद्यवच्छिन्नत्वविशिष्टापरकोटिसाहचर्यावच्छिन्नत्वेनैव प्रकारतायां निवेशनीयतया तत्रावच्छिन्नत्व
योर्विशेषणभावे विनिगमनाविरहात् व्याप्यसंशयस्य साधारणधर्मवत्ताज्ञानान्तर्भावानुपपत्तेश्च-
तत्र व्याप्यतदभावयोः प्रत्येकमुभयकोटिसहचरितत्वाभावात् । न च व्याप्यसंशयस्य पृथक्कारणता
मतएवेदं लक्षणमिति वाच्यं व्याप्यसंशयस्य मतादि ग्रन्थविरोधात् न च यद्यद्रूपावच्छिन्नप्रकारकज्ञान
त्वेन संशयजनकता तत्तद्रूपवत्त्वस्य संशयजनकतावच्छेदकप्रकारतावच्छेदकतापर्याप्तिमत्तोये-
ये धर्मास्तत्तद्धर्मवत्त्वस्य व्याविवक्षया नातिप्रसंग इति वाच्यं सत्तावत्समवेतजातिमान् सत्ताभाववत्स
मवेतजातिमान् वायमित्यादिभ्रमविषयतावच्छेदकसत्तावत्समवेतत्वाद्यादाय सत्तादिसाध्यके जात्या-
दावतिव्याप्तेः सत्ताभाववत्त्वस्थले न त्वस्याप्रसिद्ध्या पाय देन तदुपादानासंभवात् वस्तुतस्त्वेवं विवक्ष
तोऽसाधारणादेरपि नाहृशधर्मतया साधारणादेरपि नाहृशया यावत्तद्धर्मवत्त्वाभावात् असंभव एव । न च स्यैनि ष्ठ

२६

नाह

गदा०

त्वोक्तरूपप्रकारतावच्छेदकयावद्धर्मवत्त्वविवक्षया साधारण्यादिवारणं व्याप्यसंशये इत्यादिग्रंथसंगतिश्च सं-
भवति साधारण्यदेः साध्यसाधारण्यादिप्रकारेण ज्ञानस्य संशायकत्वात् । एतेन संशयजनकतावच्छेदकी-
भूतायाया प्रकारतायास्तदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वनिवेशोपि न निरस्तः धर्मिणि यद्रूपाव-
च्छिन्नप्रकारकज्ञानस्य यद्रूपावच्छिन्नप्रकारकज्ञानसहकारेण साध्यसंशयजनकत्वं तदुभयरूपवत्त्व-
स्य विवक्षितत्वेपि व्याप्यसंशयस्य इत्यादिग्रंथासंगतिस्तावत्समाधिरेव व्याप्यत्वावच्छिन्नप्रकारकज्ञा-
सहकारेण धर्मिविशेष्यक त्वनिष्ठरूपान्तरावच्छिन्नप्रकारताकज्ञानस्याप्रसिद्धेर्व्याप्यत्वमादाय व्या-
प्येऽतिप्रसंगाप्रसक्तेः मैवं यत्किंचित्साध्यसंदेहनिरूपितायां जनकतायां यदवच्छेदकापर्याप्तधर्मितावच्छे-
दकावच्छिन्नविशेष्यतानिरूपितप्रकारतात्वतदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वस्य व्यापि चा-
त्वे साधारण्यादिविशिष्टहेतुमत्ताज्ञानजन्यसंशयजनकतावच्छेदकीभूततादृशीप्रकारतासा-
ध्याभाववद्वृत्तित्वाद्यवच्छिन्नापि तदवच्छेदकवत्त्वाभावान्न व्याप्यतावति प्रसंगः यत्किंचित्संशयानि-
वेशात् साधारण्यादेः साधारण्याद्यवमत्त्वेपि न क्षतिः व्याप्यसंशयस्य च व्याप्यवत्ताज्ञानत्वेनैव हेतुता-
नत्वव्याप्याभावप्रकारकत्वमपि तत्र निवेश्यते व्याप्यवत्तानिश्चयदशायां नस्य प्रतिबंधकत्वादेव संशया-
पत्त्यसंभवात् अतो व्याप्याभावत्वावच्छिन्नप्रकारतायाः संशयजनकतानवच्छेदकतया व्याप्याभावव-
त्स्व व्याप्येः सत्वेपि न तत्र वत्ते साधारण्याद्यप्रतिव्याप्त्येरप्रसक्तिः न च व्याप्यसंशयहेतुतायामप्रामाण्यतिश्च
यानास्कंदितत्वस्यैव निवेशाद्व्याववर्त्तानिश्चयादप्रामाण्यशंकास्कंदिताव्यापकसंशयापत्तिस्तस्या-
विरोधित्वादिति व्याप्यसंशयहेतुत्वभावरूपकमिति वाच्यं यादृशविषये व्याप्यवत्तानिश्चयदशायां व्या-

पक्षसंशयस्येतरसकलकारणसमवधाने तादृशनिश्चये प्रामाण्यसंशय एव न जातः तत्रोक्ता॰
निश्चयसंगासंभवेन निश्चयसाधारणव्याप्यवत्ताज्ञानत्वेन हेतुतायाः निष्प्रत्यूहत्वात् तादृशस्थलीया
तिव्याप्त्यभिप्रायकत्वात् यैवं तु धूमस्य व्याप्यत्वात् नचैवं तत्रापि व्याप्यवत्ताज्ञानत्वेन व्यापकसंशये हेतु
तानन्तर्भवति तथा सति धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहिव्याप्यवज्ज्ञाननिश्चयात्तदव
च्छेदेन व्यापकवत्तातत्सामानाधिकरण्यमात्रेण व्यापकाभावमवगाहमानस्य संशयस्यापत्तेस्तादृश
संशये तादृशनिश्चयस्याविरोधित्वादिति वाच्यं धर्मितावच्छेदकावच्छेदेन व्याप्यवत्तावगाहिनः संशयादेव त॰
दवच्छेदेन व्यापकवत्तावगाहिसंशयस्यापत्तेस्तादृशसंशये तादृशनिश्चयस्याविरोधित्वादिति वाच्यं धर्मि
तावच्छेदकावच्छेदेन व्याप्यवत्तावगाहिनः संशयादेव तदवच्छेदेन व्यापकवत्तावगाहिसंशयोत्पत्तेस्ता॰
दृशव्यापकवत्तावगाहिसंशये तादृशव्याप्यवत्तावगाहिज्ञानत्वेनैव हेतुत्वोपगमात् उक्तायत्रप्रसक्तेः
अथवा संशयजनकतावच्छेदकप्रकारतायाः सव्यभिचारितात्वटकसंबन्धावच्छिन्नत्वनिवेशस्यावश्यकता॰
तया वह्निव्याप्यधूमवान्वेति संशये अभावप्रकारतायाः संयोगादिसंबन्धेन वह्नित्वेन तया तत्संबन्धावच्छि
न्नव्याप्यप्रकारतैव संशयजनकतावच्छेदिकेत्यतिव्याप्तिप्रसंगः प्राव्याप्यसंशये त्वादेरसंगतिः अथ साधा
रणधर्मवत्ताज्ञानस्य संशयजनकत्वे धर्मैव प्रयोजकता मते तत्संबन्धकस्यापि प्रयोजकतया तन्मते सं॰
शयजनकतावच्छेदकया प्रत्यक्षकारतास्य प्रत्येकमवच्छेदकीभूतानि यानि रूपाणि तद्वत्त्वनिवेशे अप्रमात्मा
ज्ञानादित्यादौ विषयतया आत्मत्वाभावसमानाधिकरणज्ञानवत्ताज्ञानसहकारेण साध्यसंदेहजनकं य
त्समवायेन साध्यसहचरितज्ञानादिमत्ताज्ञानं तदीयप्रकारतामादाय समवायेन ज्ञानादेर्व्यभिचारित्वात्ता॰

गदा॰ पत्तिरिति चेन्नत्त्वं पतिचेत्सत्त्वं यत्किंचित्साध्यसंशयनिरूपितजनकतावच्छेदकीभूताधर्मितावच्छेदकाव
च्छिन्नायाया विशेष्यतायाँ तन्निरूपितसव्यभिचारिताघटकसंबंधावच्छिन्नप्रकारतावच्छेदकधर्मवत्त्वमेव
विवक्षणीयं तथा सति उक्तस्थले विषयतासंबंधावच्छिन्नज्ञानप्रकारतानिरूपितविशेष्यतायाश्चपिनि-
८ रुक्तायाः वह्निविशेष्यतांतर्गततात्तन्निरूपितसव्यभिचारताघटकसंबंधावच्छिन्नप्रकारत्वाप्रसिद्ध्याऽव्याप्ति
४ व्याप्तिः एवं च संशये समुच्चयवैलक्षण्याय उभयप्रकारतानिरूपितएकविशेष्यतास्वीकृतत्वेऽमते व्याप्यसं
शयीयकोटिद्वयप्रकारतानिरूपितविशेष्यतानिरूपितव्याप्यताघटसंबंधावच्छिन्नप्रकारतावच्छेदका-
व्याप्तिः व्याप्यत्वमात्रमादाय अतिप्रसंभवतीत्याशंक्य व्याप्यसंशयेत्यादिकमभिहितं। वस्तुतस्तज्जनकतावच्छेद-
कयावत्प्रकारतावच्छेदकवत्त्वादिनिवेशो धूमतदभावसहचरितकांचनमयवह्निमानित्यादिज्ञानीयप्र-
कारतायाश्चपि धूमसहचरितवह्निमानित्यादिज्ञानजन्यसंशयजनकतावच्छेदकधूमसहचरितवह्नि-
त्वावच्छिन्नप्रकारत्वादिना निवेशेन निरुक्तयावत्प्रकारताघटनेन तयातदवच्छेदकतायाः पर्याप्त्यधिकर-
णकांचनमयत्वादिघटितधर्मवत्त्वाप्रायाः वह्न्याद्यौरुक्तनुपपादनयासंभव इति यत्किंचित्संशयनिरूपित
धर्मितावच्छेदकावच्छिन्नविशेष्यताघटितधर्मावच्छिन्नायायाजनकतातदवच्छेदकीभूताना दृशविशेष्य-
तानिरूपितप्रकारतावच्छेदकतापर्याप्तिमद्वत्त्वमेव लक्षणीयं एवं च कांचनमयत्वाद्यवगाहितदनवगा- ३
हिज्ञानसाधारणकारणतायापेक्षया तदवच्छेदकीभूतकांचनमयत्वाद्यनवगाहिज्ञानीयप्रकारतावच्छे- ८
दकतापर्याप्त्यधिकरणधर्मवत्त्वमादायैव धूमादिसाध्यकवह्न्यादौ लक्षणसमन्वयः संशयं प्रति तत्तत्को
टिसाहचर्यावच्छिन्नप्रकारताशालिज्ञानत्वेन साधारणादिविशिष्टधर्मवत्ताज्ञानस्य कारणता।

द्वयीति व्याप्यविरुद्धयोरपि व्याप्तिरिति वाच्यः। एवं च व्याप्यसंशयनिश्चया उभयकोटिप्रकारत्वावच्छिन्ना
यजनकतायारोपकयत्नवदवच्छेदकीभूतव्याप्यप्रकारतावच्छेदव्याप्यत्वमादाय व्याप्येऽतिप्रसंगोऽद्वो
रप्येवेत्याशंक्य व्याप्यसंशयस्य पृथक्कारणतामते ज्ञानपदस्य निश्चयपरत्वमुपदर्शितेन च व्या
प्यसंशयस्योभयप्रकारत्वेनानेकहेतुताविशेषणाभावे विनिगमनाविरहादपि प्रत्येकप्रकारतानिवेशे हेतु
ताद्वयमेव कल्पनीयमिति नातिव्याप्तिप्रसक्तिरिति वाच्यं। हेतुताद्वयकल्पने च व्याप्यवज्ज्ञाननिश्चयस्य लाघ
वोः प्रामाण्यसंशयात्मकस्यानन्तरत्वेन व्याप्याभाववज्ज्ञाननिश्चयः तदुभयत्वेन व्यापकसंशयापत्तेः। एतेन
यावत्प्रकारतात्वेन निवेशेः यमात्मज्ञानादित्यादौ उक्तरीत्यातिव्याप्त्यापि तद्धारणाय यावद्विशेष्यताघटित
कल्पेनादरणीयः अपि तु निरुक्तजनकतावच्छेदकीभूतायावत्यः प्रकारताः सव्यभिचारताघटकसंबंधावच्छि
न्नानां तासां प्रत्येकावच्छेदकरूपवत्त्वेन निवेशे एवं चापमात्मज्ञानादित्यादौ नोक्तक्रमेणातिव्याप्तिसंभवः
विषयतासंबंधावच्छिन्नज्ञानादिप्रकारतानामपि निरुक्तयात्मप्रकारतान्तर्गततया सव्यभिचारताघट
कसंबंधावच्छिन्नत्वस्य तत्रासत्त्वेन तेन रूपेण तदुपादानासंभवात् तथा च तावता व्याप्यसंशयस्य हेतुता
मादायातिप्रसंगः वारणासंभवेन विशेष्यतानां यावत्त्वेन निवेशनं ज्ञानं ज्ञानस्य निश्चयपरत्वं च न युक्तमिति
पूर्वपक्षानवकाशः अथ वा व्याप्यसंशयस्य साधारण्यधर्मवत्ताज्ञानांतर्भावमते एकैककोटिसामानाधि
करण्यमादाय सद्धेतावतिप्रसंगवारणाय यथासंचित्संशयजनकतावच्छेदकयावत्प्रकारतापर्यंतं निवेश
नीयं व्याप्यसंशयस्य पृथक्कारणतामते तु नोक्तक्रमेण सद्धेतावतिप्रसंगशंकावकाशः तन्मते कोटि
द्वयसामानाधिकरण्यावच्छिन्नत्वेनैव प्रकारतायाः संशयजनकतावच्छेदकत्वात् अतो यावत्प्रकार

गदा तानिवेशनं संग्राह्ये च यत्किंचिन्निवेशनं च न कर्त्तव्यमेव अपि तु व्याप्यसंशायकहेतुतामात्राद्याति प्रसंगवारणाय
ज्ञानपदमेव निश्चयपरतयोपगंतव्यं इत्थं च व्याप्यसंशयेहेतुतामात्रोद्याति त्यादिना अभिहितं न च धर्मैवप्रसक्तसं
९ शयजनकतायां तंत्रतामतेपि कोटिद्वयसामानाधिकरण्यावच्छिन्नत्वेनैकत्र विवक्षिते विशेष्यविशेषण
१ भावे विनिगमनाविरहात् अपितु प्रत्येकसामानाधिकरण्यावच्छिन्नत्वं प्रत्येकं निवेश्यकारणताद्वयमेव क
ल्प्यते धूमसहचरितवह्निमत्वज्ञानधूमाभावसहचरितवह्निमत्ताज्ञानत्वावच्छिन्नयोः परस्परसहकारित्वात्
कोटिद्वयसहचरितविभिन्नधर्मवत्ताज्ञानात् संशयप्रसंगः धूमसहचरितवह्निमान् तदभावसहचरितवह्नि
मानिति ज्ञानद्वयादितोपि संशयः स्वीक्रियते तथा च सत्वे तावत्प्रसंगवारणाय यावत्यकारतानिवेशनं चावे
यत्किंचित्वनिवेशनं चावश्यकमिति वाच्यं विभिन्नहेतुत्वे साहचर्यधर्मितावच्छेदकवह्नित्वद्रव्यत्वादिधर्मा
णां विशिष्य निवेशे कोटिद्वयसहचरितधर्मवत्ताज्ञानयोः परस्परसहकारित्वोपगमेपि विभिन्नधर्मवत्ताज्ञा
नात् संशयापत्तेर्दुर्वारतया तादृशधर्माणां विशिष्य निवेशनीयतया कारणतानंत्यापत्तेरिति संक्षेपः अथ द
द्रव्यं विशिष्टसत्वादित्यादेः सव्यभिचारताप्रसंगः विशिष्टस्यानतिरिक्ततया विशिष्टसत्वतत्वादेः साध्यत
दभावसहचरितत्वतद्वृत्तित्वयोः सत्वादिति चेन्न गुणकर्मान्यत्वसामानाधिकरण्यरूपेण तद्वैशिष्ट्यस्य हि स्वा
विरुद्धलक्षणतया हेतुतावच्छेदके व्यावृत्तविशेषणतया तत्राप्राप्तेः यथा तु मित्यादिलक्षणमपि विशिष्टद्रव्यत्वसमवे ७
तत्वादिकं तत्र हि ष्टानुमितित्वादिजातेः व्याप्यतेः सत्वेन भागासिद्धेस्तस्य विशेषणत्वायोगात् अत एव नाद
पान्ना तावन्मत्वान्यत्वादिविशेषणं व्यभिचारवारकतया सार्थकं द्वितीयं च यथाश्रुतोः नित्यः बाह्य
कारणकप्रत्यक्षत्वे सति सत्वादित्यादौ सत्यंतार्थस्तस्य च विशेषणत्वेप्यसिद्धेर्निर्वाहात् तथा च दर्शि

तत्तस्य वैशिष्ट्यस्य उपलक्षणतया हेतुतावच्छेदकत्वे सव्यभिचारत्वमिष्टमेव विशेषणत्वे च विशिष्टनिरूपित
समवायादेर्वह्नेर्हेतुतावच्छेदकसंबंधो वाच्यः अन्यथा यद्रूपविशिष्टनिरूपितत्वानवच्छिन्नसमवायादेर्हेतु
तावच्छेदकसंबंधः तस्य हेतुप्रकारस्य उपलक्षणतया हेतुतावच्छेदकत्वात् विशेषणतानुपपत्तेः नच वि
शिष्टनिरूपितसमवायादेर्हेतुतावच्छेदकसंबंधत्वे तेन संबंधेन शुद्धसत्त्वादेरव्यभिचारितया तद्विशेषण
वैयर्थ्यमिति गुणकर्मान्यत्वे सति सत्त्वादित्यादिहेतुप्रयोगे निग्रहप्रसंग इति वाच्यं विशिष्टविशेषणकशुद्धाव
वविशिष्टनिरूपितत्वस्य संबंधतावच्छेदकतया न शुद्धाविशिष्टनिरूपितसमवायादिना तद्रूपानवच्छिन्नस्य
हेतुत्वासंभवात् एवं च विशिष्टनिरूपितसमवायादिना सद्धेतोर्विशिष्टसत्त्वादेस्तेन सव्यभिचारताप्रसंगः
यादृशेन संबंधेन पक्षधर्मताविषयकं यत् ज्ञानं तस्य तादृशेन संबंधेन कोटिद्वयसहचारावगाहितया संशाप
कताप्रयोजकत्वात् समवायसामान्यसंबंधेन साहचर्यावगाहिनो दर्शितविशेषसंबंधेन पक्षधर्मताज्ञानस्य
च संशापकत्वविरहात् तादृशविशेषसंबंधेन पक्षधर्मताज्ञानस्य च संशापकत्वविरहात् तादृशविशेषसं
बंधेन च सद्व्यत्वाद्यभावसाहचर्यस्य सत्त्वादावभावात् तादृशसाहचर्यावगाहिभ्रमसाधारण्यातिप्रसंगानवका
शात् अथ यथा हेतुतावच्छेदकोपलक्षिते व्याप्तिज्ञाने स्थलेपि पदे तद्विशिष्टवैशिष्ट्यज्ञानादनुमितिः केचि
त्त्वादित्यायात् तथा विशिष्टसत्त्वोपलक्षिते सहचारोपग्रहे तत्र तद्विशिष्टवैशिष्ट्यस्य धर्मिया ज्ञानादृ-
पि संशयोत्पत्तिः स्यादिति चेन्न उभयस्थलयोर्विशेषात् तथाहि सामान्यरूपेण सामान्यसंबंधेन वा व्याप्तिग्रहे
सामान्यघटितेन विशेषरूपेण विशेषसंबंधेन वा पक्षधर्मताज्ञानादनुमितिर्जन्यते हेतोस्तत्संबंधस्य वा संको
चे व्याप्त्येव्याप्त्येरव्याप्यातात् सामान्यरूपेण सामान्यसंबंधेन सहचारग्रहे विशेषरूपेण विशेषसंबंधेन वा प

गदा॰ तद्धर्मताज्ञानात्तत्संशयः संकोचस्य साधारण्यव्याघातकत्वात् धूमत्ववह्नित्वादिना धूमतदभावादिसहचारग्र
हेऽप्यार्द्रेंधनप्रभववह्नित्वादिना धर्मिवृत्तित्वज्ञानात् धूमादिसंशयः न वा संयोगसामान्येन धूमतदभावादिसहवृ
१० त्तिवह्न्यादेर्महानसादौ यौगिकसंयोगेन धर्मिणि ज्ञानात् संशयः न वा तत्रासाधारण्यप्रसंग इति ग्रंथस्य द्रव्यगुणकर्मान्य
त्वे सति सत्वादित्यत्र सद्धेतौ द्रव्यगुणान्यत्वे सति सत्वादित्यत्र विशेषत्वे चातिव्याप्तिः विशेष्ये साध्यतदभावोभयसा
मानाधिकरण्यसत्वेन विशिष्टेपि तत्सत्वादिति चेन्न साध्यतदभाववद्वृत्तितावच्छेदकविशिष्टवत्ताज्ञानस्यैव सा
धारणधर्मदर्शनविधया साध्यसंदेहजनकत्वात् यत्किंचित्साध्यसंशयजनकतावच्छेदकीभूतायायाः प्रकारता
वच्छेदकतातन्निरूपकतापर्याप्त्यधिकरणधर्मविशिष्टप्रकृतहेतुतावच्छेदकवत्वविवक्षणे नातिप्रसंगवि
रहात् विशिष्टसत्तात्वरूपप्रकृतहेतुतावच्छेदकस्योभयवद्वृत्तितावच्छेदकत्वविरहात् तथा सति यादृशया
दृशधर्मावच्छिन्नप्रकृतहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन यत्किंचित्संशयजनकता तादृश
तादृशरूपविशिष्टत्वस्य विवक्षणीयत्वात् यत्रोभयसहचरितवृत्तित्वप्रकारतावच्छेदके भासते न तत्र त
दुपलक्षिततद्वत्ताज्ञानस्यापि हेतुतया तद्विशिष्टवैशिष्ट्यावगाहित्वेनाजनकत्वात् उभयवद्वृत्तिता
वच्छेदकत्वे उप्रकारतावच्छेदकस्य यत्र भानं तत्रोभयसहचारघटकतद्वदवच्छिन्ननिरूपितताधिकरणता
वगाहिज्ञानस्यैव हेतुतया तद्विशिष्टवैशिष्ट्यावगाहित्वेन हेतुत्वमावश्यकमिति तादृशहेतुतायसाधार
णोभयवद्वृत्तितावच्छेदकविशिष्टवैशिष्ट्यावबोधत्वेन हेतुतामादाय चासाधारण्यलक्षणं संगमनीयं प्र
कृतपक्षधर्मताज्ञानानिवेशे घटज्ञानं सविषयकं आत्मवृत्तिज्ञानत्वादित्यादावतिव्याप्तिः तथाहि
घटज्ञानं सविषयकं न वेत्यादिसंशयं प्रति घटज्ञानधर्मिकसविषयकत्वज्ञानं प्रमानवेत्याद्याकारकस

104

प्रयोहेतुः अर्थनिश्चयोत्तरं संशये तद्धर्मिकप्रामाण्यसंशयस्य हेतुत्वात् स एव प्रामाण्यसंशयः सविषय-
कत्वतदभाववत्त्वरूपकोटिद्वयोपस्थित्यात्मकः सविषयकत्ववति सविषयकत्वप्रकारकत्वरूपप्रामाण्यस्य सवि-
षयकत्वेन तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्य च तदभावेन घटितत्वात् तादृशप्रामाण्यसंशये च
सविषयकत्वादिज्ञानधर्मिकप्रामाण्याप्रामाण्यसहचरितज्ञानत्वादिमत्ताज्ञाने हेतुरिति सविषयकत्वादिरू-
पसाध्यसंदेहजनककोटिद्वयोपस्थितिजनकधर्मिवृत्तिताज्ञानविषयत्वे ज्ञानत्वाद्यावृत्ततमेवेति प्रकृतपक्ष-
धर्मताज्ञाननिवेशआवश्यकः तन्निवेशे च सविषयकत्वादिज्ञानधर्मिकज्ञानत्ववत्ताज्ञानस्य तादृशज्ञा-
नविषयघटज्ञानादिरूपप्रकृतपक्षधर्मत्वाविषयकत्वान्नातिव्याप्तिरिति मिश्रमतं दूषयति इदं सविषयक-
मिति सविषयकत्वस्वरूपसंबंधात्मकत्वेनाननुगततया तस्मिन् साध्ये ज्ञानत्वादिकं सव्यभिचारमेवेत्यत
आह आत्मवृत्तिवेवेति अप्रामाण्यं भ्रमत्वं न तु प्रमात्वाभावः तस्य साध्याभावाघटितत्वात् तज्जन्य-
कोट्युपस्थितेरेवेति मतभेदेन तज्ज्ञानस्य प्रामाण्याप्रामाण्यसहचरितज्ञानत्ववत्ताज्ञानस्य तादृशसंशया-
हेतुत्वात् सविषयकत्वादिसंशयजनककोटिद्वयोपस्थितिजनकत्वेऽपि प्रामाण्यसंशयस्य काथित्ता-
र्थसंशयहेतुत्वाभावात् अप्रामाणिकतया तादृशकोट्युपस्थितेः साध्यसंशयाहेतुत्वादिभावः ननु विना
साधारणधर्मज्ञानं प्रामाण्यसंशयस्थले विषयसंशयो न स्यात् साधारणादिधर्मज्ञानादिवत् प्रामा-
ण्यसंशयस्यापि संशयजनकत्वमावश्यकमित्यत आह प्रामाण्यसंशयेति ज्ञानत्वलक्षणसमानध-
र्मदर्शनात् प्रामाण्यसहचरितज्ञानत्ववत्ताज्ञानात् प्रामाण्यस्य संदेह इति योजना एतच्च दृष्टान्तवि-
धयोक्तं ज्ञानविषयतात्मकसाधारणधर्मदर्शनात् न तु कारकज्ञानविशेष्यत्वरूपतन्नेदभावसह-

गदा० चरितधर्मवत्ताज्ञानात् विषये च दज्ञानादौ तद्धत्वस्य सविषयकत्वादेः तादृशधर्मवत्ताज्ञानासत्त्वे च संशयोऽ
सिद्ध एवेति भावः नन्वेवमर्थनिश्चयदशायामपि साधारण्यादिधर्मज्ञाने प्रामाण्यसंशये सत्यर्थसंशयः स्यादिति
२९ तत्तस्मिन्नेत्यन्वयव्यतिरेकानुविधानं नोपपद्यत इत्यत आह अप्रामाण्यसंशयेति तदयसाधारण्यप्रकारकं तादृशविशि
ष्टप्रतिबंधकाभावसंपादकत्वनिबंधनं तथा च प्रयोजकत्वेनैवान्वयव्यतिरेकानुविधानोपपत्तेर्न तत्कारण
तासाधकमिति भावः व्याप्यसंशयस्येति व्याप्यतदभावयोर्व्यापकतदसहचरितेन मासाधारणधर्मदर्श
न विधयैव व्याप्यसंशयो व्यापकसंशये हेतुः धर्मस्यैकतायाः ज्ञानस्यानिश्चयतायाश्चाप्रयोजकत्वात् यदा
च व्याप्याभावस्य व्यापकाभावसहचर्यं न प्रतिसंधत्ते तदा धर्मिणि तद्व्याप्यधर्मस्य ज्ञानेऽपि न तत्संदिग्ध इति
स्वीयमते साध्यसंशयजनकतावच्छेदकप्रकारतावच्छेदकसाध्याभाववद्वृत्तित्वस्य व्याप्येः सत्त्वेनातिव्या
प्त्यनवकाशात् यथाश्रुतिहेतुत्वे विशेषणं द्रव्यत्वकारणतामते व्याप्तिमादायातिव्याप्तिः प्रागेवोपपा
दिता ज्ञानपदं निश्चयपरमिति तादृशजनकताया निश्चयत्वावच्छिन्नत्वं विशेषणं देयमित्यर्थः सद्धेतावृ
त्तिव्यभिचारित्वसाधारण्याप्तिमत्त्वाभावेनाप्रसक्तेः हेतुत्वाभिमतपदोपादानवैयर्थ्यकमित्याशंकायामाह हे
त्विति तेन संबंधेन सव्यभिचारत्वघटकतयाभिमतसंबंधेन जनकतात्वं च नार्थं जनकतायां लक्षणघटकत्वा
लाभार्थं तथा च तादृशपदोपादानस्य सार्थक्यात् यादृशरूपावच्छिन्नपत्संबंधावच्छिन्नप्रकारताशालिज्ञानं
साध्यसंदेहजनकं तादृशरूपवांस्तेन संबंधेन सव्यभिचार इत्येवलक्षणं कर्तव्यमिति भावः समवायेन हेतोः स
मवायेन च व्याप्तेः एतेन कालत्वत्वंदर्शितं ज्ञानं घटादेर्ज्ञाति प्रसंग इति योजना न सव्यभिचारत्वप्रसंग इत्यर्थः
अतिप्रसंजकं विशेषणमाह विषयत्वसंयोगादिनामत्संदेहजनक इति विषयत्वसंयोगादिसंसर्गावच्छिन्नसाध्यन

दभावसाहचर्यप्रकारेणानादृशसंबंधेन स्वप्रकारकांयत्संशयजनकज्ञानतद्विषये इत्यर्थः नचैतेन
संबंधेन तद्वत्ताज्ञानस्य लक्षणघटकत्वेपि समवायेन ज्ञानघटादिप्रकारकज्ञानमादायातिप्रसंग इति वा
च्यं तेन संबंधेन तद्वत्ताज्ञानस्य तत्संबंधघटितसहचारविषयकस्यैव संशयजनकतया समवायसंबं-
धावच्छिन्नायां संशयजनकतावच्छेदकप्रकारतायां समवायसंबंधघटितसाध्यतदभावसहचर्यस्यैवा-
वच्छेदकतया तद्वत्तायाः ज्ञानघटादावसत्त्वेनातिव्याप्त्यनवकाशात् विप्रतिपत्तित्वित्यादिमूलेतथापरस- स्थाय
कोट्युपस्थापकत्वमर्थः संगतिस्तद्घटकसाध्यतदभावोपस्थापकपदयोः प्रत्येकं प्रत्येकोपकत्वात्
प्रत्येकमतथात्वेपि वाक्यं तत्र न लक्षणसत्त्वमित्यपि स्फुटमिति। नन्वयमधुत्वेव तदर्थं प्रदर्शयितुं व्याचष्टे
विप्रतिपत्तेरिति विप्रतिपत्ति[illegible]घटकवाक्यजन्यज्ञानस्येत्यर्थः तज्जन्यपदविषयकप्रत्येकज्ञानयोः कोटिद्वयोपस्था-
पकत्वविरहे विसदृशालंबनज्ञानस्य तथात्वात् तदादायैवातिव्याप्तिर्भविष्यतीत्याशंकायां नवा पदद्व-
तिरिति मूलावतारः इति स्वचयितं पूरणसंबलितं तदर्थमाह मिलितस्येति मिलितविषयकज्ञानस्येत्य-
र्थः ननु यस्थापकत्वेपि कोटिद्वयोपस्थापकत्वेपि तद्वत्ताज्ञानतादृशवाक्यप्रकारताशालिज्ञानत्वा-
वच्छिन्नं तथा कोटिद्वयोपस्थापकं तथा च पक्षधर्मताप्रदर्शनोपादानादेव न तत्रातिव्याप्तिरिति भावः पक्षध-
र्मताप्रदर्शनोपादानेपि न तत्रातिव्याप्तिः संभवति पदद्वयविषयकज्ञानस्य कोटिद्वयोपस्थितिजनकत्वेपि
विषयताभेदान्नित्यपदजन्यपदविषयतायाः प्रत्येकं कोटिद्वयोपस्थितिजनकतावच्छेदकत्वविरहा-
त् लक्षणे च कोटिद्वयोपस्थितिजनकतावच्छेदकैकविषयतायाः प्रवानिवेशादित्याह नवेति मिलित्वा
एकविषयतासुखीभूय द्वयोः पदयोर्जनकत्वे जनकतावच्छेदकत्वे कोटिद्वयोपस्थितिजनकतावच्छे

६६

माधा॰
१२

दकीभूतायाविषयतान्तरायअन्त्यामितिपर्यवसितार्थः ननुविप्रतिपत्तिघटकपदानांप्रतिपाद्यत्वादिसंबं
धेनकोटिद्वयसहचरितत्वयातेनसंबंधेनतद्वत्ताज्ञानस्यसंशयहेतुत्वात् तेषांप्रत्येकंसंदेहजनककोटि
द्वयोपस्थितिजनकत्वावच्छेदकविषयताश्रयत्वमस्तनमेवेत्यतआह तथात्वेपीति विप्रतिपत्तिघटकप
दानांप्रत्येकंतादृशविषयताश्रयत्वेपीत्यर्थः अत्ररूपस्यव्यभिचारत्वमितितथाचलक्षणेवनतत्रातिव्या
प्तिरितिभावः ननूपसंहारीपक्षपर्वतेतिमूलमसंगतंसंबंधनिष्ठस्यैवसंबंधिस्वाकतयापक्षेसाध्यस्यत
दभावस्यचसंदिग्धतयातद्नभावेणहेतोस्तत्सामानाधिकरण्यस्यनिश्चितत्वमपाकृतत्वेनहेतोःकोटिद्वयो
पस्थापकत्वासंभवात् अतोऽभिप्रायंव्याचष्टे ननूपसंहारीति अनुपसंहारितादृशपक्षेसाध्यसंदेह
दशायांउक्तक्रमेणतादृशलक्षणसमन्वयइतियोजनायद्यपिविशिष्टवत्ताज्ञानेसाध्यसंदेहजनकंवास्तव
तद्रूपस्यैवलक्षणार्थत्वेतयोपवर्णिनत्वात्सर्वमनित्यंप्रमेयत्वादित्यादौपक्षएवक्वचित्साध्यसक्वचित्साध्यस्य
क्वचित्साध्याभावस्यनिश्चयदशायामनित्यत्वदभावसहचरितप्रमेयत्ववत्सर्वमित्याहिज्ञानस्यसंभवेन
तद्विषयतावच्छेदकोभयसहचर्यमादायसाध्यसंदेहदशायामपिलक्षणसमन्वयइत्यर्थः अनुपसंहा
रितोतोयांतदुभयसाहचर्यसत्त्वेपीदानींतादृशहेतोःसाधारणतयानसामानिलक्षणातिव्याप्तिरितिभावः सा
धारणपदविषयकज्ञानत्वावच्छिन्नस्यैवसंशयान्वयव्यतिरेकानुविधायित्वात्तेनैवरूपेणसंशयहेतुत्वात्न २३
त्तद्विषयकनिश्चयत्वेनतदवच्छिन्नस्यान्वयव्यतिरेकानुविधायितायाअसिद्धत्वात्तथाचसाध्यसंशय
कालेसाहचर्यनिश्चयासंभवेपिनदोषोसंशयात्मकसंशयजनकज्ञानमादायलक्षणसमन्वयःसंभ
वतीतिकेचिदाहुःतन्मतमपन्यस्यति केचित्त्विति वस्तुतोवस्तुगत्यासाधारण्यज्ञानेपितत्साधारणत

तज्ज्ञानेपितत्रतत्पेततायांअविकरंग्रनवच्छेदकंपक्षतावच्छेदकज्ञानतर्भावेगौरवनतत्संशयेति साहचर्यग्रहे
संशयेत्यर्थः साहचर्यज्ञानात् साहचर्यविशिष्टप्रकारकज्ञानात् तथात्वेसव्यभिचारत्वे नाच्छिन्न
तिसंबंधांशेनिश्चयात्मकसंबंधिज्ञानेसंबंधेनतस्मात्कंपातमादिसंशयात्पदार्थस्मरणाद्यनन्तरत्वेवि
तिसाधारणसंशयेकोऽप्युपस्थापकत्वेनसंभवति एवंसंशयसाधारणसहचारज्ञानसहेतुत्वेप्रामाण्यनि
श्चयानास्कंदितत्वमेवावच्छेदककोटौनिवेशनीयंतन्निश्चयत्वेनहेतुत्वेतदग्रप्रामाण्यज्ञानास्कंदि
तत्वमेवेतिलाघवात् संशयात्मकसहचारज्ञानेनहेतुरेवंश्चेनुपसंहारितादृशायांसंशयजनकज्ञान
संपादनप्रयासोपिविफलः तादृशज्ञानासत्वदशायांसाधारण्यव्याप्तिभ्रमेणतादृशज्ञानस्योपलब्धे
ण्णाविधयेवलक्षणाघटकत्वादितिचिंताबीजमूहनीयं केवलान्वयीत्यादिमूलमवतारयति नन्वि
त्यादिनाश्रयंघटपत्वादित्यादिस्थलेपक्षतादृशायांसंशयजनकनिश्चितसाध्यतदभाववद्वृ
त्तित्वस्यसत्वादव्याप्त्यप्रसंगेलक्ष्यलत्वतयाऽव्याप्तिपरिहारेनसंगच्छत इत्यतस्तत्रनिश्चितसाध्यवद्वृ
त्तित्वंसंपादयतिएवमिति हेतुभूतेदत्ववतिपूर्वंघटत्वग्रहेएवतन्मूलकात्सच्चघटइत्याकारकस्मरणा
न्तदघटत्वेनैवतदघटभेदोन्यघटेगृहीतेपावयते नान्यथाप्रतियोगितावच्छेदकप्रकारकप्रतियो
गिज्ञानविरहादितिधर्मिणिपूर्वंघटत्वग्रहस्यानुसरणंतद्घटभिन्नोयमितिभ्रमएवनसंभवति विशे
ष्यविरहादुक्ताखिरहस्तुमेनद्घटभिन्नोयमितिभ्रमदशायां इदंत्वावच्छिन्नेघटत्वग्रहेइदंत्वस्यसाध्य
सहचरितत्वेननिश्चितेसाध्यवत् धर्मिव्यावृत्तत्वज्ञानानुसंपादनायानतदाधर्मिणिघटत्वनिश्चयत्वेएवसंशय
प्रयोजनकस्यतत्कालीनतत्सहचरीयसाध्यनिश्चयविषयव्यावृत्तत्वस्येदंत्वोसत्वमतः केवलतद्व्यक्तित्वेनप्रति

गदा० योगिविषयानद्घटमात्रवृत्तेर्घटत्वेन तज्ज्ञानानुसरणं तथा सति तादृशभेदभ्रम एव तद्व्याप्तित्वविशिष्टेव धर्मिणि
घटत्वस्य निश्चयइति तन्निष्ठे इदंत्वे दर्शितसंशयप्रयोजककरूपाभावादव्याप्तिप्रसक्तिः इदंत्वविशिष्टे घटसामान्यभेदभ्र
२३ मे इदंत्वे विपक्षवृत्तित्वनिश्चयसंशयप्रयोजकरूपाभावादव्याप्तिप्रसक्तिः इदंत्वविशिष्टे घटसामान्यभेदभ्रमे इदं
त्वे विपक्षवृत्तित्वनिश्चयसंभवात्तद्व्याप्यत्वज्ञानासंभवादसाधारणानैकस्यदमपीति प्रतियोगिकोटौ तत्राभानात्तु
13 धावत्ते इदंत्वपीति अव्याप्तिरित्यनुषज्यते वस्तुतस्तद्व्याप्यत्वाभावेन वास्तविकस्य साध्यनिश्चयविषयीभूत-
धर्मिव्याप्यत्वस्याभावेन लक्षणायोगादिति वास्तवसंशयप्रयोजकरूपवत्त्वस्य लक्षणत्वादिति भावः अत एवे-
त्यत्रेदंपदेन पूर्वाभिहितायाः सन्येनत्वाल्लानस्य प्रकृतदोषतायाः परामर्शः संगतिः तस्यासाधारण्यादेरनित्यदोषतायाः
परामर्शः संगतिः तस्यासाधारण्यादेरनित्यदोषतायामनुपष्टंभकत्वात् अतः तत्परामर्शनीयं व्याचष्टे अत एवे-
ति प्रकृतदोषाधीनं प्रकृतहेतुमति पक्षे च साध्यतदभावानिश्चयसाध्याभववव्याप्यवत्ताभ्रमाधीनं तद्दोषत्वं हेतोरसा-
धारण्यसत्प्रतिपक्षरूपदोषवत्त्वे तस्य असाधारण्यस्य सत्प्रतिपक्षस्य चानित्यदोषत्वं दूषणाविशेषएव हेतोर्दुष्टतासं-
पादकत्वे कादाचित्कत्वे कदाचिदेव हेतोर्दुष्टतासंपादकत्वे एतावता यं घटइत्यादौ दूषणाविशेषे प्रकृतदोषाधीन
दुष्टत्वशंकाया अनिवृत्तेस्तन्निवृत्त्यर्थं अन्यथेत्यादिग्रंथसंगमनाय सूचयति एवंचेति दोषताप्रयोजकं निश्चितसा-
ध्यवद्व्याप्यत्वादिकं हेतौ तिष्ठतीति शेषः तत्रानित्यदोषत्वमपि तत्रैवानित्यदोषत्वमपि भ्रमादोषताप्रयोजकरू-
पस्येति अन्यथापदार्थं व्याचष्टे भ्रममात्रादिति तादृशरूपभ्रममात्रादित्यर्थः केचिदित्यस्वरससूचनाय सचनि-
श्चितत्वसाध्यतदभाववद्व्याप्यत्वस्य संशयप्रयोजकतायाः अग्रेयत्वंदूषणीयत्वात् असाधारण्यादेः प्रकृतदोषा-
धीनदूषकतायाः प्रकृतानुपयोगितया मलानुपयुक्ततया चांतरावेत्यत्रेदंपदेन तत्परामर्शासंदर्पविरोधाच्च नतस्य-

असाधारणस्य धर्मस्य वृत्तिमतः नन्वेतादृशाद्धेतोः संशयप्रयोजकरूपशून्यत्वे असाधारण्यमेव कथं वीजाभा-
वादित्यत आह असाधारणस्यत्विति असत्त्रूप्याप्यंकातः नन्वयं घटपटत्वादित्यादेरिव तुल्ययुक्त्या शब्दो नित्यः शब्द-
त्वादित्यादेरपि सत्त्वेन तत्त्वमेव शब्दो नित्यः शब्दत्वादिकमपि विरुद्धमेव न त्वसाधारणं साध्याभाववद्व्यावृत्तत्वा-
भावादित्युदाहरणाभावादसाधारणहेत्वाभासस्यैवाप्रसिद्धिरित्यत आह एवंचेति अवृत्तीति अवृत्तीतिवृ-
त्तिमतः साध्यतदभाववद्व्यावृत्तत्वासंभवादिति भावः ननु पक्षधर्मताज्ञानविरहादेव गगनादिहेतुकस्थले ऽनुमि-
त्यनुत्पादे निर्वाहादसाधारणज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वमेव नास्तीति कथं तस्य हेत्वाभासत्वमित्यत
आह पक्षवृत्तित्वेति असंकरः इत्यत्तानधीनानुमित्यनुत्पादप्रयोजकज्ञानविषयत्वं नतूभयव्यावृत्तत्वस्य वृत्तिम-
त्वविरुद्धतया तदुभयज्ञानस्यैकदासंभवः मिथः प्रतिबंधकत्वात् नचैवं पक्षधर्मताज्ञानाभावसंपादकतये-
व तस्य हेत्वाभासत्वं निष्प्रत्यूहं न तथा सत्यसिद्धावेवान्तर्भावेन सव्यभिचारप्रभेदत्वानुपपत्तेरित्यत आह नचोभयेति-
स्वरूपतो विरोधः यस्य यावद्व्याप्यत्वाविशेषितयोः परस्परज्ञानप्रतिबंधकीभूतज्ञानविषयत्ववात्त्वविरुद्धवि-
षयकस्यापि ज्ञानस्याविरोधाविषयकस्याप्रतिबंधकत्वादिति भावः ननु निश्चितसाध्यतदभाववद्व्यावृत्तत्वरूपसं-
शयप्रयोजकधर्मस्योक्तहेतौ सत्त्वान्न कथं तत्राव्याप्तिः शंकाकथं वालक्षणत्वाभ्युपगमेन तत्परिवारइत्यत आह
निश्चितेति साध्यतदभावनिश्चयीभूतधर्मिव्यावृत्तत्वं न साध्यसंदेहजनकतावच्छेदकाविषयवृत्तित्वस्य तथा-
त्वे संशयप्रयोजकत्वे सद्धेतौ वह्न्यधिकरणवृत्तितया निश्चिते धूमादौ धर्मिवृत्तित्वग्रहदशायां तादृशाव-
ने संशयजनकज्ञानस्य विशेषणविधया लक्षणघटकत्वे अव्याप्तिः संभवतीत्यभिप्रायेण वस्तुतो यदा हे-
तुमति साध्याभावप्रमो वर्तते तदा हेतौ तदधिकरणवृत्तित्वाग्रहेऽव्याप्तिः संभवतीतादृशज्ञानस्या

६२

शादा
२८
14

पलक्षणत्वादिति ध्येयम् तादृशेति साध्यतदभावविषयकेत्यर्थः तत्रसंशयप्रयोजकतावच्छेदकरूपघटकं
रूपं संदेहजनकतावच्छेदकरूपेस्य संशयजनकतावच्छेदकप्रकारतावच्छेदकस्य विशेषणत्वे धर्मिविशेषणतया
सव्यभिचारपदप्रतिपाद्यत्वे महानसादिवृत्तितादृश्यामव्याप्तिः तत्कालांतर्भावेणाव्यभिचारित्वव्यवहारापत्तिः तद
नी साध्याभाववद्वृत्तित्वाभावस्य तत्रासत्त्वात्तादृशव्यवहारविषयस्याबाधितत्वादिति भावः न च द्रव्यं विशिष्टसत्त्वा
दित्यादौ अतिव्याप्तिवारणाय साध्यसंदेहजनकतावच्छेदकप्रकारतानिरूपितावच्छेदकप्रकारतावच्छेदकताधर्मवत्प्र
कृतहेतुतावच्छेदकधर्मवत्त्वमेव व्यभिचारपदार्थो वाच्यः साधारणस्थले च तादृशो धर्मः साध्यतदभाववद्वृत्ति
तावच्छेदकत्वमेव तद्विशिष्टहेतुतावच्छेदकावच्छिन्नहेतुमत्ताज्ञानस्यापि संदेहजनकतोपगमात् एवं च ता
सभावदेमहानसादिवृत्तितादृशायां वह्न्यभाववद्वृत्तित्वविरहेपि तदवच्छेदकतासमत्वादिसत्त्वेन तादृशव्यभिचा
राभावो नास्तीति कथमुक्तव्यवहारापत्तिरिति वाच्यं एवमपि अनित्यधर्मस्य हेतुतावच्छेदकत्वे तद्दशायामाप
त्तितादृशत्वस्यातविशेषणत्वे कालविशेषावच्छिन्नतया तदानीं व्यभिचारीत्यादिव्यवहारविषयत्वेऽव्याप्तिस्तत्का
लांतर्भावेण तादृशव्यवहारानुपपत्तिरितितन्नार्थः साधारणस्यानित्यदोषतया कालविशेषांतर्भावेन व्यभि
चारित्वव्यवहाराजनकतायाः तत्रेष्टत्वात् उपलक्षणत्वे अत्यंतायोगव्यवच्छेदपरिचायकतया व्यभिचारपदप्र
तिपाद्यत्वे तादृशरूपात्यंतायोगव्यवच्छेदस्य तत्पदार्थत्वोपगमरीतियावत् असाधारण्येतोर्णा तादृशायां हेतुम
तिसाध्यतदभावयोरन्यतरानिश्चयदशायां तत्कालांतर्भावेनातिव्याप्तिः कालांतरेतासाधारण्यमादाय सव्यभिचा
रव्यवहारापत्तिरिति विंदुनानिहारवधेयं प्राहुः नित्यः शब्दत्वादित्यादौ पक्षतादृशायां सव्यभिचारव्यवहारानिया
मकं यत् घटगगनादिव्यावृत्तत्वरूपमसाधारण्यं तच्छब्दादौ साध्यादिनिश्चयदशायामप्यक्षतमेवेति विशेषण ९१

त्वेपि तद्दोषतादवस्थ्यं संशयप्रयोजकरूपस्य तथात्वेन व्यभिचारप्रतिपादनात् किंतु साध्यतदभाववद्वृत्तित्वनि
श्चितसाध्यतदभाववद्व्यावृत्तत्वरूपेणैव विभाजकमात्रमननुगतरूपं एवं च साधारण्यमुपलक्षणमसाधारण्यं च वि
शेषणमित्यविरोधः निश्चयघटितरूपावच्छिन्नपरवाक्याच्च कालविशेषो निश्चयांशपरत्वाच्चेति साध्यतदभावनि
श्चयादौ खंडशक्तिस्वीकारादन्वयबलात् साध्यतदभावनिश्चयादौ खंडशक्तिस्वीकारादन्वयबलात् साध्यतदभाव
निश्चयविषयवृत्तित्वसामान्याभावभिन्नस्यापि तत्कालीनतन्निश्चयविषयवृत्तित्वत्वावच्छिन्नाभावस्य लाभः व्य
भिचारपदस्य साधारण्यासाधारण्यरूपनानार्थकत्वमेवेति चेदुच्यते तदुपलक्षणत्वेपि नोक्तदोषावसर इति एवं च नि
श्चयाघटितं साध्यतदभाववद्व्यावृत्तत्वमेव संशयप्रयोजकं तदवच्छिन्नप्रकारकज्ञानस्य विशेषदर्शनतया संशयप्रति
बंधकत्वेपि तत्कोटिविशिष्टबुद्धौ तत्कोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानप्रतिबंधक
तायां विपरीतकोटिमद्व्यावृत्तत्वावच्छिन्नप्रकारकज्ञानस्योत्तेजकतया तस्यानिपत्तत्वदवसंशयनिर्वाहः तथा
चायं व्युत्पन्नत्वादित्यादौ साध्यतदभाववद्व्यावृत्तत्वस्यासत्वेनाव्याप्त्याशंकायाः अलक्ष्यत्वाभ्युपगमेन तत्परिहार
सूचनासंगतिरिति सन्दिग्धतात्पर्यार्थः संशयप्रयोजकरूपं चेदानीमुपलक्षणविधयैव दुष्टव्यवहारनियामक
मतो महानसादौ रासभादिवृत्तितादशायां नाव्याप्तिः असाधारण्यस्य हेतुः सर्वदैव तथैवेति नातिप्रसंगोपीति ध्येयं
अनुपसंहेतोर्वास्तवसाधारणप्रकरणसमत्वाभावादसाधारणप्रकरणसमप्रसक्तोरिति व्याचष्टे असाधारणेति भ्रमवि
षयस्य नव्यमते दोषत्वाभावादनित्यदोषत्वमिति व्याचष्टे विशेषेति प्रयोजकत्वं प्रयोजकज्ञानविषयत्वं अत एवास्ये
दंपदार्थस्य सद्धेतोः सर्वदा अनुपष्टत्वस्य भ्रमविषयत्वस्यानुत्पादप्रयोजकतायामनुपष्टंभकतया तदुपष्टंभं सूचयति
नत्विति तथा च यत्र पक्षसद्धेतुः सर्वदैव तथा न तु कदाचिदपि दुष्टलक्षणस्यान्तरावेत्येतत्स्य लीयात्मिति विरोधीयो

गदा॰ भ्रमरूपो ग्रहः तस्यानित्यत्वादप्रयोजकत्वेपि तद्विषयो न हेतुदोषः अभ्रमदशायां संदेहेतोर्दुष्टत्वेन भ्रमविषयस्य दो-
२५ षत्वाभावस्य कस्मादित्यत एवं त्यादि मूलस्य पर्यवसितोऽर्थः ननु भ्रमस्यानित्यत्वादप्रयोजकत्वे तद्विषयस्य दोषत्वम-
पीष्यत एवेति भ्रमाविषयो न दोष इत्येवासिद्धमित्याशंकायां अन्यथेत्यादि मूलावतारः तादृशशंकोद्धारं स्फुटी विकीर्षुर-
15 न्यथापदं व्याचष्टे अन्यथेति मूले वाधादि मूलावतारः तादृशशंकोद्धारं स्फुटीचिकीर्षुरन्यथापदं व्याचष्टे अन्यथे-
ति मूले वाधादि ज्ञान इति पक्षविशेष्यकसाध्याभावादि भ्रमदशायामित्यर्थः हेत्वाभासाधिक्यापत्तिः अतिरिक्तहेत्वा-
भाससंख्योकारापत्तिः वाधादेर्नित्यदोषतया सर्वदा दूषितहेतया भ्रमविषयस्यान्तरं तर्भावासंभवादिति भावः अभेदे सा-
ध्ये प्रमेयत्वस्यानित्यत्वे साध्ये पाक्षाकाशान्यतरवत्त्वस्य च वास्तवसाध्यवदवृत्तित्वविरहेणाविरुद्धत्वासंभवात् प्राचीनम-
ताभिप्रायकतया तयोर्विरुद्धत्वमुपपादयति दीधितौ अनवगतेति एवं च साध्यवदवृत्तित्वेनेति मूलस्य साध्यवदवृत्ति-
तयाऽनवगतत्वेनेत्यर्थः तादृशस्थलेपक्षतादशायां हेतौ तदभावाभयसहचारस्याशक्यनिर्णयत्वेपि कालान्तरी-
यतन्निर्णयविषयत्वात् वास्तवतदुभयसहचारमादाय लक्षणगमनसंभवात् अलस्यत यो ऽव्याप्तिपरिहारो न घटत-
इत्यत आह अभ्युपगमेति संशयजनकपक्षधर्मताज्ञानस्य विशेषणविधया लक्षणघटकत्वमभ्युपगमेत्यर्थः य-
थाश्रुते व्याप्तिग्रहदशायां संदेहे तावति व्याप्तिवारणाय तादृशज्ञानं विशेषणविधयैव निवेशनीयं तादृशज्ञानदशा-
यां चागत्या साधारणस्यापि सव्यभिचारत्वेनोपगंतव्यमेवेत्यतो वर्णितेति यथाव्याख्याने त्वर्थं कं अनुमितिविरोधि-
त्वकथनमकिंचित्करमित्याशंकामभिप्रायोपवर्णनेन निराकुरुते नानिरूपलक्षणाज्ञानविषयतावच्छेदकधर्मवत्त्व- ७५
स्यैव विभाजकतया साधारण्यादिरूप तादृशधर्मविषयकज्ञानस्य चानुमितिविरोधितया तादृशनियमोपगमनेपि त-
था विधधर्मस्य न विभाजकत्वानुपपत्तिरिति परास्तं साधारण्यत्वादिनैव साधारण्यादिज्ञानस्य विरोधितया तादृशाप

त्वधर्मत्वाज्ञानविषयतावच्छेदकत्वेन तस्य विभाजकत्वानुपपत्ते एवं च तदज्ञानेपीति मूलस्यानिरुक्तविभाज-
कतावच्छेदकावच्छिन्नाज्ञानेपीति साधारण्यादिप्रत्येकस्येत्यस्य साधारण्यत्वादिप्रत्येकधर्मावच्छिन्नस्यापि
विभाजकत्वेऽतिप्रसंगः अनुमितिकारणीभूतज्ञानविरोधिधर्मवत्त्वादिना वा सव्यभिचारविरुद्धादीनामैक्यप्र-
संगः मूले प्रतिबंधादित्यस्यानिरुक्तसामान्यधर्मज्ञानस्याप्रतिबंधकत्वादिति शेषः तस्यैव दोषत्वाच्चेत्यस्य प्रत्ये-
कधर्मस्यैव विरोधित्वादित्यर्थः तत्रैव प्रतिबंधादित्यतोहेतुरिति तेन न सत् दोषत्वाच्चेति चकारादसंगतेः त-
स्यैव दोषत्वाच्चेत्यस्य प्रथमं तस्यैव विरोधित्वादित्यर्थः तत्रैव प्रतिबंधादित्यतोहेतुरिति तेन न सत् दोषत्वाच्चेति
चकारादसंगतेः तस्यैव दोषत्वाच्चेत्यस्य प्रथमं तस्यैव दोषतयोद्भावयितुमुचितत्वात् न त्वनुगतधर्मस्येत्यर्थः
एवं च दोषविधया याद्रूप्यधर्म उद्भाव्यते स एव विभाजकः उक्तानुगतधर्मस्य चानुद्भावनीयतया न तथात्वमिति हृ-
दयं न तु तदज्ञानदशायामन्यज्ञानादनुमितिबंधस्य तज्ज्ञानीयानुमितिविरोधिताबीजत्वं मणिताभिहितं न च-
तेन तथा सति सत्प्रतिपक्षादिज्ञानस्यानुमितिविरोधितया बाधादिज्ञानसाम्यं तथात्वापत्तेः अतः स्वयं तद्बीज-
माह वस्तुतस्त्विति उपस्थापकत्वाद्धीति कोटिद्वयोपस्थापतेः अतः स्वयं तद्बीजमाह वस्तुतस्त्विति उपस्था-
पकत्वाद्धीति कोटिद्वयोपस्थापकज्ञानविषयत्वादित्यर्थः आदिपदात्स्वयंनिष्ठापि ततादृशज्ञानविष-
यतावच्छेदकरूपवत्त्वपरिग्रहः विरोधिविषयकत्वाभावात् याद्रूप्यनिरूपितप्रतियोगितावच्छेदकावच्छिन्नन-
ह्याप्यत्वावच्छिन्नाविषयकत्वात् इदं त्ववधेयं मूले प्रतिबंधादित्यनेनानंतरं समानाभावेन निरुक्तज्ञानस्यानुमि-
त्यप्रतिबंधकत्वादिति शेषः एवं च प्रत्येकज्ञानस्यानुमितिप्रतिबंधकत्वेनानुगतधर्मज्ञानस्यानुमित्यप्रतिबंध-
कत्वसंपादकतया मूलेऽभिहितं किंतु तथात्वेन प्रमाणाभावे कथितेऽनंतरं न तु प्रत्येकेनानाधर्मज्ञानस्यानुमितिवि-

गदा॰

२६

रोधित्वकल्पनापेक्षयाविरोधविषयकस्याप्यनुगतधर्मज्ञानस्यैकस्य तथात्वं विशेषदर्शितं साधारणादि-
हेत्वकानुकानुमितिवारणाय कल्पयितुमुचितमित्याशंकावतारात्तत्परिजिहीर्षया प्रत्येकज्ञानस्यावश्यं-
कल्पनीयप्रतिबंधकताकत्वे दोषत्वाच्च प्रतिबंधादित्यनेनाभिहितम् एवमीदृशायानेः उक्तापि निर्वह्नमा-
णानुगतधर्माज्ञानेपि अनुमितिविरोधिज्ञानाविषयत्वे बोध्यमिति शेषः विरोधिपदस्य प्रतिबंधकतार्थक-
त्वे: संगतिः साधारणादेस्तनतथात्वात्तदीव्याचष्टे विरोधित्वमिति विरोधिज्ञानेति प्रतिबंधकीभूतज्ञाने-
त्यर्थः अनुमितिविरोधिसंबंधनिवेशेनैवोपपत्तावव्याप्तिपदमनर्थकमित्याशंकां निराचिकीर्षुस्तस्या-
व्यभिचारिणि साध्याभाववद्वृत्तित्वादिविरहदशायामव्याप्तिवारकतया सफलतायतव्याचष्टे अव्या-
प्तीति अत्यंतायोगः प्रतियोगिवैयधिकरण्यावच्छिन्नोऽभावः नातिप्रसंग इति एतभावो महानसादिव्या-
प्तितादृशायां वह्न्यभाववद्वृत्तित्वासत्वेपि प्रतियोगिवैयधिकरण्यावच्छिन्नतदभावस्य तत्रासत्वेन त-
द्व्यवच्छेदस्य तदानीमपि सत्वादिति भावः ननु अव्याप्तिपदस्याऽत्यंतायोगव्यवच्छेदार्थकत्वे शब्दोऽ-
नित्यः शब्दत्वादित्यादौ असाधारण्यादीनां तादृशायामतिप्रसंग इत्यत आह साध्यवद्वृत्तित्वेति नासा-
धारण इति निश्चयागर्भितस्य साध्यतदभाववद्व्यावृत्तत्वस्यैवासाधारण्यपदार्थत्वादिति विशेषः तथाचो-
क्तस्थले तत्र कथंचिदपि असाधारण्यपदार्थत्वादिति विशेषः तथाचोक्तस्थले तत्र कथंचिदपि असाधा-
रण्यासत्वान्नातिप्रसंग इति भावः बाधादिवारणाय विवक्षणीयस्य पक्षे साध्यवैशिष्ट्यग्रहाविरोधित्वस्य
लाभाय पक्षपदं व्याचष्टे पक्ष इति संदिग्धसाध्यविशिष्टः धर्मी पक्षतावच्छेदकावच्छिन्नः विशिष्टहेतोर्हे-
तुतावच्छेदकावच्छिन्नेतद्वृत्तित्वेति तादृशसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षवृत्तित्वसार्थक-

वैशिष्ट्यं च वैज्ञानिकं तेन बाधादिसंकरस्थले साध्यविशिष्टपक्षतावच्छेदकावच्छिन्नविषयकज्ञानविरो
धित्वान्न बाधादिकमाहाय इत्यादौ वह्निमान् धूमादित्यादौ प्रतिव्याप्तिरिति भावः अत्र च साध्यवद्वृत्तित्वरू
पासाधारण्यस्य संग्रहः तज्ज्ञानदशायां हेतौ साध्यविशिष्टपक्षवृत्तित्वज्ञानानुदयात् एवं साध्यांशे संश
यविषयत्वविशेषणमप्यनर्थकमतस्तत्परित्यज्य निष्कृष्टार्थमाह तथा चेति पक्षतावच्छेदकेति पक्ष
तावच्छेदकावच्छिन्नपक्षविशेष्यतानिरूपिता साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारता यादृशी हे
तुतावच्छेदकावच्छिन्नहेतुप्रकारतानिरूपका लौकिकसंनिकर्षाद्यजन्यज्ञानाविरोधित्वस्य लाभादि
त्यर्थः तादृशज्ञानाविरोधित्वं च न तादृशज्ञानसामान्यनिरूपितप्रतिबंधकतानतिरिक्तवृत्तिविष
यित्वानिरूपकत्वं हेतुमन्निष्ठसाध्याभावादिरूपव्यभिचारस्यापि पक्षनिष्ठसाध्याभावत्वादिना बुद्धे
स्तादृशज्ञाने प्रतिबंधकत्वात् तादृशविषयतानिरूपकत्वेनासंभवप्रसंगात् किंतु तादृशविष
यतानिरूपकतानवच्छेदकधर्मवत्त्वं तदनवच्छेदकत्वं च तदवच्छेदकतापर्याप्त्यनधिकरणत्वं तेन हेतुम
न्निष्ठसाध्याभाववत्त्वादेः तादृशप्रतिबंधकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकपक्षनिष्ठसा
ध्याभावभाववत्त्वादितोऽनतिरिक्तत्वेपि न क्षतिः बाधादिनिष्ठानामप्रमितिविरोधितानवच्छेदकधर्माणां
प्रमेयत्वादीनां तादृशविषयतानिरूपकतानवच्छेदकत्वेपि तादृशविषयतानिरूपकतानवच्छेदके भ्रान्ता
१८ ऽप्रमितिविरोधितावच्छेदकरूपावच्छिन्नत्वस्य सम्प्रदायार्थत्वान्नातिप्रसंगः तादृशायत्किंचिज्ज्ञानं यादृश
रूपावच्छिन्नविषयकनिश्चयसामान्याप्रतिबंधं तादृशयोः प्रमितिविरोधितावच्छेदकधर्मस्तदवच्छि
न्नत्वं वा सम्प्रदायार्थः वस्तुतस्त्विति तत्तादृशज्ञानाविरोधित्वमप्रमितिविरोधिनि तादृशाविरोधिना॰

गदा॰ १८

नवच्छेदकत्वं वाऽनुमितिविरोधित्वावच्छेदकेन निवेशनीयं परं त्वनुमितिविरोधितावच्छेदकानुमितिनिष्ठ
प्रतिबध्यतायामेव तादृशज्ञानत्वन्यूनवृत्तित्वं निवेशनीयं लाघवात् वाधादिज्ञाननिरूपितप्रतिबध्यताना
च तादृशसकलज्ञानसाधारणतया न तादृशज्ञानत्वन्यूनवृत्तित्वमतो नातिप्रसंगः व्यभिचारज्ञानप्रतिब
धत्वं च न्यूनवृत्त्येव व्याप्यविषयकतादृशज्ञानावृत्तित्वात् अत्रापि सर्वत्रैतादृशपदं विशेषणीयमि
ति अत्र च द्रव्यत्वाभाववद्वृत्ति द्रव्यं प्रमेयत्वादित्यादौ प्रकृतपक्षे व्यभिचाराभावो न विरुद्धः तत्र व्य
भिचारेऽसिद्धिमध्ये एव निवेशयत इति हृदयपक्षसाध्यसाधनानां अप्रसिद्ध्या समन्वयः निरास इति तेषां ज्ञा
नस्य यथोक्तज्ञानप्रतिबंधकत्वादिति भावः असिद्धिसंकीर्णः ह्रदादौ धूमादिसाधने वह्न्यादिहेतुः तत्संग्रहः
तत्र यथाश्रुतपक्षवृत्तित्वाभावे पि यथोक्तज्ञानाविरोधित्वविशिष्टानुमितिविरोधिसाध्याभाववद्वृत्तित्वा
द्यारोपलक्षणसमन्वयसंभवादिति भावः ननु विरोधोऽपि यथोक्तज्ञानाविरोधी अनुमितिविरोधी चे
त्यतिप्रसंगः न च विरुद्धो हेतुः साध्यवदवृत्तितयाः साधारण्ये वेनितत्र सव्यभिचारलक्षणातिव्याप्ति
प्रसक्तिरिति वाच्यं यथोक्तज्ञानाविरोधित्वविशिष्टानुमितिविरोधित्वस्य विरोधसाधारण्ये तस्य व्यभिचा
रपदार्थत्वे तत्पदस्य पारिभाषिकत्वापत्तेः व्यभिचारलक्षणातिव्याप्तेस्त्वाशंक्य परीहारत्वात् अत आह
विरोधोऽपीति फलतः तदभावव्याप्यवत्ताज्ञानविधयानुमितिप्रतिबंधरूपफलप्रयोजकज्ञानविषयत्वे
न प्रतिरोध एव प्रतिरोधत्वं लक्षणमेवं तथा च पक्षे साध्यवत्ताज्ञानविरोधित्वान्न तत्र पतिव्याप्तिरिति तज्ज्ञानेन तद
भाववत्ताव्याप्यवत्ताज्ञानविधया पक्षे साध्यवत्ताज्ञानं विरुणद्धीति हृदयं साध्यसामानाधिकरण्यसैव चिताम
णिकारयते विरोधत्वतया तस्य पक्षे साध्यवत्ताज्ञानाविरोधितयाऽतिव्याप्तिर्दुर्वारैवेत्यतः तन्मताभिप्रायेण।

प्रकांतरमनुसरति तद्रूपमत्वेनेति विरोधात्मत्वेनवेत्यर्थः विरोधि अनुमितिविरोधि ग्रंथे तन्मते किमसा
धारण्यं न तावत्पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वेन ज्ञातस्य पक्षे साध्यवत्ताज्ञाने प्रति॰
साध्याभावव्याप्यवत्ताज्ञानमुद्रयाविरोधित्वेन सत्प्रतिपक्षे विरहात् नापि निश्चितसाध्यवदावृत्तित्वं तज्ज्ञा
नस्यानुमितौ तत्कारणीभूतज्ञाने वा प्रतिबंधकताविरहे हेत्वाभाससामान्यलक्षणस्यैतल्लक्ष्यस्य च तत्सा
धारण्यविरहादनुमितिकारणीभूतसाध्यसामानाधिकरण्यज्ञानं प्रति साध्यवद्व्यक्तिविशेषावृत्तित्वज्ञानस्य प्र
तिबंधकत्वात्तादृशवित्प्रतिबंधकत्वे साध्यसामानाधिकरण्यग्रहाविरोधित्वरूपविरोधानन्यत्वस्य तत्रासत्वेन॰
प्रकृतलक्षणस्य तत्साधारण्यासंभवात् नापि पक्षवृत्तित्वाविशेषितसाध्यव्यापकीभूताभावप्रतियोगित्वं
तज्ज्ञानस्यानुमितौ तज्जनकज्ञाने चाविरोधात् यदि च पक्षधर्मिकप्रकृतहेतुमत्ताज्ञानसहकृतं प्रकृ
तहेतुमत्ताज्ञानसहकृतं प्रकृतहेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानमनुमितिं प्रतिबन्धाति॰
स्थाणुत्वाभावव्याप्यकरादिकरादिमांस्थाणुरयमित्यादिज्ञानद्वयदशायामपि अयं स्थाणुर्वेति ज्ञानानुदया
त् धर्मिविशेष्यकतद्वत्ताज्ञानविशिष्टतद्धर्मिग्राह्याभावव्याप्तिनिश्चयत्वेनैव तदभावव्याप्यवत्ताज्ञानस्य
प्रतिबंधकत्वादित्युच्यते तदा तादृशधर्मस्य पक्षे साध्यवत्ताज्ञानविरोधित्वात् सत्प्रतिपक्षे विरह इति अत्र
केचित् पक्षवृत्तित्वविशेषितं साध्यव्यापकीभूताभावप्रतियोगित्वमेव साधारण्यं सत्प्रतिपक्षे चाविरो॰
धिताघटकप्रतिबंधकतायां तादृशसाधारण्यविषयकत्वानवच्छिन्नत्वविशेषणं प्रदेयं तत्साधारण्यं
प्रकृतलक्षणस्योपपादनीयमित्याहुः परे तु हेतुनिष्ठसाध्यव्यापकीभूतताभावप्रतियोगित्वमेव साधार
ण्यं तद्विषयकत्वस्य पक्षधर्मिकहेतुमत्ताज्ञानविरहकालीनानुमित्यप्रतिबंधकज्ञानसाधारणतयानु॰

गदा. मितेः प्रतिबंधकतातिरिक्तवृत्तित्वेपि पक्षधर्मिकहेतुमत्तानिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्व
मनुमितिबंधकतानतिरिक्तवृत्तितादृशत्वस्य सामान्यलक्षणेऽवश्यं विवक्षणीयतया सामान्यलक्षणस्य प्र
१८ कृतलक्षणाविशेष्यदलस्य च तत्साधारण्येन निर्वाहः पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशि
ष्टसाध्यवत्ताज्ञानाविरोधित्वस्य च तादृशायत् किंचिज्ज्ञाने यादृशधर्मावच्छिन्नविषयकनिश्चयसामान्या
प्रतिबध्यतादृशधर्मवत्त्वरूपस्य शरीरे निश्चयांशे पक्षधर्मिकहेतुमत्तानिश्चयवैशिष्ट्यानिवेशात्तादृश
निश्चयविरहकालीनहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वविषयकनिश्चयस्यापि तद्विषय
कनिश्चयसामान्यांतर्गतत्वेन पक्षे साध्यवत्ताज्ञानस्य च तत्प्रतिबध्यतया तदस्याप्येतत्साधारण्यापत्तिरित्या
शः वस्तुतस्तु यादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबंधकताशून्यपक्षधर्मताज्ञानका
लीनज्ञानवृत्तितादृशत्वमेव विवक्षणीयं अथवास्तु व्यापकतत्कत्वरूपानतिरिक्तावृत्तित्वनिवेशे यादृ
शविशिष्टविषयकनिश्चयत्वव्यापकः पक्षधर्मताज्ञानकालीनत्वानुमितिप्रतिबंधकत्वोभयाभावः
तादृशत्वमेव विवक्षणीयं अन्यथा स्वरूपासिद्धिवारकस्य हेतुमत्ताग्रहाविरोधित्वदलस्यैव वैयर्थ्याप
त्तेः पक्षधर्मिकहेतुमत्तानिश्चयकालीनतद्विषयकनिश्चयस्याप्रसिद्ध्या यादृशविशिष्टविषयकपदे
न तस्योपादानासंभवात् एवं सामान्यलक्षणस्याव्याप्तेः यथाविवक्षितेन तद्विषयकनिश्चयत्वस्यापि
अनुमितिप्रतिबंधकताशून्यपक्षधर्मिकहेतुमत्तानिश्चयकालीनज्ञानावृत्तित्वेन तत्र जातिव्याप्तिवारकतया
तत्साधकात् सामान्यलक्षणस्यापि संगमाच्च अत्र वदंतीत्यादि निष्कृष्टकाले पक्षवृत्तित्वासहितो ह्रद
पस्य स्वविषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्ये उभयाभाववत्त्वात् सामान्यलक्षणाक्रांतत्ववि

पोषणालक्षणाक्रांतत्वं च तिर्यवहति हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानानंतरं हेतुमात्रसाध्यवा
मित्यनाहार्यज्ञानस्य कदाप्यनुदयात् एतादृशविशेषणप्रक्षेपे फलकृतः संमतिमाहवक्ष्यतीति नन्वेवं हेतुनि
ष्टसाध्यसामानाधिकरण्यात्यंताभावः तद्वद्भेदः साध्यनिष्ठहेतुसामानाधिकरण्याभावादिः साध्यसामानाधि-
करण्यविशिष्टसाधनादिरूपविविधविरोधानामेकस्य भेदनिवेशेऽन्यत्रातिव्याप्तिरुक्तैवेवं साध्यसामानाधि
करण्यविशिष्टसाधनादिरूपविरोधभेदनिवेशे साध्याभाववद्वृत्तित्वविशिष्टसाधनादिरूपविरुद्धस्थलीयव्यभिचा
रस्यासंग्रहः गोत्ववद्वृत्तित्वविशिष्टाश्वत्वादितो गोत्वाभाववद्वृत्तित्वादिविशिष्टाश्वत्वादेरनतिरिक्तत्वादित्यत-
आह हेत्विति हेतुतावच्छेदकावच्छिन्नधर्मिकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यप्रकारकज्ञानविरो-
धार्थकमित्यर्थः तेन विरोधग्रहदशायामपि ज्ञानं तेन साध्यहेतुविषयकपरसामानाधिकरण्यग्रहान्यतावा-
पि न क्षतिः नवा हृतिहेतुकस्थले न तु उभयसामानाधिकरण्याप्रसिध्यातस्थलीयासाधारण्यासंग्रहः सामानाधि
करण्येऽपि साध्यतावच्छेदकावच्छिन्नीयत्वं वैलक्षण्यमेव न तद्वा स्वत्वं तेन नाहृतिसाध्यकासाधारण्यासंग्रहः ग्र-
विरुद्धहेतुकस्थलीयव्यभिचारलक्षणे चैतद्विशेषणमनुपादेयमेव तेन तत्र हेतुसाध्यसामानाधिकरण्यग्रहवि
रोधप्रसिद्धावपि न क्षतिः वस्तुतस्तु तादृशसामानाधिकरण्यग्रहत्वन्यूनवृत्तित्वस्यैवात्र मितिविरोधित्वघटका
नुमितिनिष्ठप्रतिबध्यतायां निवेशनीयतया धूमवान्वह्नेरित्यादौ सामानाधिकरण्यग्रहविरोधितोऽप्रसिद्धा
वपि न क्षतिः केचित्तु स्वत्वं तत्स्वविशिष्टहेतौ विशिष्टपक्षवृत्तित्वग्रहाविरोधित्वमेवार्थं वर्णयंतो वाधादिवारणा-
यपंथानमन्यमेवाश्रयंते तन्मतमादियंनिसंबंधपदेति प्रकृतहेतुसंबंधितया विरोधित्वे प्रकृतहेतुतावच्छे
दकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वमनुमितिप्रतिबंधकतावच्छे-

गदा दकं तद्रूपावच्छिन्नत्वे यत्किंचिद्रूपावच्छिन्नहेतुविशेष्यतानिवेशे द्रव्यं वह्निमद्धूमादिमादौ पक्षतावच्छेदेन सा-
२६ ध्यसिद्धावुद्देश्यायां द्रव्यत्वाद्यवच्छिन्नधूमादिविशेष्यतानिरूपितसाध्याभावादिप्रकारताशालीनिश्चयत्वस्यानु-
मितिप्रतिबंधकतावच्छेदकत्वात्तत्साध्याभावादिवारणासंभव इत्यतः प्रकृतेति प्रकृतहेतुतावच्छेदकावच्छि-
19 न्नेत्यर्थकं अथैव हेतुत्वं चघटितसाध्याभाववद्वृत्तित्वादिकमेव व्यभिचारः स्यात्तन्न चेष्टापत्तिः तस्य सामान्यलक्षणा-
नाक्रांतत्वात् हेतुतावच्छेदकावच्छिन्नहेतुनिष्ठत्वस्य विरोधिविशेषणत्वोपगमेनैतादृशानि प्रसंगवारणेपि साध्या-
भाववद्वृत्तित्वविशिष्टसाधनादेः साध्याभाववन्निष्ठसाधनसामानाधिकरण्यादेश्चासंग्रहः न च हेतुतावच्छेद-
कावच्छिन्नघटितत्वे सति विरोधित्वमेव प्रकृतहेतुसंबंधितया विरोधित्वं तच्च विशेषणविशेष्यभावभेदभिन्न-
सकलव्यभिचारसाधारणमेवेति वाच्यं तथा सति ह्रदो वह्निमान् अभावादित्यादौ वह्न्यभाववद्ध्रदादिरूपबा-
धादौ गगनवान् अभावादित्यादौ गगनवान् अभावादित्यादौ अवृत्तित्ववत् गगनादिरूपव्याप्यत्वासिद्धौ चातिव्याप्तेः
मेवं व्यभिचारलक्षणस्यैतादृशरीत्या परिष्कारः अपितु व्यभिचारिलक्षणस्यैवेति न साध्याभावः निष्ठसाधनसामानाधि-
करणासंग्रहे हेतुत्वघटितसाध्याभाववद्वृत्तित्वादेः संग्रहेवा इति अथवादेरिति इष्टत्वविशेषिततादृशविरोध्येव व्यभि-
चारपदार्थः अन्यविधव्यभिचारास्तु तन्मते व्याप्यत्वासिद्धावेवांतर्भवंति तादृशविरुद्धात् प्रापणादन्यस्य प्रयोजनं स्वय-
मेव प्रकाशयिष्यते वादीत्यादिना सत्प्रतिपक्षादिपरिग्रहः तत्साध्यकतद्धेतुकानुमितिसामान्यं प्रतिहेतुसंबंधितया ७
विरोधित्वविवक्षणे तादृशबाधादिवारणासंभवात् असाध्यत्वमपेक्ष्य प्रयत्नसाध्यत्वकथनं न चैवं हेतुसंबंधितये-
त्यस्यैव वैयर्थ्यमिति वाच्यं तदनुपादाने साध्यनिष्ठावृत्तित्वरूपव्याप्यत्वासिद्धावतिप्रसंगापातात् तस्य तत्साध्यका-
नुमितिमात्रं प्रविरोधित्वात् न च तदुपादानेपि हेतुनिष्ठावृत्तित्वातिप्रसंगो दुर्वार इति वाच्यं सत्येतद्दलेनैव तद्वार-

णात् अत एव हेतुनिष्ठपक्षावृत्तित्वादेः ताहृश्यानुमितिसामान्याविरोधित्वादेव वारणे सत्यं तत्वैयर्थ्यमित्यपि
परास्तं कांचनमयवह्निमान् वह्नेरित्यादौ साध्याप्रसिद्धिवारणाय विशिष्टसाध्यग्रहाविरोधित्वविशेषणप्र
क्षेपेणैव संभवतीति हृदयं तत्त्वाधादिवारणं अत्र च व्यभिचारज्ञानस्य प्रकृतपक्षे प्रकृतसाध्यानुमित्यविरोधित
याः अनुमितिपदस्य प्रकृतपक्षे प्रकृतसाध्यप्रकृतसाध्यव्याप्यप्रकृतहेतुवैशिष्ट्यावगाहि अनुमितिपरत्वमावश्य
कं तत्र च निष्प्रयोजनकं साध्यवैशिष्ट्यावगाहित्वनिवेशनं तन्निबंधनबाधाद्यतिव्याप्तिवारकविशेषणान्तरप्रक्षेपः
प्रक्षालनाद्धीत्यादिन्यायेनापकृष्टतो ज्ञाने साध्यवैशिष्ट्यावगाहित्वविरोधिनिबाधादिवारकविशेषणं च परित्यज
तिवस्तुतस्त्विति आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिपरिग्रहः यथाश्रुते आश्रयासिद्ध्यादिवारणासंभवात् अ
सिद्धिसंकीर्णव्यभिचारसंग्रहाद्युपपत्त्यंतार्थं व्याचष्टे ताहशेति प्रथमं ताहशपदं पक्षतावच्छेदकविशिष्टेत्यर्थकं उदी
च्यं तद्धेतुतावच्छेदकविशिष्टार्थकं न तु वह्निमान् हृदत्वादित्यादौ हेतुनिष्ठसाध्यसामानाधिकरण्यासंग्रहः तज्ज्ञान
स्य साध्याभावकपक्षतावच्छेदकविशिष्टे हेतुमत्ताग्रहविरोधित्वात् तत्राह तानयेति अनुमितिकारणीभूतव्याप्तिः पक्ष
धर्मतयाख्याता नं न तथा च पक्षधर्मताज्ञानाविरोधित्वकथनेन परिशेषात् व्याप्तिग्रहविरोधित्वमेव लभ्यत इति भावः
नन्वेतत् साध्यसाधनयोरप्रसिद्धावतिव्यापकं अन्योन्यान्यताभावगर्भव्याप्त्यारेकतरोपादानेऽन्यतरासंग्राहकं साध्या
व्यभिचरितत्वविशिष्टसाध्यसामानाधिकरण्याभावरूपव्याप्यत्वासिद्धावतिव्यापकं चेत्यत आह विवेचयिष्यत इति वि
शिष्टसाध्यसाधनग्रहाविरोधित्वनिवेशपसाध्याप्रसिध्यादिकं वारयिष्यते इदं द्रव्यं द्रव्यत्वाव्यभिचारिसत्वादित्यादौ वि
शिष्टसाधनग्रहविरोधिव्यभिचारोऽसिद्धपवांतर्भावनीयः समूहालंबनात्मकनानाविधव्याप्तिज्ञानमादायान्यतान्यो
न्याभावगर्भविविधव्यभिचारासंग्रहोऽप्यंते वास्य भावो व्यभिचार एवांतर्भावयिष्यते तस्य च बहिर्भावनीयत्वे विशकालि

मवा० तयोरेवाव्यभिचारसामानाधिकरण्ययोर्ज्ञानमुपादेयमिति न कस्यचिदपि देहस्यावकाश इति भावः ननु सपक्षवृत्तित्व
ज्ञानस्यानुमित्याद्यविरोधितया सपक्षवृत्तित्वज्ञानस्यानुमित्यादिविरोधित्वोक्तिर्न संगच्छते नच विपक्षवृत्तित्वज्ञानस्यानु
२० मितिप्रतिबंधकतया तद्घटितव्याप्यत्वानुमितिविरोधित्वमक्षतमेवेति वाच्यं तथासत्यपि विपक्षवृत्तित्वमवश्यापि
तथात्वे तदादायैव लक्षणगमनसंभवे विशिष्टमादाय लक्षणसंगमनस्यानुचितत्वात् विपक्षवृत्तित्वमात्रस्यानुतथा
त्वात् तदादाय विरुद्धे ऽतिव्याप्तेरप्रसक्तेर्विरुद्धापीत्याद्यग्रिमग्रंथासंगतेश्चेत्यत आह सपक्षेतीति तथा च विपक्षवृत्ति
त्वमात्रं विवक्षितमिति भावः अत एव सपक्षवृत्तित्वस्याविवक्षितत्वादेव मूले पक्षदज्ञानं इति दर्शितविधयोक्तं तथा
च एतादृशानुगतधर्मो ज्ञानदशायामिव पक्षज्ञानदशायामपि अवश्यकल्प्यप्रतिबंधकताकप्रत्येकज्ञानस्यैव दोषत्वा
त् अनुमित्यनुत्पादप्रयोजकत्वात् इत्यर्थः तथा चानुगतधर्मज्ञानदशायां प्रत्येकज्ञानस्यासत्वे ऽनुमितिरिष्टैव तत्तत्वे
न तत्र वानुमित्यनुत्पाद इति तज्ज्ञानस्य प्रतिबंधकतायामप्रामाणिकत्वात् तस्य विभाजकत्वमिति भावः व्यर्थविशे
षणत्वादिति मूले विशेषणपदस्य अनुमितिविरोधरूपविशेषणपरत्वेन संभवति तदनुपादाने सद्धेतौ व्यभिचारात्
अतो व्याचष्टे विशेषणमिति स्वरूपासिद्धहेतोरप्यसाधकतया तत्र व्यभिचाराप्रसक्तेरुक्त द्वारकं विशेषणं व्यर्थमे
वेति भावः सद्धेतोः साध्यव्याप्यतया तत्रातिव्याप्त्यप्रसक्तेः हेत्वाभासपदं व्यर्थमित्याशंकानिराचिकीर्षुर्दोषलक्ष
णे ऽसिद्धिविशेषात्मकाव्याप्तित्वातिव्याप्तिवारकतात्पर्यकीर्तनेन दर्थमाह हेत्वादिति दृष्टाविशेषे व्याप्यविरुद्ध ३०
योरप्यसाधारणत्वात् तयोः प्रत्येकं यथाश्रुतलक्षणघटकदलद्वयविरहादव्याप्तिः एवं हेत्वाभासपदस्य वृत्तिमदर्थ
कत्वे हेत्वन्तरेऽपि साध्यतद्भाववद्धावृत्तित्वेनासाधारणतया तत्राव्याप्तिरतः पर्यवसितार्थमाह एवं चेति ननु साध्या०
भाववद्वृत्तित्वे साधारण्यं साध्यवद्वृत्तित्वं चासाधारण्यं तच्च साध्यव्याप्तिग्रहरूपविरोधिनत्त्व साध्याभावव्याप्तिग्रहे पी०

तिवार्यं तत्संग्रहः स्यादित्यत आह साध्येति साध्यतदभाववद्वृत्तित्वस्य वृत्तिमत्त्वविरहतया तज्ज्ञानं वृत्तिमत्त्वग्रह-
प्रतिबंधकमित्यभिप्रेत्य निश्चितेति तच्च तादृशोसाधारण्यमसाधारण्यं वा व्याप्तिर्द्वैवेति साध्यव्याप्तिसाध्याभावव्या-
प्तीत्यर्थः साध्यस्य साध्याभावाभाववत्तया साध्याभावनिरूपितव्याप्तिग्रहे साध्यवद्वृत्तित्वस्य ज्ञानं प्रतिबंधकमिति त-
द्घटितस्य साधारण्यस्य साध्याभावव्याप्तिग्रहविरोधित्वं एवं साध्याभाववद्वृत्तित्वस्य ज्ञानमपि साध्याभावसामानाधि-
करण्यघटितसाध्यभावव्याप्तिग्रहे प्रतिबंधकमिति तद्घटितस्यासाधारण्यस्यापि तथात्वमिति भावः हृदयमिति
ग्रन्थस्य सूचनाय तद्बीजं तु साध्याभावत्वेन साध्यविषयकतद्वद्वृत्तित्वज्ञानस्यैव साध्याभाववद्वृत्तित्वघटितस्य सा-
ध्याभावे हेतुसमानाधिकरणाभावाप्रतियोगित्वघटितस्य वा साध्याभावव्याप्यत्वस्य ग्रहे प्रतिबंधकतया साध्यत्वाव-
च्छेदकरूपेण साध्यविषयकतद्वद्वृत्तित्वज्ञानस्य तदप्रतिबंधकत्वे निश्चितसाध्यादिमद्व्यावृत्तत्वज्ञानस्य सामाना-
धिकरण्यसामान्याभावाविषयकतया साध्यादिव्याप्तिग्रहाप्रतिबंधकत्वं चेति विशेष्यदलप्रयोजनं स्फुटयति यदि
हि विशेषवृत्तित्वरूपासिद्धिर्व्याप्यत्वासिद्धिर्वेत्यर्थः एतच्चालक्ष्यतालाभाय नत्वनिश्चयघटितस्य साध्यतदभावव-
द्व्यावृत्तत्वस्य वृत्तिमत्त्वग्रहविरोधितया एतदनंतर्भावेन साधिकहेत्वाभासत्वापत्तिरित्यत आह साध्येति यदीदृशं यदि
वृत्तिमत्त्वग्रहविरोधि वृत्तिमत्त्वग्रहे ग्राह्याभावावगाहितया तत्सामान्याभावावगाहिज्ञानमेव विरोधि नत्वेकविशे-
षाभावविशिष्टापरविशेषाभावरूपसाध्यतदभाववद्व्यावृत्तत्वज्ञानमित्यस्वरसाद्यदीति निष्कृष्टमताभिप्रायेण
हृ नोचेदिति इदमेव निश्चयघटितसाध्यतदभाववद्व्यावृत्तत्वमेव एवकारेण निश्चयघटितस्य व्यवच्छेदः नन्वत्र
साध्यादिव्याप्यत्वे यदि साध्यादिमदन्यावृत्तित्वे सति साध्यादिमद्वृत्तित्वं तदा द्वितीयलक्षणघटकभेदः साध्यवत्मात्रवृत्त्या-
दिपदस्यापि तादृशव्याप्तिमदर्थकत्वादित्यत आह व्यापकेति द्वितीयलक्षणस्यापि यथाश्रुतार्थपरत्वे सर्ववद्या।

गदा॰ ष्यविरुद्धयोर्दृष्टान्तविशेषेऽसाधारण्ययोरसंग्रह इत्यत आह रीतिरिति तत्रापि साध्यतदभाववन्मात्रवृत्तित्वग्रहविरोधि-
वृत्तिमत्त्वग्रहाविरोधिधर्मवत्त्वमेव विवक्षणीयमित्यर्थः उपाध्यायमतमाह केचित्त्विति असाधारण्याभावकालः प्र-
२६ कृतहेतुनिष्ठासाधारण्याभावस्यावच्छेदकालक्षणः तेन यदा पक्षवृत्त्यादेरसाधारण्यं तादृशलक्षणस्य घटत्वादिनिष्ठा-
साधारण्याभावावच्छेदकत्वेऽपि न क्षतिः अथ शब्दादौ साध्यसंदेहदशायां शब्दत्वादावसाधारण्यव्यवहारप्रयोजक
स्य तत्कालीनसाध्यादिनिश्चयविषयीभूतधर्मिव्यावृत्तत्वरूपासाधारण्यघटकतत्तत्कालादिविरहात् तदानीं तद्घ-
टितासाधारण्यविरहोऽसत एवेति वाच्यं प्रतियोगिकोटिप्रविष्टविशेषणसत्त्वस्याभावविशिष्टाभावाप्रयोजक-
त्वात् अन्यथा दण्डाद्यसत्त्वे दण्डविशिष्टघटाभावादेरिव दण्डविशिष्टघटाभावाद्यभावस्यापि सत्त्वप्रसंगात् यदि च प्रकृ-
तहेतुमद्विपक्षकसाध्यतदभावान्यतरनिश्चयलक्षणमेवासाधारण्याभावकालेन तेन विवक्षितं इत्युच्यते तदा शब्दो-
ऽनित्यः शब्दत्वादित्यादौ यदा कदापि साध्यस्य तदभावस्य वा निश्चयो नास्ति तदा सव्यभिचारत्वप्रसंगः तादृशकाल-
स्य प्रकृतहेतुमद्विपक्षकसाध्यादिनिश्चयस्यापि अनधिकरणत्वेन तादृशनिश्चयलक्षणावच्छिन्नसाध्यादिव्या-
प्यभावस्य हेतौ सत्त्वात् तदा चासाधारण्यघटकसाध्यादिनिश्चयासत्त्वेनासाधारण्यस्य विरहेऽपि पक्षे तद्योगात् प्रकृ-
तहेतुनिष्ठासाधारण्यघटको योगः न तदन्यलक्षणस्य विवक्षणे तथा दृष्टसाध्यकस्थले यदसाधारणस्य हेतोः कदा-
पि नासाधारण्यं तत्राव्याप्तिः प्रकृतहेतुनिष्ठासाधारण्यस्याप्रसिद्धेः मैवं तत्तत्कालावच्छिन्नत्वविशिष्टस्य तत्तत्काली-
नसाध्यादिनिश्चयविषयव्यावृत्तत्वरूपासाधारण्यस्य प्रकृतहेतुनिष्ठाभावावच्छेदककालस्यैवासाधारण्याभावकालः
हेतुमति साध्यापि निश्चयदशायां कालान्तरावच्छिन्नस्य कालान्तरघटितासाधारण्यस्याभावकूटी हेतौ सत्त्वमेवा-
पादृशासाधारण्यहेतोः कदापि नासाधारण्यं तत्राप्यनेनागगनादिनिष्ठप्रकृतसाध्यकासाधारण्यस्याभावः प्रसिद्ध एव

तिनदोषः अथवा प्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयवत्त्वोभयाभाववान् लक्षणघटकासाधार-
णाभावकालत्वनेन विवक्षितः शब्दो नित्यः शब्दत्वादित्यादौ पक्षे कदापि न साध्यस्य तदभावस्य वा निश्चयः न
त्वेणे प्रकृतहेतुमद्विशेष्यकसाध्यतदभावनिश्चयवत्त्वाभावेनोभयाभावोऽसत्त्वेपितदानसव्यभिचारताप्र-
संगः प्रकृतहेतुनिष्ठासाधारण्यघटकोयोयलक्ष्यलक्षणघटकविवक्षणीयः यत्साध्यकस्थले यस्यासाधारण्यस्य
हेतोः कदाचिदपि नासाधारण्यं तत्साध्यकस्थलीयलक्षणेऽसाधारण्याभावकालावच्छिन्नत्वनोपादेयमेव।
साध्यसाधनभेदेन लक्षणभेदादित्यपि केचित् विशेषणाभावात् असाधारण्याभावकालावच्छिन्नत्वघटप-
ष्ट्यासिद्धयस्य विशेषणांतदभावात् संग्रहः तादृशविशेषणविशिष्टव्यासिद्धयस्याभाववत्त्वे एतन्मते च सर्वल-
क्षणेसाध्याभाववद्वृत्तित्वघटितायाउक्तत्वञ्च तद्भिन्नान्यावृत्तित्वघटितायाव्याप्तेरत्रप्रवेशात् नलक्षणयोर्भेदः
स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरभावस्यनिवेशेपितन्मपाक्यः तादृशव्याप्तेः स्वघटिततयाहेतुभेदेनभे-
दात् साधारणहेतुकस्थले तदप्रसिध्याऽभावाः संग्रहात्पिशेषमाणव्याख्यायांवतादृशव्याप्तेरप्रसिद्धावपित-
द्घटकपदार्थानांपरस्परोपश्लेषावगाहिज्ञानविरोधितायाएवनिवेशेनाऽनुपपत्त्यभावात् व्यापकसामानाधिक-
रण्यपिहव्याप्यत्वभिन्नत्वात् एवमेतन्मते दुष्टलक्षणपरएवायंग्रंथोनतद्दोषलक्षणपरोपितादृशव्यासिद्धप-
क्षान्यत्वस्य सव्यभिचारपदार्थत्वाभावात् इत्यवधेयं तद्भिन्नमिति चिंताबीजं चासाधारण्यपारीरेतन्नलक्षणीयनि-
५५ श्चयेनिवेशस्यावश्यकतयासामान्यलक्षणस्यप्रकृतविशेषनियंत्रितत्वेन चेष्टापत्तिः तथासति साधारणहेतौ
वप्यसाधारणहेतोरिवाम्रकं प्रत्ययव्यभिचारीतिव्यवहारप्रसंगात् एवं सव्यभिचारपदस्यपारिभाषिकत्वम-
पि तथेति इतरभेदानुमाने वैयर्थ्यसंभवेऽसाधकतानुमाने वैयर्थ्यापरपर्यायव्यर्थविशेषणत्वादिति मूलव्या

गदा०

ख्यानमनुचितमिति आशयेनेतरभेदानुमाने वैयर्थ्यपरतयैव मूलं व्याचष्टे व्यर्थेतीति साध्याभावेत्यादीति सा
ध्याभावव्याप्तिग्रहाविरोधित्वं वृत्तिमत्त्वग्रहाविरोधित्वं चेत्यर्थः तस्याविरोधादेः पार्थिवत्वे व्यभिचारपदार्थवह्निर्भू
२२ तत्वे मानाभावादिति तथाच विरोधादावपि व्यभिचारपदार्थरूपपक्षेतरभेदसत्त्वेन तद्भावनैकविशेषणानव॰
च्छिन्नस्यैवेतरभेदानुमापकत्वसंभवादिति भावः हेत्वाभासपदस्य यथाव्याख्यानाद् उक्तहेतुत्वरूपहेत्वाभा॰
सत्वस्य लक्षणाघटकत्वान्न्यूनत्वमित्यादिदूषणस्यासंगतिः एवं गगनमनित्यं शब्दाश्रयत्वादित्यादौ हेतोः सा
ध्याभावव्याप्यत्वेपि साध्याभावव्याप्तिग्रहविधिदर्शितधर्मवत्त्वमक्षतमेवेति तत्र व्याप्तिज्ञानमप्यसंगतमित्य
तो यथाश्रुतार्थेनाह दूषणे दूषणं संगमयति प्रथमेति एकमात्रसपक्षविपक्षस्थले सर्वसपक्षाप्रसिद्धिरिता
शेष्यं व्याचष्टे सपक्षेति सपक्षवृत्तित्वावच्छिन्नाभावो विपक्षवृत्तित्वावच्छिन्नाभावश्चेत्यर्थः सर्वेत
द्व्यावृत्तत्वं सर्वसपक्षव्यावृत्तत्वपदार्थः तावतैव यत्किंचित्सपक्षविपक्षव्यावृत्तयोर्व्याप्यविरुद्धयोरिति शब्दो
नेति व्यानूपपैव वैयर्थ्यपरतां व्यर्थविशेषणत्वादिति मूलस्याह सपक्षेति व्याप्यविरुद्धयोरिति शब्दोऽनित्यः शब्दत्वा
दित्यादौ व्याप्यस्य हेतोः साध्यवन्मात्रवृत्तित्वेपि पक्षेपि वृत्तेः पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वमक्षतमेव एवं
शब्दो नित्यः शब्दत्वादित्यत्र विरुद्धस्य हेतोः साध्याभाववन्मात्रवृत्तित्वेपि पक्षे वृत्तेः पक्षातिरिक्तसाध्याभाववन् ३३
मात्रवृत्तित्वेपि पक्षे वृत्तेः पक्षातिरिक्तसाध्याभाववन्मात्रवृत्त्यन्यत्वमक्षतमेवेति द्वयोः संग्रह इति भावः पक्षाति
रिक्तेत्यत्र पक्षपदस्य तत्तद्धर्मिमात्रपरत्वे पक्षे साध्यतदभावान्यतरनिश्चयदशायां शब्दो नित्यः शब्दत्वादित्यत्रा
तिव्याप्तिः सिद्ध्यभावरूपपक्षताविशिष्टपरत्वे पक्षे सिद्धिदशायां तत्र विशिष्टानतिरिक्तत्वसत्त्वापगमात् ।
श्रुतिरिक्तानस्य पक्षताशून्यपरत्वोपगमाद्धा ऽतिप्रसंगवारणसंभवेपि शब्दोऽनित्यः शब्दत्वादित्यादौ वायनि॰

स्वघटश्चायामतिप्रसंगोऽद्वितीयत्वसिद्धिर्वा यान्यतराभाववद्वृत्तिपक्षतावच्छेदकगोत्वमतः संपुष्टवृत्तिपक्ष-
तापरत्वया व्याख्यावश्ये पक्षत्वमिति संदिग्धसाध्यकत्वे साध्यभेदहेतुविशिष्टत्वकाल्लां तेन तेषां संशयसंशयवृत्तिवि-
शेषणासत्त्वदशायो न हेतुविशिष्टभेद उपगम्यते अतिरिक्तां तेवा पक्षताश्रुत्यपरे अतः साध्यादिनिश्चयदशायां
नातिप्रसंगः गृहीतपक्षे साध्यतदभाववत्त्वेनानिश्चयः नापि संशयः तदा शब्दो नित्यः शब्दत्वादित्यादेर्नासाधा-
रणानैकान्तिकत्वं तत्र यथायथ्ये सम्यक्त्वं विरुद्धत्वं चेति नाव्याप्तिप्रसंग इति भावः पक्षातिरिक्तवृत्तिः यत्साध्यत-
दभाववत्मात्रवृत्तित्वदन्यतरत्वार्थकत्वे वह्निमान्धूमादित्यादौ नातिव्याप्तिसंभवः भेदप्रतियोगितावच्छेदक-
दलद्वयस्यैव तत्र सत्वेन तत्र विशिष्टभेदासत्त्वात् अतः पक्षातिरिक्तत्वस्य साध्यादिपदद्विशेषणत्वाभिप्रायकतया मूले
संगमयति धूमेत्यादीति यथाश्रुते पक्षातिरिक्तो यः साध्यादिमांस्तमात्रवृत्तिभिन्नमित्यर्थे सप्तमीसमासादि-
त्यर्थे तन्न दूषणमिति योजना सप्तमीसमासलभ्यैतादृशार्थेन दूषणमित्यर्थः [सप्तमीसमासादित्यर्थे तन्न]
हेतौ धूमवान्वह्नेरित्यादिसाधारणे शब्दो नित्यः शब्दत्वादित्याद्यसाधारणे यथाश्रुतलक्षणस्याव्याप्तिर्वा च
पक्षे वृत्तीत्यादीति पक्षवृत्तित्वस्य साध्यसामानाधिकरण्यस्य च यो ग्रहस्तदविरोधीत्यर्थः अत्रामित्यौपयिक-
स्येति समासेन लिङ्गजनकज्ञानविषयस्येत्यस्य सम्यग्ह्यायव्याख्यानत्वात्तामेव संभवतीत्यतो व्यासेन लिङ्ग-
नेसपक्षसत्त्वादेर्नानुमितिजनकत्वेऽप्यनुमितिज्ञानस्यैव तत्वौपयिकपदस्य जनकार्थकत्वे न संभवतीति तद्व्याच-
ष्टे जनकज्ञानविषयस्येति सपक्षसत्त्वादेरित्यादिना विपक्षासत्त्वपरिग्रहस्तेन द्रव्यं सत्त्वादित्यादौ सपक्षस-
५३ पक्षसत्त्वाभावासत्त्वेऽपि विपक्षसत्त्वादेव लक्षणसमन्वयः नन्वेवं असाधारण्ये व्याप्तिः तस्य पक्षव्यावृत्तत्व-
घटितत्वया साध्यवद्वृत्तित्वग्रहविरोधित्वादित्यत आह सपक्षविपक्षव्यावृत्तत्वस्य चेति चकारार्थे सपक्षत्वं

गदा०

२३

23

निश्चितसाध्यवत्त्वं पक्षे पक्षतान्तर्भावेन तस्यासाधारण्यतज्ज्ञानविरोधित्वं साध्यसामानाधिकरण्यज्ञानविरोधि-
त्वं साध्यवद्वृत्तित्वसामान्याभावज्ञानमेव साध्यसामानाधिकरण्यसामान्यज्ञानविरोधि न तु तद्विशेषाभावात्म-
कसपक्षव्यावृत्तत्वज्ञानमपीति भावः अथान्वयिविरुद्धहेत्वोर्यथालक्षणं तदा सपक्षवृत्तित्वाद्यभावादिकमादा-
य सर्वेषु तेष्वतिव्याप्तिः तेषां लक्षणे साध्यसामानाधिकरण्यग्रहाविरोधित्वोपादानमनर्थकमेवेति चेन्न उक्त-
हेतुत्रलक्षणे विरुद्धालक्ष्यापत्त्या उक्तविशेषणोपादाने च दोषलक्षणे विरोधातिव्याप्तिवारणायैवासपक्षविपक्ष-
व्यावृत्तत्वस्यासाधारण्यस्य तत्र विपक्षपदं सार्थकमेवेत्यवधेयं अत्र च यद्रूपविशिष्टविषयकत्वेनानुमितिज-
नता तद्रूपावच्छिन्नाभाव एव दोषपदविवक्षणीयः अन्यथा सपक्षसत्त्वादेर्हेतुत्वाद्यवच्छिन्नाभावमादायातिप्रसंगा-
यापत्तेः एवं च निश्चितसाध्यवद्वृत्तित्वत्वावच्छिन्नाभावसंग्रहः निश्चयांशोपादानस्थानमित्यहेतुत्वयात्
त्रुटिततादृशधर्मविशिष्टविषयतावत्त्वेनानुमितिजनकत्वाभावात् येन केनापि रूपेणाश्रयनिरू-
पिताया विषयतायास्तत्त्वेन कत्ताविवक्षणे वह्नित्वाद्यवच्छिन्नाभाववारणमशक्यमेवेति दूषणमशक्यमेवे-
ति दूषणमशक्यसमाधानमित्यवधेयं उपदर्शितसाधारणासाधारणयोः संग्रहाय मिश्रा अन्यथैव लक्ष-
णं व्याचक्षुः तदुपन्यस्यति पक्षवृत्त्याविति पक्षावृत्तित्वान पक्षवृत्तौ विरोधस्थानविरुद्धभिन्नेवर्तत इति न- ३३
पर्वतो वह्निमान् महानसत्वात् ह्रदत्वाद्धेत्वाद्योः स्वरूपासिद्धविरुद्धयोरतिव्याप्तिः सपक्षविपक्षवृत्तित्वे-
तद्व्यावृत्तत्वं च पक्षवृत्तौ विरुद्धभिन्ने वर्तत इति तद्दोषोपदर्शितसाधारणयोः संग्रहः पक्षत्वाल्पेपि एवं-
वह्निरुद्धालक्ष्यापत्त्या विरोधस्य व्यभिचारतावारणाय विरुद्धान्यत्वोपादानमित्यवधेयं अत्र च हेतुतावा-
च्छेदकसंबंधेन पक्षवृत्तित्वविवक्षणमावश्यकं अन्यथा हेतुतावच्छेदकसंबंधेन पक्षावृत्तेरपि येन केनचि-

त्संबंधेन पक्षवृत्तितया स्वरूपासिद्धेरपि पक्षवृत्तिवृत्तितया तद्वारणासंभवात् एवं च हेतुतावच्छेदकसंबंधेन
पक्षवृत्तित्वं यत्र प्रसिद्धं तादृशव्याप्यभिचरितव्याप्तिः एवं गगने साध्यनिश्चयदशायां घटः शब्दवान् घटत्वादित्या
दाव साधारणेऽव्याप्तिः सपक्षव्यावृत्तत्वस्य विरुद्धेऽपि वर्त्तमानत्वात् इत्यस्वरसः कोचिदित्यनेन सूचितः न
नु एवं पक्षग्रंथोक्तलक्षणावलंबनेन नासिद्धान्तप्रणयनेन संगतत्वं उक्तदोषाणां जागरूकत्वात् इत्याशंकां निराक
रोति एवोक्तेति यथामतमिति यद्यन्मतमालंब्य यल्लक्षणमभिहितं तत्तन्मते तत्र तत्र नाव्याप्तिसंभवनेत्यर्थः
तत्र साधारण्यस्यासाधारण्यस्य च सपक्षव्यापकतामते प्रथमलक्षणाव्याप्तिग्रहादिविरोधितामते च तादृशाविरोधिता
घटितलक्षणं तेन विरोधित्वघटितलक्षणलक्ष्ये विरुद्धे संशयप्रयोजकस्य सपक्षवृत्तित्वघटितसाधारण्यस्य
विपक्षव्यावृत्तत्वघटितासाधारण्यस्य विरुद्धेऽपि प्रथमलक्षणस्य नाव्याप्तिः प्रथमलक्षणस्य नाव्याप्तिः प्रथ
मलक्षणलक्ष्ये तत्र तत्र च विरोधित्वघटितलक्षणस्यैवानातिव्याप्तिरिति भावः तेषां कोटिद्वयोपस्थापकता
वच्छेदकत्वादिरूपानुगतधर्मावच्छिन्नानां तादृशरूपाद्यात्मकलक्षणानां हेत्वाभासतावच्छेदकत्वं अत्र
मितिप्रतिबंधकतायां विषयतयाऽवच्छेदकत्वं विभागमात्रेति मात्रपदेन तु एतद्व्यवहारव्यवच्छेदः इत्थं व्यव
हारनियामकोऽनुमितिप्रतिबंधकतावच्छेदकधर्म एव विभाजक इति नियमे मानाभावादिति भावः नन्वत्र ल
क्षणे पक्षधर्मतापन्नानुमानादौ नित्यत्वादिसाधकस्थले कोटिद्वयोपस्थापकसाधारणधर्मवत्ताज्ञानविषयीभूते
५९ श्रवणकादावतिव्याप्तिरित्याशंकां निराचिकीर्षुरभिप्रायं वर्णयति संदेहमित्यादिना एवकारेण कोट्युपस्थि
तौ तादृशरूपेण हेतुताव्यवच्छेदः तादृशधर्मेति साधारणादिविशिष्टधर्मेत्यर्थः मात्रपदेन धर्मिविषयकत्व
स्य कोटिद्वयोपस्थितिजनकतावच्छेदकघटकत्वव्यवच्छेदः तथा च कोटिद्वयोपस्थितिजनकतावच्छेदकीभू

गदा॰ तावच्छेदकधर्मवत्त्वेनोक्तस्थले हृत्वकोटौ गृणत्वादिविषयतायाएव तथात्वादिति न तत्रातिव्याप्तिरिति भावः

अथैतन्मते संशये साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुतायाआवश्यकत्वात् संबंधिहृत्वादिविशेष्यकज्ञानाद्धस्ति

२४ यकारिस्वतेस्वतत्कोटिसहचरितधर्मविशेष्यकज्ञानादपि तत्कोटिस्वतेर्निर्विवादत्वात्तथा साधारणधर्मविष-

२५ यकज्ञानत्वेन कोट्युपस्थितिहेतुताया उभयवादिसिद्धत्वात् तस्मात्कोट्युपस्थितौ साधारणधर्मवद्धर्मिज्ञान

त्वेन संशयं प्रति च साधारणधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थितित्वेन हेतुत्वमिति पूर्वपक्षलक्षणोपष्टंभकम-

तापेक्षया संशयं प्रति साधारणधर्मवत्त्ववद्धर्मिज्ञानत्वेन साधारणधर्मज्ञानजन्यकोटिकोपस्थितित्वेन च हेतुता-

मतमेव सम्यक् अथास्तु कोट्युपस्थितौ साधारणधर्मज्ञानत्वेनैव हेतुता तथापि संशये धर्मिमाननियमाय त-

त्र साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुत्वसफलं कोट्युपस्थितेः संशयहेतुतायां साधारणधर्मज्ञानजन्यत्वस्था-

ने साधारणधर्मवद्धर्मिज्ञानजन्यत्वनिवेशनादेव तन्नियमोपपत्तेः स्वतंत्रकारणत्वाकल्पनापेक्षया तज्जनका-

रणतायामवच्छेदकगौरवस्यैवउचितत्वात् न च धर्मिज्ञानस्य संशये साक्षाद्धेतुतायाआपेक्षितत्वात् तत्र साधा-

रणधर्मप्रकारकत्वमात्रं निवेश्यते इति नास्माकमपि स्वतंत्रकारणताकल्पनं मानसेपि च विप्रतिवाक्याधीनसं-

शये [illegible] कोट्युविविधधर्मिणोपि पदजन्यैवोपस्थितिः कारणमिति पदजन्यत्वेन धर्मिज्ञानस्य विप्रतिवाक्याधी २१

नसंशये पृथक्कारणतायाआवश्यकत्वात्तदन्यसंशयकारणतायां साधारणधर्मावेशबाधकाभावादिति वाच्यं सं-

शयसाधारणासाधारणधर्मवद्धर्मिज्ञानहेतुताद्वयस्य तादृशधर्मज्ञानहेतुतायाः तादृशतादृशधर्मवद्धर्मिज्ञान-

जन्यकोट्युपस्थितित्वेन हेतुतायस्य च कल्पने स्फुटतरलाघवाभावात् मैवं कोट्युपस्थितिकारणतायां तत्तत्को-

टिसहचरितधर्मवद्धर्मिविशेषविषयकज्ञानजन्यत्वनिवेशाद्धर्मिभेदेन गुरुधर्मावच्छिन्नकारणतायाः आनंत्या

पत्तेः तद्रूपेत्याधर्मिविशेषमवतर्भाव्यानतत्कोटिसहचरितधर्मिज्ञानजन्यकोटकपस्थितित्वेनधर्मिभेदेनगृहधर्मा
वच्छिन्नकारणतायाः अन्नेत्यापत्तेः तद्रूपेत्याधर्मिविशेषमवतर्भाव्यतत्कोटिसहचरितधर्मिज्ञानजन्यकोट
कपस्थितित्वेनधर्मिविशेषमनंतर्भाव्यसाधारणधर्मवद्धर्मिज्ञानत्वेनचलघुशरीरेणाहेतुत्वकस्यकल्पयितुंशक्य
त्वात् नचोपस्थितिकारणतावच्छेदकशरीरेधर्मिणोऽनंतर्भावेपिकार्यतावच्छेदकीभूतसंशयत्वस्यधर्मिविषयतावचरि
तत्वात् कोटकूपस्थितेर्धर्मिभेदेनकारणताभेदस्यावश्यकइतिवाच्यं संशयत्वशरीरधर्मिविषयतायाविशेष्यतात्वे
नकिंचिद्धर्मावच्छिन्नविशेष्यतात्वेनैवकसामान्यतोनिवेशनीयतयाधर्मिभेदेनकारणताभेदानावश्यकत्वादितिदि
क् पूर्वलक्षणातिप्रसंगवारणायसाध्यसंदेहजनकत्वस्यकोट्युपस्थितिविशेषणतायाआवश्यकत्वात्तदुपस्थापकप॰
पदानुपादाननिबंधनंतदनिवेशभ्रमंनिराकरोति साध्यसंदेहेतिप्रकृतप्रकरणवशात्सामान्यशब्दविशेषपरतयाभि
मतयाचसाध्यसंदेहजनिकायासाध्योपस्थितेः तज्जनकतावच्छेदिकाऽसती तथाविधसाध्याभावोपस्थितिजनकताव
च्छेदकीभूतायाविषयतातदवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वंतत्त्वमितिपूर्वोक्तदिशालक्षणार्थोनिष्कर्षयितव्यः वह्नि
साहचर्यवज्जलाभाववद्व्यावृत्ततावच्छिन्नधूमादिविषयतायाः पूर्वोपदर्शितरीत्यातथाविधसाध्याभावोपस्थितिजन॰
कतावच्छेदकत्वेपितामादायातिप्रसंगः पूर्ववदेववारणीयः समवायादिघटितसाधारण्यमादायसंयोगादिना
धूमादेवज्जलादिसाध्यकस्यव्यभिचारितोवारणायप्रकृतहेतुतावच्छेदकसंबंधेनयत्साध्यवद्वृत्तित्वंसाध्याभाव
वद्वृत्तित्वंचतद्घटितत्वेनविषयतावच्छेदकधर्मोविवक्षणीयः अत्रसाधारण्यशरीरेप्यभावप्रतियोगितयातेनसं
५८ बंधेनसाध्यादिमद्वृत्तित्वंनिवेश्यंनतुतदंशग्रहः साधारणधर्मवद्धर्मिज्ञानसत्वेऽद्बोधकांतराधीनकोटिस्मरणाद॰
नुभवात्मककोट्युपस्थितेस्संशयोपगमेत्यतिविरहाद्विशेषणाज्ञानादिप्रयुक्त्याकोट्युपस्थितिहेतुतयैवोप

गदा॰ पतेः साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन स्वतंत्रहेतुताकल्पनमनर्थकमिति व्याख्यातकल्पे साध्यसंदेहजन
कत्वरूपकोट्युपस्थितिविशेषणस्य व्यावर्तकतया विलक्षणजनकताया असत्वेन निवेशनासंभवादित्यतिप्रसंगो
२५ दुर्वार एवेत्यभिप्रेत्य तादृशानिष्कृष्टमते प्रकारांतरेण लक्षणं व्याचष्टे यथाकथंचिदिति । साधारणधर्मज्ञानजन्या
नतज्जन्या वेत्यर्थः विशेषणतानादिमद्व्यावृत्तप्रकारणतातएव निर्वाहो न तत्स्वातंत्र्येण तद्धेतुत्वमिति सूचयितुं
स्तत्यनुभवसाधारणीति नन्वेवं साधारण्यादिविशिष्टधर्मवता ज्ञानशून्यकाले कथं न संशय इत्यत आह नियाम
कमिति नियामकं तादृशधर्मदर्शनदशायामेव संशय इति नियमनिर्वाहकं साधारण्यादीनामस्मात्साक्षात्संशयहेतुभू
तमित्यादिः आदिपदादसाधारण्यपरिग्रहः अतएवानुभवसाधारण्याः कोट्युपस्थितेर्हेतुत्वादेवा धारावाहिसंदेहः
अविरलक्रमोत्पन्नसंदेहश्रेणितयादिकं साधारणादिधर्मज्ञानजन्यकोट्युपस्थितित्वेन संशयहेतुत्वे स्मरणात्मककोट्यु
पस्थितेरेवनयात्वात् साधारणधर्मविषयकज्ञानजन्यकोपस्थित्या संशयद्वयजननसंभवेपि संशयांतरोत्पत्तौ तथा
विधस्मरणात्मकोपस्थित्यंतरस्यापेक्षणीयतया तस्याः विरललग्नं संशयश्रेणितयादिकं नोपपद्यते एतन्मते तु संशया
त्मककोट्युपस्थितेरादेरपि संशयांतरोत्पादसंभवेनांतराकोटिस्मरणानपेक्षणात्साधारणधर्मवद्धर्मिविषयकाद्वि
तीयादिसंशयात्तदग्रिमक्षणे संशयांतरोत्पादे बाधकाभावः नचास्मिन्मतेपि संशयात्मककोटिज्ञानस्यापि सा॰
धारणधर्मज्ञानजन्यतया तदाकोटिस्मृतिं विनैव संशयांतरोत्पादः संभवतीति वाच्यं अवच्छेदकभेदभिन्नैकैः स्मृति॰ ३५
संशयनिष्ठतादृशज्ञानजन्यतयोरनुगततया स्मृतिनिष्ठजन्यताया एव निवेशनीयतास्मरणापेक्षाया आवश्यक
त्वादिति भावः स्वसमानाधिकरणावच्छिन्नत्वव्यवहितोत्तरत्वसंबंधेन साधारणधर्मज्ञानविशिष्टोपस्थितित्वेन
हेतुत्वोपगमे संशयादपि संशयः संभवतीति गौरवमेवोपस्थितेः स्वतंत्रहेतुताया बाधकमित्यवधेयं धर्मितावच्छेदके

ति धूमवान्पर्वतो वह्निमान्नवेति संशये धर्मितावच्छेदकप्रकारकज्ञानमुद्दयापर्वतत्वाद्यवच्छिन्नविशेष्यक
धूमत्वादिविशिष्टताज्ञानस्यजनकतयाधूम्यत्वादिमत्वमाद्यायातिप्रसंगवारणाय धर्मितावच्छेदकेनिधर्मिताव
च्छेदकपदं फलीभूतसंशयधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मपरं यव्याप्यपर्वतत्वादेरपितद्दर्शितसंशयधर्मि
तावच्छेदकतयाज्ञातिप्रसंगवारणासंभवात् एवंचतदुभयपर्याप्तधर्मितावच्छेदकताकयत्किंचित्संशयनिरू
पितायांजनकतायामवच्छेदकीभूतायांतत्तद्धर्मनिष्ठधर्मितावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छे
दकतापर्याप्त्यधिकरणधर्मवत्त्वमितिनिष्कृष्टोऽर्थः पर्यवसितः तेन स्वतावान्नजातेरित्यादेः सत्ताभावव
त्समवेतत्वाप्रसिद्ध्यायद्रूपपदेन सत्तावत्समवेतत्वमात्रोपादानसत्त्वमात्रोपादानसंभवेनातिव्याप्तिरिति निरस्तं व
क्ष्यव्याख्येयं एवंच मूलस्थ उभयकोट्युपस्थापकपदं संशयकार्यकमित्यभिप्रायः मूलग्रंथस्यनिष्कृष्टमतेदो
तद्योगेवेतल्लक्षणमितिकेचित् प्राचीनास्तु साधारणधर्मावच्छिन्नप्रकारताशालिज्ञानत्वेन संशयजनकता।
ग्रहपत्वतदभावसहचरितत्वेनयदाविज्ञानस्यादित्यादेरूर्ध्वत्वत्वादिमात्रेणज्ञानादप्ययंपुरुषोनवेतिसंशयात् किं
त्वन्नहुद्दुसंस्कारान्यसाधारणादिप्रकारकविशिष्टधर्मिज्ञानत्वेनैवसाधारणादिप्रकारकत्वंचसंस्कारज्ञान
साधारणं अतस्तत्प्रकारकज्ञानासत्वेपितज्जन्यतथाविधसंस्कारविशिष्टोद्बोधकत्वादि ज्ञानात्संशयनिर्वाहः
वैशिष्ट्यंचस्वविशेष्यतावच्छेदकावच्छिन्नप्रकारकत्वस्वसमानाधिकरण्योभयसंबंधेनतेनएकधर्मावच्छिन्न
विशेष्यकसाधारणादिप्रकारज्ञानसाहित्यात्तत्प्रथमधर्मावच्छिन्नप्रकारकधर्मिज्ञानात्ननसंशयः ईदृशायतिवा
रणायैवएकविशिष्टापरस्यहेतुत्वनास्वीक्रियतेनतूभयोःपृथक्कारणता॰ एकविशिष्टापरत्वेनहेतुत्वेविशे
ष्यविशेषणभावेविनिगमनाविरहेणकारणताद्वयमात्रपृथक्कारणतामतेतुएकधर्मावच्छिन्नविशेष्यक।

साधारण्यादिप्रकारकज्ञानादिसहित अन्यधर्मावच्छिन्नप्रकारकधर्मिज्ञानात् संशयापत्तेः तत्र तद्धर्मावच्छिन्न
विशेषकसाधारण्यादिप्रकारकत्वेन तत्तद्धर्मावच्छिन्नप्रकारकधर्मिज्ञानत्वेन वा हेतुताकल्पनमंतरेण दुर्वारतया
तादृशहेतुतास्वीकारे ऊर्ध्वत्ववत्त्वादिरूपविषयतावच्छिन्नप्रकारतायाश्चानंत्यस्यादिति वदंति तन्मते यथाख्या-
ख्यातलक्षणे ऊर्द्धधूमत्वावच्छिन्नप्रकारतायाः अपि वक्ष्यादिसंदेहजनकतावच्छेदकत्वात् ऊर्द्धधूमत्वा-
दिकमादायातिप्रसंगवारणमशक्यमिति तन्मते कल्पनांतरमाह कोटिद्वयेति ऊर्ध्वत्ववत्त्वादिनेत्यस्य केवले-
नेत्यादिः तदानींसंशयप्राक्काले यद्रूपेति यद्रूपप्रकारकविशिष्टत्वेन यत्किंचित्संशयजनकतातद्रूपवत्त्व-
मित्यर्थः यत्किंचित्संशयजनकतावच्छेदकतावच्छेदकत्वनिरूपितायाः निरूपकत्वसंसर्गावच्छिन्नावच्छेदकता
तद्व्याश्रयविषयतापर्याप्त्यधिकरणधर्मवत्त्वमिति यत्किंचित्संशयजनकतावच्छेदकवैशिष्ट्यघटकविशेष्य-
तानिरूपितप्रकारतापर्याप्त्यधिकरणधर्मवत्त्वमिति वा पर्यवसितोऽर्थः तच्चेत्यादिमूलग्रंथः साधारणसाधा-
रणरूपसंशयप्रयोजकरूपमादाय लक्षणसंगमनपरः तत्र यादृशसाधारणस्य संशयप्रयोजकत्वं विवादसं-
हेतत्तत्पक्षे साधारणमिति शेषेण लक्षणेन समस्यापि यत्नं तादृशग्रंथेऽवधारयति तच्चेत्यादीति असाधारणसंश-
यप्रयोजकीभूतासाधारणपदार्थः वृत्तिमत्त्वेति तथा च शब्दो नित्यः शब्दत्वादित्यादावसाधारणे अव्याप्तिरिति-
भावः ननु वृत्तिमत्त्वेनासाधारणपदस्य पर्यंतं व्यर्थं किंत्ववृत्तेरेवेति नैतद्दोषावकाश इत्यत आह एककोटीति व्या-
प्यस्य व्याप्यतया गृहीतस्याव्यावृत्तस्य व्यावृत्तत्वेन गृहीतस्य एतेनैककोटिमद्व्यावृत्तस्यैककोटिव्याप्यतया आ- ३४
वश्यकत्वेपि न भेदघटितेत्यर्थासंगतिः तद्वद्वृत्तित्ववतत्तदभाववत्त्वेन तस्यानिवेशात् इत्यवधेयं विशेषदर्शन-
तयाविरोधित्वादिति पृथक्त्वाभाववद्वृत्तिकत्वादिमानयमित्याकारकनिश्चयदशायामिव पृथग्वृत्तिषा

त्वादिमांनित्यादिना स्वयं दर्शयामपि प्रकृतघटत्वादिविशिष्टबुद्धेरनुव्यवसायस्य सर्वानुभवसिद्धत्वात्तद्विशिष्टबुद्धौ
तद्वद्वृत्तित्वेन गृहीतधर्मवत्ताज्ञानस्य प्रतिबंधकतायाश्च व्यापकत्वादिति भावः तथा च निरुक्तासाधारण्य
विशिष्टधर्मवत्ताज्ञानस्य संशयप्रतिबंधकतया संशयजनकत्वासंभवात्कथं तादृशासाधारण्यस्य संशयप्रयोजक
त्वं नव तादृशज्ञानस्य संशयप्रतिबंधकत्वेपि तज्जन्यकोट्युपस्थितेः संशयजनकत्वं संभवत्येव तत्राप्यानंतं तज
न्यकोट्युपस्थित्या संशयजननसंभवात् असाधारण्यधर्मवद्धर्मिज्ञानस्य तत्प्रत्यवायकत्वात् साक्षाद्धेतुत्वासंभवे
न तज्जन्यकोट्युपस्थितिद्वारेण हेतुतायां गौरवस्याकिंचित्करत्वात् इति तादृशकार्यकारणभावघटितलक्षणपर
तयैवं मूलं व्याख्येयमिति वाच्यं अग्रे किंचित्यादिना वाच्यस्यासाधारण्यस्य बुद्धेः संशयाविरोधितया तज्ज्ञानस्यैव सा
क्षात्संशयजनकत्वसंभवेन गौरवाद्युक्तरूपेण कोट्युपस्थितेर्हेतुत्वात् स्मृतिजनकताघटितलक्षणस्यासंभवात्
संशयजनकताघटितलक्षणकरणे च तादृशासाधारण्यमात्रस्य व्याप्यविरुद्धयोरतिव्याप्तिः ननु सत्प्रतिपक्षस्थले
वह्निनदृशायामिव कोटिद्वयव्याप्यवत्ताज्ञानदशायामपि संशयोत्पत्तिरनुभवसिद्धैवेति तदभावव्याप्यवत्ताज्ञा
नप्रतिबंधकतायां तद्व्याप्यवत्ताज्ञानस्येव तत्कोटिमद्वृत्तिधर्मवत्ताज्ञानप्रतिबंधकतायामपि तदभाववद्वृत्ति
धर्मवत्ताज्ञानस्योत्तेजकत्वमगत्या कल्पनीयमिति कोटिद्वयव्याप्यवत्ताज्ञाने धर्मवत्ताज्ञानस्य संशायकत्वमव्याहतमेव
वयेन रूपेण प्रतिबंधकता तेनैव रूपेणाजनकत्वानभ्युपगमादित्यत आह सत्प्रतिपक्षे चेति विरोधिकोटिद्वय
व्याप्यवत्ताज्ञानसमय इत्यर्थः परामर्शप्रामाण्यसंशयेति तथा चोक्तरूपतया प्रकृतेपि न तत्कोटिमद्वृत्तित्वविशि
ष्टवत्ताज्ञाने प्रामाण्यसंशयादेश्च संशयः स्वीक्रियत इति नैककोटिमद्व्यावृत्तधर्मवज्ज्ञानप्रतिबंधकतायामपरकोटि
मद्व्यावृत्तधर्मवत्ताज्ञानस्योत्तेजकत्वं प्रामाणिकं अप्रामाण्यज्ञानस्योत्तेजकतयैवोपपत्तेः अप्रामाण्यज्ञानानास्कं

गदा. दितस्यैव ज्ञानस्य जनकतया निरुक्तासाधारण्यस्य बुद्धेर्जनकत्वोपगमे प्रतिबंधकतावच्छेदकरूपेणैव जनकताप्रसं
गइति भावः निश्चितसाध्यतदभाववद्व्यावृत्तत्वमिति असाधारण्यमित्यनुषज्यते येन येन रूपेणेति यद्यद्रूपं धर्मिता
२६ वच्छेदकीकृत्येत्यर्थः तेन तेन रूपेणैतद्व्यावृत्तत्वेन तत्तद्धर्मविशिष्टतत्तद्धर्मिव्यावृत्तत्वं प्रमेयत्वादिसामानाधिकरण्ये
२७ न घटादौ साध्यादिनिश्चयदशायामपि शब्दो नित्यः शब्दत्वादित्यादौ च साधारण्यस्य तद्धर्मिनिवेशः प्रथमपक्षे च द्व्य
मणाया निर्धर्मितावच्छेदककसाध्यनिश्चयविषयवृत्तिहेतोरसाधारण्यानुपपत्तेर्वारणाय घटत्वादिना साध्यादिनिश्चि
पदरूपायां रूपांतरावच्छिन्नघटादिव्यावृत्तत्वज्ञानात्संशयापत्तिवारणाय च धर्मितावच्छेदकानिवेशः साध्यव्याप्यवत्त्वेन
पक्षातिरिक्तमात्रविषयकसाध्यनिश्चयदशायामसाधारण्यानुपपत्त्यनवकाशात्तस्यापि निश्चयविषयत्वमाविष्क
र्तुं सर्वाणीति सर्वपदेन सर्वतावच्छिन्नोद्देश्यताकबोधः केवलान्वयिसर्वत्वावच्छेदेन विधेयविषयक एव जन्यत इति त
च्छाविधबोधस्यैव सर्वाणि साध्यवंतीत्याकारकतात्पर्यात् च विशिष्यपक्षे साध्यनिश्चयदशायामिव साध्यसंदेहविरोधि
नः सर्वाणि साध्यवंतीति निश्चयस्य सत्त्वेप्यसाधारण्याभावस्येष्टत्वात्साध्यव्याप्यवंतीति तथा चैतादृशनिश्चयदशा
यां विशिष्यपक्षे साध्यसंदेहस्यानिवृत्तेस्तादृशनिश्चयस्यनासाधारण्यप्रतिकारकत्वमिति भावः प्रथमपक्षे धर्मि
तावच्छेदकस्यानिवेशात्सामान्यधर्मावच्छिन्नधर्मिकं विशिष्यसंशयानिवर्तकं निर्णयमिव निर्धर्मितावच्छेदकतया
श्रमस्तत्संशयनिवर्तकताकनिश्चयमादायापि दोषोद्धारो न संभवतीत्यभिप्रेत्याह सर्वाणीवेति पूर्ववत्साध्यवत्त्वे ३७
न पक्षस्यापि निश्चयविषयत्वं स्फुटीकर्तुं सर्वाणीति साध्यवत्त्वावच्छिन्ने सर्वत्वविधेयकस्य साध्यवंति सर्वाणीत्याकार
कज्ञानस्य पक्षाविषयकस्यापि संभवात् सर्वं साध्यवदुद्देश्यकप्रमेयत्वविधेयकज्ञानानां च पार्थक्येनैतादृशज्ञानस्य व्य
त्वव्यापकसर्वत्वावच्छेदेन साध्यवत्त्वानवगाहितया तत्सत्त्वे न पक्षे साध्यसंदेहनिवर्तकोहीति तदानीमसाधारण्यमत्र

तमेवेतिभावः आदिपदात्ग्राह्योनित्यःग्राह्यत्वादित्यादौसर्वांशेसाध्याभावव्याप्यवत्तिसाध्याभाववत्तीत्यादि-
निश्चयपरिग्रहः साध्यादीत्यादिपदात्साध्याभावपरिग्रहः अतएवात्वेअसाधारण्याभावः द्वितीयपक्षेतेन-
ह्यक्तित्वरूपधर्मितावच्छेदकाविवक्षयोःप्रथमपक्षोक्तप्रथमदोषस्यद्वितीयदोषस्यचयथाश्रुतेप्यनवकाशा-
त्तद्दोषांतरमाह द्वितीयेत्विति विशिष्यधर्मितावच्छेदकप्रकारेणसामान्यतःपक्षेसाध्यवत्तानिश्चयं विनापक्ष-
मात्रवृत्तिहेतौसाध्यवद्वृत्तित्वघटितव्याप्तिनिश्चयएवनसंभवतीत्यभिप्रेत्यएतदभिहितं अथवाविशिष्यविशे-
षधर्मंधर्मितावच्छेदकीकृत्याउक्तविवक्षयोःसामान्यधर्मंधर्मितावच्छेदककनिश्चयदशायामप्येतद्दोषस्यसंभवात्त-
द्दशायांसकलसंग्रहायएतादृशधर्मस्यधर्मितावच्छेदकतायामनुसरणं विशेषणलक्षणायांसेतिविशेषणादित्यग्रिमेणान्व-
यः वैशिष्ट्यंचसामानाधिकरण्यप्रत्यासत्त्याबोध्यं तद्विशेषितस्यैवतस्यसंशयप्रयोजकतयासव्यभिचारसा-
मान्यलक्षणस्यातिव्याप्तिवारणायेत्याह साधारणेति एतच्चव्याप्तिग्रहदशायांसाधारणसंग्रहायवैशिष्ट्यंवि-
शेषणतावच्छेदकविषयत्वोभयघटितसामानाधिकरण्येनबोध्यंकेचित्तुपीतिव्याप्तिग्रहस्यान्यथाप्रत्ययोपीत्य-
र्थः ननुतत्तद्रूपीयव्याप्तिग्रहाभावः तत्तद्रूपीयासाधारण्यादिलक्षणेनिवेशनीयइतिनायंदोषइत्यतआह
स्यादिति तदपिसामान्यसव्यभिचारत्वमपितत्तद्रूपघटितमिति तथाचासाधारणाद्यसाधारणेपिप्रकृतवि-
शेषनियंत्रितसव्यभिचारव्यवहारायतिर्धूमादौसाध्येवह्न्यादिरेकंप्रतिव्यभिचारीतिव्यवहाराभावेनेष्टापत्त-
त्वेयोमादिनिभावः यथाश्रुतेतत्कल्पेप्रथमकल्पीयप्रथमदोषमप्याह साध्यादीति आदिपदात्साध्याभा-
वपरिग्रहः ननुतदानीमसाधारण्याभावेपितद्भ्रमादेवानुमितिप्रतिबंधइत्याशंकानिरासिकीत्वेयातद्भ्रमाभा-
वमप्युपपादयति नहीति तदानींपक्षेसाध्यसंदेहदशायांतदानींतत्रतत्साध्यवत्तासंशयस्यावश्यकत्वादित्यावर्जि

गदा.

२८

२६

तत्वाद्व्याप्यवद्वृत्तित्वस्यापि हेतौ संशयाधायकत्वादिति भावः एतेन उक्तस्थले लक्षणाव्याप्तिवत् असाधारण्यनिश्चयदूषक
रणाभावेन संशयानुपपत्तिरपि प्रदर्शिता उक्तविवक्षया मेयत्वादौ पक्षज्ञानदशायां असाधारण्येऽप्युक्तविशेषनिर्णयेन व्यभि
चारत्वव्यवहारे कदाचिदिष्टापत्तेः संभवात् दूषणांतरमाशंक्य निराकरोति एतेनेत्यादिना अन्यथा चरणत्वादित्यादि य
दृ॰ति व्याप्याव्याप्तिसदृशत्वदोषः न संशयप्रयोजकमिति तथा च तदाशयासाधारण्येन लक्षणसंगमने संभव इति भावः
ननु तर्हि कीदृशमसाधारण्यं संशयप्रयोजकमत आह किं त्विति नत्वस्य चरितेति साध्येन तदभाव सहवृत्तित्वेत्यर्थः
एतादृशासाधारण्यस्य च न हेतुदोषता संभवः सद्धेतुसाधारणत्वादस्मादनुमितिप्रतिबंधकज्ञानाविषयत्वेन दो
षसामान्यलक्षणानाक्रांतत्वाच्चेति भावः ननु व्याप्यविरुद्धसाधारणस्यैतादृशधर्मस्य संशयप्रयोजकत्वे व्याप्या
दिदर्शनादपि संशयापत्तिरित्यत आह व्याप्यविरुद्धयोरिति व्याप्याद्यग्रहदशायां व्याप्यादिदर्शनस्य संश
यप्रतिबंधकतया तत्त्वेन निश्चितस्य व्याप्यादेर्विरुद्धरूपज्ञानात् संशयदूषणवेति भावः विरुद्धान्यत्वस्य हेतुवि
शेषणत्वे असाधारणासंग्रहः विरोधपदार्थस्याप्रसिध्यादिवारणासंभव इत्यत आह विशिष्टेति साध्यतावच्छेद
कादिविशिष्टेत्यर्थः एतदर्थः पूर्वपक्षपदविवृतः यथाश्रुतमूलतो धर्मिविशेषणतायाएवलाभात् अर्थतइति
तात्पर्यबलतइत्यर्थः विरोधिविशेषणे अननुमितिविरोधिविशेषणं अवृत्तित्वे पक्षस्य वा सामानाधिकरण्यं च साध्यसा
धनयोरित्यन्वयः उपज्यते पक्षतानिवेशप्रयोजनाभावादाह एतत्पदमिति एतद्वृत्तित्वस्य धर्मिविशेषणत्वे स्वरूपासि ३३
द्धस्य व्यभिचारिणोः संग्रहप्रसंगः हेतोरपि तद्वृत्तित्वग्रहानिरोधित्वेनाविरोधिविशेषणेऽपि बाधसत्प्रतिपक्षातिप्रसं
गवारणाय आवश्यकमेवेति पूर्ववत् एतद्वृत्तित्वे सत्यनुमितिविरोधिसंबंधाव्याप्तिरिति दलद्वयेन व्याप्तिग्रहविरोध
धर्मवत्त्वस्य विवक्षणाच्च मणिकारमतसिद्धस्य साध्यव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्यस्यासंग्रहः

विशेषणांतरं प्रक्षिप्य बाधादिकारणोच्च गौरवमित्यभिप्रेत्य पूर्वपक्षोक्तरीतिं परित्यज्य प्रकारांतरेण बाधादिकं वार
यितुं उक्तदलद्वयनिष्कर्षमाह तथा चेति यद्रूपेति सधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनयादृश
विशिष्टविषयकनिश्चयसामान्यं स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्य
प्रतिबंधकतादृशधर्मवत्त्वमित्यर्थः समूहालंबनात्मकोदासीनपदार्थविषयकनिश्चयस्याप्यनुमितिप्रति
बंधकतया उदासीनपदार्थविषयकनिश्चयसामान्यस्यापि तद्विपरीतविषयकसमूहालंबनात्मकप्रकृता
नुमितिबंधकतया न तत्रातिव्याप्तिवारणाय सामान्यपदद्वयं हेतुमत्ताज्ञानासमानकालीनव्यभिचारनिर्णय
स्य व्यभिचारनिर्णयसामान्यांतर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानाप्रसिद्ध्या असंभवः स्यादिति प्रथमं कालीनां
तं निश्चयविशेषणं निधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनव्यभिचारनिश्चयकालीनहेतुमत्ताज्ञानधर्मि
तावच्छेदकाप्रसिद्धात् हेतुवत्तादृश्यमतो हेतुमत्ताज्ञाने सधर्मितावच्छेदकसाध्यानुमितौ हेतुतावच्छेदकाव
च्छिन्नस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानेन प्रतिबंधकं नित्यत्वव्यापकीभूताभावप्रतियोगिशब्दत्ववान्
दिज्ञानदृष्टापमयं नित्यत्व इति दिज्ञानोत्पत्ता विवादादित्यसाधारणाव्याप्तिरतः समानधर्मितावच्छेदकांतमनुमिति
विशेषणं तथा च इदं त्वादिधर्मितावच्छेदककानित्यत्वादिविशिष्टबुद्धौ शब्दत्वादिधर्मिकानित्यत्वव्यापकी
भूताभावप्रतियोगित्वरूपानित्यत्वीयव्यतिरेकव्याप्तिनिश्चयनिशिष्टस्य तद्धितावच्छेदककशब्दत्वादिमत्ताज्ञा
नस्य तदभावव्याप्यवत्ताज्ञानमुद्रया प्रतिबंधकत्ववद्विशेषणविशेष्यभावे विनिगमनाविरहेण तादृशशब्दत्वादिम
त्ताज्ञानविशिष्टस्य तथाविधव्याप्तिनिश्चयस्यापि प्रतिबंधकतया तादृशहेतुमत्तानिश्चयसमानधर्मितावच्छे
दककानुमितिसामान्यप्रतिबंधकत्वं तथाविधासाधारण्यनिश्चयस्यात्तनमेवेति असाधारण्यसंग्रहः अत्र

गदा०

मितिपदं साध्यव्याप्यो हेतुः साध्यवांश्च पक्ष इत्येतादृशसमूहालंबनानुमितिपदं तेन साधारण्यज्ञानस्य साध्यवत्ताज्ञा
नाप्रतिबंधकत्वेपि न तत्संग्रहः एतेनानुमितिपदं तेन साधारण्यज्ञानस्य साध्यवत्ताज्ञानाप्रतिबंधकत्वेपि न तत्सं
ग्रहः एतेनानुमितिविरोधित्वं दृष्टविषयकनिश्चयत्वेनानुमितिप्रतिबंधकत्वेनादृष्टत्वेन तत्र चावच्छेदकत्वं प्राग
क्तपक्षव्याप्त्यनतिरिक्तवृत्तित्वरूपमेव विवक्षणीयं एवं च साध्यव्यापकीभूताभावप्रतियोगिहेतुरिति ज्ञानस्य हेतु
मत्ताज्ञानासमानकालीनस्य साध्यवत्ताज्ञानाप्रतिबंधकतया तादृशज्ञानविषयस्यानिरुक्तलक्षणानाक्रांतत्वेन ना
साधारण्यस्वरूपतोपपद्यते पक्षवृत्तित्वविशेषितस्य च तस्य बाधादिवद्धर्मिविशेषघटितमूर्तिकतया नियतपक्ष
धर्मिकानुमितिविरोधित्वमेव न तु पक्षे यत्र हेतुसत्त्वं ज्ञायते तत्र तद्धर्मिकानुमितिसामान्यविरोधित्वमिति न तथा-
त्वसंभव इति परास्तं यत्र अंशे हेतुमत्ताज्ञानमनिवेश्य तत्तद्धेतुधर्मिकसाध्यव्यापकीभूताभावप्रतियोगित्वनि
श्चयत्वेनैव प्रतिबध्यतावच्छेदकं तु धर्मिविशेषविषयकत्वाघटितं तथैव हेतुमत्ताज्ञानमन्यानुमितित्वमतः शाब्दबा
धनिश्चयकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकाप्रसिद्ध्या न दोषस्तादृशस्य मते हेतुमत्ताज्ञाने सधर्मितावच्छे-
दकत्वविशेषणं अनुमितिसामान्यांतर्गततया च समानकालीनहेतुमत्ताज्ञानासमानधर्मितावच्छेदकका-
साध्यानुमितौ हेतुतावच्छेदकावच्छिन्नस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानेन प्रतिबंधके नित्यत्वव्याप- ३१
कीभूताभावप्रतियोगिशब्दत्वमित्यादिज्ञानदशायामयं नित्यः शब्दत्वादित्यादिज्ञानोत्पत्तावविवादादित्य साधारण्याव्या
प्तिरतः समानधर्मितावच्छेदकांतमनुमितिविशेषणं तथा च हृदं त्वादिधर्मितावच्छेदककानित्यत्वादिविशि
ष्टबुद्धौ शब्दत्वादिधर्मिकानित्यत्वव्यापकीभूताभावप्रतियोगित्वरूपानित्यत्वीयव्यतिरेकव्याप्तिनिश्चय-
निश्चिष्टस्य तद्धर्मितावच्छेदकाकशब्दत्वादिमत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानसदृश्या प्रतिबंधकत्वव

द्विशेषणविशेष्यभावे विनिगमनाविरहेण तादृशशाब्दत्वादिमत्ताज्ञानाविशिष्टस्य तथाविधव्याप्तिनिश्चयस्यापि
प्रतिबंधकतया तादृशहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबंधकत्वेन तथाविधसाधा
रणनिश्चयस्यासत्त्वमेवेति असाधारणसंग्रहः अनुमितिपदं साध्यव्याप्यो हेतुः साध्यवांश्च पक्ष इत्येतादृशस
मूहालंबनानुमितिपरं तेन साधारणज्ञानस्य साध्यवत्ताज्ञानाप्रतिबंधकत्वेपि न तदसंग्रहः एतेनानुमितिविरो
धित्वं यादृशविशिष्टविषयकनिश्चयत्वेनानुमितिप्रतिबंधकत्वं तादृशत्वं तत्र चावच्छेदकत्वं प्रागुक्तयानुगा
अनतिरिक्तवृत्तित्वरूपमेव विवक्षणीयं एवं च साध्यव्यापकीभूताभावप्रतियोगि हेतुरिति ज्ञानस्य हेतुमत्ताज्ञाना
समानकालीनस्य साध्यवत्ताज्ञानाप्रतिबंधकतया तादृशज्ञानविषयस्य निरुक्तलक्षणाक्रांतत्वेन नासाधार-
णत्वरूपतोपपद्यते यद्वृत्तित्वविशेषितस्य च तस्य बाधादिवद्धर्मिविशेषघटितवृत्तिकतया नियतपक्षधर्मि-
कानुमितिविरोधित्वमेव न तु यद्यत्र हेतुमत्त्वं ज्ञायते तत्तद्धर्मिकानुमितिसामान्यविरोधित्वमिति न तथात्वसंभ
व इति परास्तं यतः अत्र हेतुमत्ताज्ञानमनिवेश्य तत्तद्धर्मिकसाध्यव्यापकीभूताभावप्रतियोगित्वनिश्चयत्वे
नैव प्रतिबध्यतावच्छेदकं तद्धर्मिविशेषविषयकत्वाघटिततद्धेतुमत्ताज्ञानतज्जन्यानुमितित्वं अतः शाब्दत्वं नित्यत्व-
व्यापकीभूताभावप्रतियोगीति निश्चयसत्त्वे समानधर्मितावच्छेदककशाब्दवत्तानिश्चयस्य वा सत्त्वे नित्यत्वाद्य-
नुमितेर्नानुपपत्तिः तदानीं हेतुत्वेन तज्ज्ञाने नैवानुमितिजननात् तस्याश्च शाब्दत्वधर्मिकतादृशाभावप्रतियोगित्व
निश्चयाप्रतिबध्यत्वात् एवं च पक्षवृत्तित्वाविशेषितनिरुक्तरूपमेवासाधारण्येपि लक्षणे अनुमितिपदस्य प्रकृत-
हेतुकानुमितिपरतया प्रकृतहेतुकानुमितिसामान्यविरोधित्वस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितस्या
पि तत्र सत्त्वेन न तदसंग्रहाप्रसक्तेरिति समाधानं तत्र मनोज्ञं विज्ञायां शाब्दत्वादिधर्मिकतादृशप्रतियोगित्वा-

ग॰
टी॰
३०
30

दिनिश्चयसहकृतज्ञानशब्दत्वादिप्रकारकनिश्चयदशायां तत्समानधर्मितावच्छेदकशाब्दबोधापत्तेरन्यहेतुकानु
मित्यापत्तेश्च दुर्वारत्वात् न चान्यहेतुकायाः समानधर्मितावच्छेदककतद्भावज्ञानकालीनानुमितित्वस्य तद्ज्ञानज
न्यैवेति न तत्रापत्तिसंभव इति वाच्यं व्याप्यत्वानवच्छिन्नहेतुप्रकारकताशालिज्ञानस्यानुमितिजनकत्वे मानाभा
वात् अन्यलिंगकपरामर्शघटितसामग्र्यां तन्नज्ञानिकतादृशनिश्चयाभावस्यानंतर्भावेन तद्बलदापत्तेः कथा
मात्रेणवारयितुमशक्यत्वाच्च एतेन समानधर्मितावच्छेदककतद्भावज्ञानानंतरोत्पत्तिकत्वनिवेशेपि न नि
स्तार इत्यलमन्यावेशेन एतच्चयं पक्षवृत्तित्वाविशेषितहेतुनिष्ठसाध्याभावीयात्वव्याप्तिरूपसाधारण्यमेवे
ति न तत्रातिव्याप्तिरित्यवधेयं तथा निरुक्तानुमितिसामान्यविरोधिधर्मिविशेषितत्वात् धर्मिविशेषघटित
त्वात् न तादृशो न तादृशानुमितिसामान्यविरोधिनो नत्वेवमपि सर्वमाकाशवत् प्रमेयत्वादित्यादिस्थलो
यबाधप्रतिरोधयोरतिव्याप्तिः सर्वमाकाशाभाववदित्यादिनिश्चयेन क्वचिदप्याकाशाद्यनुमितेरनुदयात् अनुभ
वानुरोधेनासमानधर्मितावच्छेदककज्ञानेपि तत्प्रतिबंधकत्वकल्पनात् तयोरनुमितिसामान्यविरोधित्वादि
त्यत आह सर्वमित्यादिकं इत्याकारकज्ञानविषयबाधादिकं अग्रिमविरोधिद्वयपदस्य प्रतिबंधकपर
तया इत्यादिकमित्यस्य इत्याकारकज्ञानमित्येवार्थः सामानाधिकरण्यग्रहाविरोधीति साध्यसामानाधिकर
ण्यस्य साध्यवत्त्वघटितत्वादिति शेषः तथा चाविरोध्यंतेनैव तद्वारणमिति भावः निर्धर्मितावच्छेदककस्य ज्ञा
नस्य बाधाय प्रतिबध्यत्वे साध्यसामानाधिकरण्यज्ञानस्य साध्यांशे निर्धर्मितावच्छेदककतया तद्विरोधित्व उक्त
बाधादेरव्याप्तिमेवेत्याशयेनाह अनुमितीति व्यभिचारस्यापि प्रकृतसाध्यहेतुकानुमितिविरोधित्वात् सामान्येति
तथा च तस्यान्यहेतुकानुमित्यविरोधित्वान्न तत्संग्रहः उक्तबाधादेस्तु सर्वहेतुकानुमितिविरोधित्वं तद्वारण

मितिभावः यद्यपि शब्दत्वादिनिष्ठानित्यत्वादिव्यापकाभावप्रतियोगित्वग्रहरूपासाधारण्यज्ञाने अन्यलिंगका
नुमितावपि तत्समानधर्मिकशब्दत्वादिमत्वाज्ञानाविशिष्टं सत्प्रतिबंधकं इति प्रकृतसाध्यकानुमितिसामा
न्यविरोधित्वमसाधारण्यं न ह्यापि ज्ञानांतरवैशिष्ट्याविशेषितज्ञानसामान्यप्रतिबंधकत्वाघटितविरोधिता
या एवात्र निवेशनीयतया तादृशविरोधित्वाप्रसिद्ध्याऽन्यत्वेऽप्यसाधारण्यसाधारण्यमेवदृढत्वं वधेयं सर्वमाकाशा
भाववदित्यादिज्ञानस्यासमानधर्मितावच्छेदककानुमितिविरोधित्वे मानाभावः तादृशज्ञानकाले इदम
पि सर्वान्तर्गतमित्यादिज्ञानसत्वएव इदमाकाशवदित्यनुमित्युदयात् अत्र च तादृशज्ञानस्यैव ग्राह्याभा
वावच्छेदकधर्मदर्शनविधया तादृशानुमित्यभावनिर्वाहकत्वात् यथा च तादृशबाधबुद्धेर्निरुक्तानुमिति
सामान्यविरोधित्वाभावादेव नातिव्याप्तिशंकेति वस्तुतस्तद्धर्मितावच्छेदककबुद्धौ तत्समानाधिकरण्यमात्रे
ण ग्राह्याभावावगाहिबुद्धेः प्रतिबंधकतया ग्राह्याभावांशे तद्धर्मितावच्छेदकव्यापकत्वावगाहित्वमेव तत्र
तथा च ग्राह्याभावेन तद्धर्मव्यापकतानिश्चयस्य तद्धर्मी वह्निमन्नांशे ग्राह्याभावाप्रकारकस्यापि तत्तद्धर्मधर्मि
धर्मितावच्छेदकताकग्रहप्रतिबंधकत्वं तद्धर्मव्यापकत्वाच्च तद्धर्मसमानाधिकरणाभावाप्रतियोगि
त्वे तज्ज्ञानस्य प्रतिबंधकत्वं ह्युक्तिमद्दत्यन्ताभावाप्रतियोगित्वज्ञानमपि तथा सामान्याघटितविशेषाभावग्रह
स्य यत्र प्रतिबंधकत्वं तत्र तत्सामान्याभावस्यापि तथात्वानुभवानुभवात् सर्वमाकाशाभाववदिति बुद्धेस्त्वा
काशाभावेऽवृत्तिमद्दत्यन्ताभावाप्रतियोगित्वं विषयः स एव बाधः तादृशानुमितिसामान्यविरोधि चेति मूल
स्य न तेन तेत्यनेन संशयप्रयोजकयोर्विभाजको ध्वनितः सपक्षवृत्तित्वविपक्षव्यावृत्तत्वघटितसाधारण्यासाधा
रण्ययोः परामर्शे संगतिः सपक्षवृत्तित्वाद्यंशज्ञानस्यानुमित्यविरोधितया तद्घटितस्य हेत्वाभासताविरहा

गदा.

३१

द्रितितस्यानुमितिविरोधितया प्रक्रांतविपक्षवृत्तित्वाद्येशमात्रपरामर्शकतामाह तेनेति विपक्षवृत्तित्वादिनाःप्र-
क्रांतत्वात् प्रक्रांतत्वालाभाद्यानुमितिविरोधितेनेत्युक्तं अनुमितिविरोधित्वावच्छिन्नस्यानुमित्यविरोधित्वात्तत्पदस्य विपक्ष-
वृत्तित्वात्त्वावच्छिन्नपरत्वमावश्यकमिति तल्लाभाय विपक्षवृत्तित्वादिनेति विपक्षवृत्तित्वत्वाद्यवच्छिन्नेनेत्यर्थः तेनैवेत्येवका-
रस्य विभाजकधर्मस्यानुमितिप्रतिबंधकज्ञानप्रकारकत्वव्यवच्छेदपरत्वे:संगतिः तादृशज्ञानप्रकारीभूतविपक्षवृत्तित्वा-
देवानुगतधर्मप्रकारेणविभाजकत्वात् एवं प्रत्येकमेवेत्येवकारस्यापि विभाजकधर्मस्य हेत्वाभासतावच्छेदकत्वव्यव-
च्छेदपरत्वेनोपपद्यतइति अनुमितिविरोधित्वादिरूपानुगमकविभाजकतावच्छेदकधर्मस्य प्रतिबंधकज्ञानप्रकारतावच्छे-
दकत्वहेत्वाभासपदप्रतिपादितावच्छेदपरतया एवकारद्वयं व्याचष्टे एवप्रकारेणेति प्रत्येकमेवकारेणेत्यर्थः व्यवच्छिद्य प्रति-
बंधकज्ञानप्रकारतावच्छेदकत्वव्यवच्छेदपरत्वया प्रतिपाद्यते हेत्वाभासस्येति प्रकारमेवं प्रत्येकमेवेति मूलस्य विपक्षव्याप्ति-
त्वादि प्रत्येकमात्रव्याप्तिरूपावच्छिन्नस्यैवेत्यर्थः तेनासाधारणस्येत्यादि मूलस्यानुमितिविरोधिताघटितलक्षणपरित्यागे ल-
क्षणान्तरकरणेनासाधारणस्य साध्यतदभावोपस्थापकतया संशायकतया दूषकत्वपदेनाव्याप्तिरित्यर्थः कत्वे संगतिः सं-
भवत्संशयप्रयोजकत्वात्साध्यतदभावसंचरिनाभावप्रतियोगित्वरूपासाधारणस्य सद्धेतुसाधारणलप्रयकत्वादोषत्वासंभ- १८
वदोषेणोवानुमितिविरोधिता घटितलक्षणस्यावनादित्वात् तेनेत्यस्य संशापकताघटितलक्षणपरित्यागपूर्वकोपस्थलक्षण-
द्वयकरणस्यासाधारणसंग्रहप्रयोजनकतार्थकत्वं साध्यतदभावोपस्थापकतयेत्यस्य च सत्प्रतिपक्षोत्थापकतयेत्यर्थकत्व-
मपि तन्मात्रम् असाधारणस्य सत्प्रतिपक्षोत्थापकतायां तेन साध्यव्यापकीभूताभावप्रतियोगित्वस्यैवासाधारणतया तस्य व्याप्ति-
ग्रहाविरोधितया विरुद्धादिसंकीर्णासाधारणान्तरोधेन व्याप्तिग्रहद्वयविरोधितापरतया व्याख्येयस्याव्यवहितलक्षणस्य तत्रा-
व्याप्तेरावश्यकत्वादत्तत्त्पदमध्यमलक्षणमात्रपरतया व्याचष्टे तेनेति असाधारणस्य संशायकतापदे प्रथमलक्षण।

स्यैव साधकतानवच्छेदकत्वमस्य संशयप्रयोजकस्य निश्चितसाध्यतदभाववद्व्यावृत्तत्वादेरनुमित्यविरोधित्वादित्य
र्थः असंगतिभयेन साध्यतदभाववद्व्यापकतयेत्यस्य संशयकतयेत्यर्थो परित्याज्योऽतरमाह सत्प्रतिपक्षो व्यापक्षो
व्यापकत्वेन्नि सत्संशयकतयेत्यर्थो परित्याज्यो इतरलक्षणयोः तन्मते साधारणाव्याप्तिसत्वप्रयोगपदं भसंगतेरु
पदं भकतां स्पष्टीकर्त्तुं तत्र स्फुटयति अन्यथापुनरिति इतरलक्षणयोरित्यर्थः अव्याप्तिरेवेति सत्प्रतिपक्षो
व्यापकतया दूषणत्वपक्षे तु व्याप्यत्वे व्याप्यस्य ... भावव्याप्यकत्वेन बाधसाधारणमतः तदर्थं व्याचष्टे
साध्याभावेति व्यभिचारादिव्यावृत्तस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबंधकताघटितविरोधित्वस्य विरो
धितापदार्थतालाभाय साक्षादिति सव्यभिचारसामान्यनिरुक्तिः सर्वमनित्यं प्रमेयत्वादित्यादेरवमते साधारण
त्वात् तत्रापि व्याप्तिप्रदर्शनासंप्रदायेति तन्मते निश्चितसाध्यतदभाववद्वृत्तेरेव साधारणतया उक्तहेत्वोरनुपसं
हार्यत्वासाधारणत्वदशायामलक्ष्यत्वमेवेति भावः नव्यमणिकारमते वा लक्ष्यसाध्याभाववद्वृत्तेरेव साधा
रणत्वेवधारणं इत्येवधारणमित्येवकारेणावधारितमित्यत आह तत्र एवेति स्वमतेन सलक्ष्यत्वादेवेत्यर्थः अग्रे सिद्धा
न्तग्रंथे निश्चितसाध्यवन्तद्वृत्तित्वमित्यत्र तत्पदस्य पक्षे तन्निश्चितसाध्यवत्पक्षानुमर्षकत्वे साध्यसंशयविषयीभू
तपक्षे सपक्षे च वर्तमाने सद्धेतावतिप्रसंग इत्यत तस्य साध्यवत्मात्रपरतां स्पष्टयितुं व्याचष्टे निश्चितं इति साध्यादिम
त्तया निश्चितं इत्यर्थः पक्षस्य साध्यवद्भिन्नत्वेन स्वविशेषणत्वमप्रयोजकमिति वाच्यं साध्यवद्भिन्नत्वसंशयविषयवृ
त्तित्वज्ञानस्याप्रतिबंधकत्वात् तद्रूपसत्तानिश्चयघटितस्यैव शेषत्वमित्यभिप्रायेणानुपादानात् साध्यवति
तद्विशेषणोपादानं च शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यादेरनवगतसाध्यसहचारत्वे सति अनवगतसाध्याभा
वसहचरितत्वाविरुद्धत्वमेव न त्वसाधारणत्वमिति निमित्ताभिप्रायेण तद्वारणाय उभयत्र विकल्पेन तादृशविशेष

गदा०

३२

ऐं प्रतिव्यलक्षणद्वयं कथनीयमित्यभिप्रायेणासमासोपेक्षणमिति पुनरव्यक्तं तथा सति सपक्षविपक्षगतत्व
रूपाग्रिमलक्षणे सपक्षत्वविपक्षत्वोभयशरीरे निश्चयांशपरित्यागप्रवेशेन कस्यपरिहारसंभवात् सपक्षत्व
मात्रस्य च तद्भेदतानिराकरणासंगतेः मूले दृश्यते चोद्भावनतदत्यत्र रती ० स्पष्टं तत्र रीत्या विपक्षवृत्तित्वमिमिति
स्मरणीयं अयोगोलकेनानैकान्तिको वह्निरित्यत्र साध्यवदन्याधेयत्वमनैकान्तिकपदार्थः तत्रैव च तृतीयो
तार्थाय योगोलकानिरूपितत्वादेरन्वयो बोध्यः ननु तन्मात्रोद्भावनमात्रवादिनिवृत्तिरिति उद्भाव्यतदत्यत्र उच्यते
अनुपसंहार्ये सर्वमनित्यं मेयत्वादित्यादौ निश्चितसाध्यवदन्यवृत्तित्वदलासत्वात् सपक्षत्वातत्वमात्रस्य न त
ह्यावर्तकत्वम् अतः सपक्षगतत्वनिश्चितत्वरूपसाध्यवदन्यवृत्तित्वस्य तत्साधारण्यमाह दीधितौ साध्यवदन्ये
ति तत्रापि अनुपसंहार्येऽपि न निश्चयगर्भमिति न निश्चितसाध्यवदन्येति तत्रापि अनुपसंहार्येऽपि न निश्च
यगर्भमिति न निश्चितसाध्यवद्वृत्तित्वरूपमपि तु साध्यवद्वृत्तित्वरूपमपि तु साध्यवद्वृत्तित्वरूपमेवेति नाभे
दः न निश्चितसाध्यवदित्याद्युक्तलक्षणाभेद इत्यर्थः घटोऽनित्यो घटीकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यस्य के
वलान्वयिधर्मावच्छिन्नपक्षकत्वाभावेनानुपसंहारित्वाभावादित्यनुपसंहार्यस्येति मूलासंगतिमाशंक्यान्तरास्म
रयति इत्यस्य विरुद्धस्येति विरुद्धत्वं चास्यानवगतसाध्यसहचारत्वे सति अवगतसाध्याभावसहचारीत्व विरुद्ध इति
मतेन अनुपसंहार्यस्याविरोधानभिधानात् कस्येत्याकांक्षायामाह प्रसिद्धस्येति सर्वमनित्यं प्रमेयत्वादित्या ३३
दावित्यर्थः विरुद्धस्येत्यस्याविरुद्धसामान्यपरत्वे दर्शितद्वित्वरूपविरुद्धपरतया न द्वावपेविरुद्धांशस्येति ता
दृशद्वित्वरूपविरुद्धस्य पक्षातिरिक्तसाध्यवद्वृत्तित्वरूपसमुदायविशेषणेन विरुद्धांतरस्य च पक्षान्यत्वमन
तर्भाव्यापि साध्यवद्वृत्तित्वविशेषणेन व्यावृत्तिरिति प्रदर्शनाय भेदेनोपादानमिति भावः केवलान्वयिधर्मा

वच्छिन्नपक्षकत्वेनानुपसंहारित्वं किंत्वप्रतीतव्याप्तिग्रहानुकूलसहचारकत्वमिति मते कथितद्वित्वमनुपसंहा-
र्येवेति तन्मतमालंब्य यथाश्रुतमूलमुपपादयतो मतमाह अन्वयेनेति साध्यवद्वृत्तित्वोपाध्यावर्त्यस्य विरुद्धस्येव
पक्षान्यवृत्तित्वोपाध्यावर्त्तस्य सर्वमनित्यं प्रमेयत्वादित्याद्यनुपसंहार्यस्यापि उपादानौचित्यादनुपसंहार्यस्या-
प्युपादानौचित्यादनुपसंहार्यविशेषस्योपादानेन निर्बीजमित्यस्वरससूचनाय कश्चिदिति सिद्धान्तलक्षणे
विपक्षपदस्य निश्चितसाध्याभाववदर्थकताभ्रमं निराकरोति अत्रेति निश्चयोपादानविशेषफलस्यापि सम्यग्निमा
दर्शयति अत्र पक्षमेवेति स्फुटतरमभिधानात् वास्तवसाध्याभाववद्वृत्तित्वस्य साधारण्यरूपतास्फुटीकरणात्
न तु निश्चयगर्भविपक्षत्वसंभव इति कमपीति शेषः तज्ज्ञानस्य निश्चयोपाधिज्ञानस्याप्रतिबंधकत्वात् व्याप्तेनि-
श्चितसाध्याभाववद्वृत्तित्वाघटितत्वादिभावः नतु निश्चयोपाधिज्ञानस्याप्रतिबंधकत्वेपि स्वरूपसत्साध्याभाववनि-
श्चयविषयधर्मिवृत्तित्वज्ञानत्वेन प्रतिबंधकतया तादृशधर्मिवृत्तित्वं साधारण्यरूपहेत्वाभासो भवेत् न च
निश्चयघटितस्य विशिष्टप्रतिबंधकज्ञानाविषयत्वेन सामान्यलक्षणानाक्रांततया न हेत्वाभासतेति वाच्यं
मणिकारोक्तदोषसामान्यलक्षणस्य यथाश्रुतार्थपरतायाश्च अनेनैव परित्यागात् तत्परित्यागे कथंचिदुक्तसा-
धारण्यस्यापि संभवात् वस्तुतस्तु साध्याभाववन्निश्चयविषयीभूतायोगोलकादिनिरूपधर्मिवृत्तित्वस्यायोगोलकादि
वृत्तितात्वेनैव रूपेण दोषता तद्रूपविशिष्टविषयकज्ञानस्यायोगोलकादिधर्मिकसाध्याभाववन्निश्चयविशिष्टत्वेन
प्रतिबंधकत्वात् तथाच साध्याभाववन्निश्चयविषयवृत्तित्वेन ज्ञानस्याप्रतिबंधकत्वेपि न क्षतिः तेन रूपेण दोषता-
नुपगमात् न चायोगोलकादिवृत्तिताज्ञानस्यानिश्चयविशिष्टज्ञानसाधारणतया नानतिरिक्तवृत्तिप्रतिबंधकता-
स्वन्यतारूपानिश्चयाविशिष्टज्ञानसाधारणतया नानतिरिक्तवृत्तित्वरूपप्रतिबंधकतावच्छेदकत्वमिति न हेत्वा-

गदा॰ भासमानान्यलक्षणाक्रान्तत्वमिति वाच्यं सामानाधिकरण्यसंबंधेन यस्य यादृशप्रतिबंधकतायामवच्छेदकत्वं तदव-
वच्छेदकविशिष्टस्य यादृशाविशिष्टविषयकनिश्चयत्वस्य तत्प्रतिबंधकतानतिरिक्तवृत्तित्वमिति विवक्षया सामान्यल-
३२ क्षणस्यैकसाधारण्यसाधारणासंभवात् बाधबुद्धिप्रतिबंधकतायामप्रामाण्यग्रहाभाव एव सामानाधिकरण्यसंबंधे-
नावच्छेदकः प्रसिद्ध इति न चैवं तत्स्वरूपकत्वाद्धेतुमत्ताज्ञानविषयधर्मिवृत्तिसाध्याभावादिकमपि तथा स्यादिति वाच्यं इष्टत्वा-
३३ त् ग्रंथे चैवमहानसादौ वह्न्याद्यभावभ्रमदशायां पर्वतादौ धूमादिभ्रमदशायां च तादृशभ्रमविषये धूमवह्न्यभावादे-
र्हेत्वे वह्न्यादिसाधकधूमादेः साधारण्यं स्यादिति चेन्न दृष्टापीष्टमेव न चैवं साधारण्यस्यानित्यदोषताप्रवादविरोधः उक्त-
रूपेण साध्याभाववद्वृत्तित्वरूपविशिष्टविषयकज्ञानस्यापि प्रतिबंधकतया तादृशाविशिष्टविषयस्य चाप्रतिबंधकज्ञा-
नाविषयत्वेन दोषतया तद्विरोधात् सद्धेतावनिष्टसाध्याभावभ्रमविषयवृत्तित्वादिरूपस्य च तस्यानित्यदोषताया एवो-
पगमात् न चैवं सद्धेतौ पक्षतावच्छेदकादिभ्रमविषयवृत्तिसाध्याभावादिकमपि बाधस्यादविशेषादिति वा-
च्यं प्रतिबंधकप्रमाविषयस्यैव दोषत्वोपगमात् तादृशसाध्याभावादिविषयकप्रतिबंधकीभूतज्ञानस्य पक्षतावच्छे-
दकांशे भ्रमत्वनियमात् प्रकृते च ज्ञानद्वयस्यापि मिलितस्य प्रतिबंधकतया एकज्ञानस्य भ्रमत्वेपि प्रमात्मकापरज्ञान-
विषयस्यापि दोषतासंभवात् अत एव सद्धेतौ पक्षवृत्तिसाध्याभावव्याप्यस्याप्रसिद्धावपि पक्षवृत्तित्वादि भ्रमविषय-
निष्ठसाध्याभावव्याप्यत्वादेः सत्प्रतिपक्षतया तस्यानित्यदोषत्वं मिलितयोः समानधर्मिकसाध्याभाववत्ताग्रहहेतुम- ३३
त्ताग्रहयोर्व्याप्तिबुद्ध्याविव मिलितयोः समानधर्मिकसाध्याभाववत्ताग्रहहेतुमत्ताग्रहयोर्व्याप्तिबुद्ध्याविव मिलितयो- ७२
रेकधर्मिकसाध्याभावव्याप्तिपक्षधर्मताबुद्ध्योरनुमितिविरोधित्वात् न चैवं विरोधव्याप्त्यादेर्ज्ञायमानतादृशा-
यामपि सद्धेतौ दुष्टतापत्तिरिति वाच्यं ज्ञानद्वयस्य यत्र प्रतिबंधकता तत्र प्रतिबंधकीभूतज्ञानाधिकरणकालावच्छि-

न्तस्यैव विषयस्य दोषत्वादिति नच नित्यदोषस्य बाधादेः सर्वदा दोषत्वेन यावत्तदनिर्वाह भयेन प्रतिबंधकज्ञानाधिकर-
णकालावच्छिन्नत्वस्य सामान्यलक्षणे अनिवेशनया अनित्यानामपि दोषाणां सर्वदा दोषतापत्तिर्दुर्वारैवेति वाच्यं ।
यादृशज्ञानानंतरे विशिष्टत्वेभयादृशाविशिष्टविषयकज्ञानस्य प्रतिबंधकता तादृशज्ञानसहितत्वादृशविशिष्ट
ज्ञानानधिकरणवृत्तित्वविशिष्टतादृशाविशिष्टपर्याप्तविषयताः विरहविशिष्टस्य सामान्यलक्षणे तयानि-
त्यदोषे च विशेष्याभूतनिरुक्तविषयताः विरहेण तादृशज्ञानानधिकरणक्षणवृत्तित्वविशिष्टतादृशविष
यताविरहस्य सर्वदैनसत्वेन अनित्यदोषे च प्रतिबंधकज्ञानदशायामेव तादृशक्षणवृत्तिविशेषणाविरहेण
तादृशविरहस्य सत्वेन सामंजस्यादिति मिश्रास्तन्मतेपि नामापंकानिरावर्तं साधारण्यस्थले ज्ञानद्वय प्रतिबंधकता
विरहयति नवेतिन वेत्यर्थः रूपांतरेणेति रुद्धत्वं धूमाभाववद्वृत्तियोगो लकं वह्निमदित्यादिज्ञानेपि वह्निधूमव्या
प्य इति ज्ञानोत्पन्नेरित्यर्थः तद्रूपावच्छेदेन साध्याभावनिश्चयसहितेन रूपावच्छिन्नविशेष्यकहेतुमज्ज्ञा
ने प्रतिबंधकमिच्छत्वौ नायंदोष इतिशंकते नचैकेनेति गौरवादिति विशिष्टज्ञानत्वेन प्रतिबंधकत्वापेक्षया-
त्यादेः नतु ज्ञानद्वयकालेपि फलानुमत्या तन्निर्वाहाय दर्शितरूपेण प्रतिबंधकतया आवश्यकत्वे गौरवमकिं-
चित्करमेवानन्यगतिकत्वादित्यतआह हेत्विति ज्ञानद्वयस्थले ग्राह्यसाध्याभाववद्वृत्तित्वाभावविरोधिताव-
च्छेदकसाध्याभावसामानाधिकरण्यत्वावच्छिन्नस्य हेतावभानेन व्याप्तिज्ञानोत्पादे बाधकत्वमप्रामाणिकमेवे-
ति भावः दर्शितरूपेण प्रतिबंधकत्वे सर्ववादिसिद्ध प्रतिबंधकताकस्य ग्राह्यविरोधितावच्छेदकप्रकारकज्ञा
नस्यासंग्रह इत्याह साध्याभावेतिप्रतिबंधकतायानादिति तादृशज्ञानस्य साध्याभावांशेनिरुद्धर्मितावच्छेदक
तयोक्तप्रतिबंधकतावच्छेदकानाक्रांतत्वादिति भावः प्रत्यक्षे सन्निकर्षादिवलात् साध्याभावधर्मितावच्छे

दकानाक्रांतत्वादितिभावः मन्यदेसन्निकर्षादिवत्वात् साध्याभावधर्मितावच्छेदकतयाग्रयोगोलकत्वादेरपिभानसंभ-
वेत् एतादृशानुधावनं नच साध्याभावप्रमितावच्छेदकतयाग्रयोगोलकत्वादेरपिभानसंभवेतादृशज्ञाननिरूपितविशेष्यतानि-
३५ रूपितायाःस्वसमानकालीनज्ञानीयप्रकारतानतिरिक्तधर्मावच्छिन्नवृत्तित्वावगाहिज्ञानत्वेनप्रतिबंधकत्वो-
पगमादुक्तज्ञानासंग्रहः साध्याभावधर्मितावच्छेदकस्यैवसाध्याभावस्यापिविशिष्टज्ञप्रकारतानतिरिक्तधर्मावच्छि-
न्नवृत्तित्वावगाहिज्ञानत्वेनप्रतिबंधकत्वोपगमादुक्तज्ञानसंग्रहः साध्याभावधर्मितावच्छेदकस्यैवसाध्याभावस्या-
पिविशिष्टज्ञप्रकारताश्रयत्वादितिवाच्यं द्रव्यत्वादिसामानाधिकरण्येनसाध्याभावग्रहकालीनस्य द्रव्यवृत्ति-
र्हेतुर्वरित्यादिज्ञानस्यप्रतिबंधकत्वायानाद्धर्मितावच्छेदेनसाध्याभावावगाहिज्ञानस्यनिवेशेनिरुद्धर्मितावच्छेदकसा-
ध्याभावज्ञानकालीनस्यतस्यदुःसंग्रहत्वात् विपक्षत्वेनिश्चितसाध्याभाववत्त्वमेवनिश्चयांशज्ञानस्याविरोधित्वेपिन-
क्षतिः तद्वदिनसाध्याभाववद्वृत्तित्वस्यैवदोषत्वोपगमात् साध्याभावेनिश्चितत्वाभिधानस्यव्यभिचारज्ञा-
नप्रतिबंधकतायांतादृशएवनिश्चयत्वप्रवेशइत्येतत्प्रदर्शनमात्रार्थत्वात् एवंचसाधारणस्यनानित्यदोष-
ताप्रसक्तिरपीतिमिश्राणांहृदितीयमतेदूषयितुमुपन्यस्यति यत्किंचिति साध्याभावांशेनिश्चयद्रूपमिति श्रया-
त्किंनिश्चयत्वेनसामान्यतःसाध्याभावसंपात्यान्यसाध्याभावज्ञानत्वेमहानसेधूमवन्नवाधूमाभाववदयोगोलकवृ- ३२
त्तिर्वह्निरित्येतादृशज्ञानासंग्रहात् नापिहेत्वधिकरणप्रकारीभूतयत्किंचिद्धर्मावच्छिन्नविशेष्यकसाध्याभावसं-
पात्यान्यतज्ज्ञानत्वेयत्किंचित्त्वनिवेशात् वह्निमान्पर्वतोधूमवान्नवाधूमावदयोगोलकवृत्तिर्वह्निरितिज्ञान-
संग्रहः तस्यतादृशायोगोलकत्वरूपयत्किंचिद्धर्मावच्छिन्नविशेष्यकसंपात्यान्यत्वादितिनिर्दोषःसाध्याभावां-
शेनिधर्मितावच्छेदकस्यसाध्याभाववद्वृत्तिर्हेतुरितिज्ञानस्यासंग्रहात्तद्धेत्वधिकरणांशेसाध्याभावमात्रस्य

हेतुपरत्वेऽपक्षधर्मे व्याप्यप्रकृतहेतुकबाधस्थले व्याप्यभावसिद्धिरूपफलासंभवात् तत्फलघटितलक्षणा
व्याप्तिरतो हेतुपदस्य प्रकृताप्रकृतसाधारणहेतुमात्रपरतां दीधितिकृदाह हेतोः प्रकृतेऽन्यत्र वेति तथा च क
दाचिद्वह्निमान्धूमादित्यादावपि साध्याभाववत्पक्षरूपबाधघटितेन तद्धेतुत्वहेतुनाद्रव्यत्वादिरूपहेत्वंतरे व्या
प्यभावानुमितिसंभवात् लक्षणसमन्वय इति भावः यद्यपि प्रकृतहेतोर्नैतत्फलमिति तत्संभवाद्वैकत्वेन वा
धितहेतोर्लक्षणं तथापि तत्फलकदोषवत्त्वं तल्लक्षणमिति नानुपपत्तिः हेतुपदस्य प्रकृताप्रकृतसाधारणहे
परत्वेन तदुपादानमफलं व्यावर्तकत्वादिति पक्षधर्मे व्याप्तिबाध इत्यबोध्येत तथा प्रकृतहेतुपरमेव तद्वाच्यमि
त्याशयेनाह यत्र नापक्षधर्मे प्रकृतहेतुकबाधस्य फलांतरं फलयति अपक्षधर्मे चेति अत्र प्रकृतहेतोरिति प्र
कृत इत्यादिः व्याप्तिभंगे साध्ये साध्याभाववद्वृत्तित्वं हेतोः पक्षस्य साध्याभाववत्त्वेनैव निवेशः न तु पक्षत
वह्नेर्दकस्यापि तत्र प्रवेश इति न व्यर्थविशेषणता पक्षधर्मताभंगे साध्ये पक्षनिष्ठाभावप्रतियोगितासाध्यव्या
प्यत्वे हेतोः अत्रापि साध्यस्य तादृशाभावप्रतियोगित्वेनैव निवेशः हेतुद्वयमेव वा बाधघटितमिति बाध
स्यान्तरफलकत्वमुभयत्र स्थले व्याप्यादिबुद्धिसत्त्वादिति सद्धेतोरपि विरोधिपरामर्शदशायां सत्प्रतिपक्षत्वात्
तत्र च व्याप्तिपक्षधर्मताप्रमितिसत्त्वादित्यर्थः तथा च प्रकरणसमदोषस्य व्याप्त्यादिविरहोन्नायकत्वासंभवा
दिति भावः विपरीतबुद्धिः स्वसाध्याभावानुमितिः सत्प्रतिपक्षहेतोः फलमिति शेषः स्वसाध्यविपरीतेनानित्य
मादिहेतोर्वह्न्याद्यभावव्याप्यत्वाभावादित्यर्थः संशय इति कोटिद्वयोपस्थितिद्वारकसाध्यसंशय इत्यर्थः को
टिद्वयानुपनयादिति स्वेन स्वसाध्यस्यैवोपस्थापनादिति भावः इति जिज्ञासेति एतादृशतत्त्वनिर्णयोपायेच्छा
फलिका जिज्ञासेत्यर्थः अनयोः किं तत्त्वमिति जिज्ञासेति यावत् अतो नाग्रिमग्रंथविरोधः न तु स्वसाध्यव्याप्या

गदा॰ दिमत्वयोरुपस्थितयोर्हेत्वोरन्यतरत्र समीचीनत्वमेव जिज्ञासातद्दूषणेति अयं हेतुः समीचीनो न वेति तथा च प्रकृ-
तसाध्यहेत्वोरिति यथाश्रुतमसंगतमतो हीधिनिहक्रदेतद्दूषार्थकतया तद्व्याचष्टे प्रकृतसाध्यधीति किंत
35 त्वमिति मूलकः समीचीन इत्यर्थः एतादृशजिज्ञासाप्रयोजकत्वं समीचीनत्वे संशयादिसाधारणमन्यलक्षा
रणाय व्याप्तिपक्षधर्मतोपस्थितिरिति उदासीनव्याप्याकोपस्थितिवारणाय विशेषणादलं नवव्याप्यादेरननुगमा
त् सर्वसाधारणरूपेण तदुपस्थितिनिवेशासंभवाद्विशिष्य प्रकृतसाध्यतदभावव्याप्याकोपस्थितिनिवेशस्या
वश्यकत्वे जनकतावच्छेदकधर्ममितिवाच्यं अयमिति च समकारणत्वेन व्याप्यायत्तयोपस्थितिसाधारणेन तन्निवेशा
संभवात् यादृशपरामर्शस्योक्तजिज्ञासाजनकत्वं तादृशपरामर्शसहितत्तादृशपरामर्शनिवेशात् जिज्ञासमू
पयोगव्याप्तपरामर्शद्वयरूपत्वानुपातिप्रसंगः प्रकरणसमइतिदोषदर्शनिगोषः प्रकृतसाध्यव्याप्यवत्तापरामर्शतद
भावव्याप्यवत्तापरामर्शयोर्जिज्ञासाजनने मिथः सहकारितां व्यवस्थापयति नयव उपस्थित इति प्रतिपक्षोविबोध
परामर्शोत्तरएकस्मात्परामर्शात्तु निर्णयः एकतरस्य समीचीनत्वस्यावापकलोपधानगर्भलक्षणमेकपरामर्शद्वय
योनातिप्रसक्तमित्येतत्परत्तानहीत्यादिनेत्यज्यते जिज्ञाने प्रधानस्यानियमेनतद्धटितलक्षणस्याव्याप्या विवक्ष
णासंभवात् नान्विष्टसाधनताज्ञानात्संशयाद्वेति विकल्पोऽसंगतः ज्ञानगोचरवेद्यायांतादृशेष्टसाधनताज्ञान-
स्यसर्वत्रैवहेतुतया संशायकल्पनत्कल्पयवच्छेदयोगादित्यतद्दृष्टभेदाभिप्रायकतयाविकल्पं संगमयति तज्ज-
न्यौति संशयजन्यत्वस्यस्वमस्यानुगतरणकारणीभूतसंशयविघटनेनानुपपत्यायतद्रूपं यदिष्टंतत्साधनताज्ञानादि-
त्यर्थः एवं च मूलोक्तसंशयस्यजिज्ञासाहेतुत्वेतनायित्वातदभावापस्थानेनतदभावव्याप्यसंपादनद्वारोत्तस्फोटी
हातो दृष्टान्तेरोति व्यवहाररूपेत्यादि तथा च मूले दृष्टपदं तद्विशेषपरमितिभावः ज्ञाने व्यापकतावच्छेदकोटिनिश्चयेच्छा

धिकरणमात्रेण साध्यसिद्धेर्हेत्वाद्यंशे ज्ञातो बाधो दोषः अभावस्य कस्यचिदभिधेयत्वप्रतियोगिकत्वमपीति
विवक्षितत्वचक्षुरादावच्छेदेन बाधोद्भावनीयः पक्षतावच्छेदकप्रसिद्धेर्वनाश्रयासिद्धिरित्यर्थः नञ्स्वरूपसं
बंधेनाभिधेयतात्वावच्छिन्नसाध्यकानुमितौ पक्षनिष्ठाभावेन तत्संबंधावच्छिन्नत्वविशेषिताभिधेयत्वत्वावच्छि-
न्नप्रतियोगिकत्वानुमितिविरोधिनी तादृशं च साध्यमप्रसिद्धं नच घटनिष्ठस्वरूपसंबंधावच्छिन्नप्रतियो
गिताकाभावत्वेन पक्षत्वाद्दृष्टान्तासिद्धिः स्वरूपसंबंधावच्छिन्नगगनाद्यभावस्य संयोगादिसंबंधावच्छिन्नाधेयत्व
त्वावच्छिन्नप्रतियोगिताकाभावसमनैयत्येनाभिमतया सिद्धसाधनस्य दुर्वारत्वादिति चेत्सत्यं स्वरूपसंबंधावच्छि-
न्नायां घटनिष्ठाभावप्रतियोगितायां घटनिष्ठात्यन्ताभावप्रतियोगितात्वेन हेतुना घटनिष्ठाभिधेयत्वभेदप्र-
तियोगिता दृष्टान्तेनाभिधेयत्वत्वावच्छिन्नत्वावच्छिन्नत्वानुमाने मूलेनात्यर्थेण सामञ्जस्यं मूले विशेषादर्शनदशाया
मिति व्यभिचारिणमप्यताह पक्षाद्धेतौ व्यभिचारग्रहदशायामित्यर्थः केवलान्वयिन्यपि संभव इत्यनेनास्यान्वयः
व्यभिचारग्रहदशायामित्यर्थः केवलान्वयिन्यपि संभव इत्यनेनास्यान्वयः व्यभिचारस्थले दर्शयन्नेतत्कथनप्र-
योजनमाह दीधितौ नन्विति आद्यस्य ज्ञात्यन्यत्वरूपादिप्रथमानुमानहेतोः द्वितीयस्य घटहृत्त्यादिद्वितीयानुमा-
नहेतोः प्रतियोगित्वादिप्रकारकबाधबुद्धेर्विशिष्ट बुद्धिविरोधितायां नवैयरन्ध्रुपगमात् तथा सति तत्संबंधप्रकार
कबुद्धेरपि विरोधापातात् नोक्तानुमानेन घटोऽभिधेयः प्रमेयत्वादित्यनुमानप्रतिरोधसंभव इति स्वयमभिधेयत्व-
रूपप्रतियोगप्रकारेणाभावानुमानप्रतिरोधसंभव इति स्वयमभिधेयत्वरूपप्रतियोगप्रकारेणाभावानुमानमेव
मूलकृता साध्याप्रसिद्ध्या उपेक्षितमपि प्रतिरोधकतया व्यवस्थापयति वस्तुत इति साध्याप्रसिद्ध्या अन्वयानु-
११५ मानासंभवात् पक्षादिसाधारणद्रव्यत्वादेः पक्षादौ व्यभिचारग्रहसंभवेन व्यतिरेकितयापि साधकतायाः स्वघटत्वा

भावेन पक्षमात्रवृत्तिकंबुग्रीवादिहेतुकव्यतिरेक्यादेः अभावसाध्यकव्यतिरेकितया साध्यप्रसिद्धेरनपेक्षितां दर्शय
ति व्यापकाभावेनेति पटादाववभिधेयत्वादिव्यापकतया गृहीतस्य कंबुग्रीवादिमत्त्वाभावस्याभावेन कंबुग्रीवादिनेत्य
र्थः अप्रसिद्धस्यापि प्रतियोगितया अभिधेयत्वादिप्रकारीभूतत्याज्ञानस्यापि व्याप्यतया गृहीतमभिधेयत्वादिकं प्रति
योगितया प्रकारीभूतत्वव्यस्तभूतस्याभावांतरस्यापि सिद्ध्युपगमात् अप्रसिद्धसाध्यस्यानुमानस्यैकदेशिनामेवानु
मततया अभ्युपगमोक्तिः कंबुग्रीवादिमत्त्वाभावस्य वास्तवाभिधेयत्वव्यापकताविरहादवस्तुभूताभिधेयत्वाभाव
स्यानुमित्यावगाहनासंभवात् प्रसिद्धपटत्वाद्यभावस्य व्याप्यतया गृहीताभिधेयत्वप्रतियोगिकात्वाभावाद्व्यापका
भावेनेत्यादेर्यथाश्रुतस्यासंगतिर्बोध्या व्यभिधेयत्वप्रतियोगिकात्वाभावाद्व्यापकाभावेनेत्यादेर्यथाश्रुतस्यासंगतिर्बो
ध्या व्यवहर्तव्यविशिष्टाप्रसिद्धावपि न विशिष्टार्थपरप्रतिज्ञाद्यसंभवस्त्वाह प्रत्येकपदार्थप्रसिद्धौ वेति तावतैव
भ्रमात्मकस्य व्यवहारोपयोगिविशिष्टज्ञानस्य संभवात् विशिष्टज्ञानं विनापि तत्र विशेष्यांशे तत्तद्विशेषणावगा
हित्वेन तात्पर्यघटकप्रतीतेर्ज्ञानेन विशिष्टबोधकवाक्यप्रयोगसंभवाच्चेति भावः मूलकृता सत्प्रतिपक्षहेतुः
दोषानभिधानात् स्वयं तान्प्रदर्शयति सत्प्रतिपक्षस्त्विति सत्प्रतिपक्षहेतोर्दोषानभिधानात् स्वयं दोषास्त्वित्यर्थः तु
कारेण मूलनिरुक्तसत्प्रतिपक्षव्यवहारविषयतावच्छेदकरूपस्य दोषत्वव्यवच्छेदः व्याप्यमान् व्याप्यविशि ३०
ष्ट पक्षानिष्ठोऽग्राधेयतया पक्षविशिष्टोपमादिरिति आदिपदादाधेयतासंबंधेन प्रकृतपक्षसाध्यकप्रकृतसाध्या
भावादिपक्षकानुमितिजनकपरामर्शविषयप्रकृतपक्षव्याप्यविशिष्टसाध्याभावादिपरिग्रहः पक्षे साध्याभावव
त्त्वादिबाधबुद्धेरपि पक्षे साध्यानुमितिविरोधितया तादृशबाधोत्थापकस्यापि परामर्शस्यानुमितिविरोधित्वेन त
द्विषयविशिष्टस्यापि सत्प्रतिपक्षतौचित्यात् अत एव साध्यतदभावयोराधेयतया साध्याभाववत्पक्षव्याप्यावगा

प्रतिपत्तिसंवलनस्य जिज्ञासायामसति व्यवहितस्यान्यथासिद्ध्याकारणत्वात् जिज्ञासहेतुत्वादिति मूलेन ।
त्प्रयोजकत्वार्थकेन तथाज्ञानं प्रदर्शयन् व्याचष्टे हेत्विति समीचीनत्वं प्राग् तु व्याप्तिपक्षधर्मताकत्वेन साध्या
नुमित्यौपयिकपरामर्शविषयत्वमितियावत् तत्संशयरूपपरामर्शप्रामाण्यसंशयपर्यवसित इति बोध्यं अ
नैकान्तिकत्वोपस्थिते व्याप्तिपक्षधर्मतोपस्थितित्वाभावान्नेतादृशसंशयावसरः तथापि तदुपस्थिते संशयोदय
सीनधास्यादिविषयकत्वसंभवात् तत्संगतिः संशयद्वारा साध्यसंशयद्वारा यत्परामर्शद्वयानुत्पादेपि
क्रमिकपरामर्शद्वयसंवलनात्प्रतिरोधवतिपांकेते क्रमेति एकपरामर्शानंतरमपरपरामर्शजनकव्याप्तिज्ञान
पक्षधर्मताज्ञानयोर्द्वयोः क्रमेणैवोत्पत्तिः तथाच प्रथमपरामर्शचरक्षे व्याप्तिर्थज्ञानपवपरामर्शानन्तरोत्पत्तिस्तदा
नीच सर्वपरामर्शनाशानीत्युच्यते अपितु स्वद्वितीयक्षणोत्पन्नविशेषगुणान्तृतीयक्षणएवेति उत्पत्तिकालपदं
तत्पूर्वकालपरतया व्याचष्टे दीधितौ उत्पत्तीति नन्वनाशकादित्यत्र स्वनाशेनोत्पत्तिप्रतीतिविरोधात्सर्गिकीत्याशयेनेदं
व्याख्यानं तत्स्वनाशकत्वार्थकत्वेन यथाश्रुतमेव संगच्छते अनंतरोत्पन्नस्यैव गुणस्यनाशकतयोभयोर्व्याप्ति
ज्ञानपक्षधर्मताज्ञानयोर्कस्य स्वज्ञाननाशकत्वासंभवात् पृथक्कस्य लीयनाशकत्वाभिप्रायकतया ज्ञानाभ्यांवि
नाशादिति मूले समगयति व्याप्तेति उत्पादक्रमानियमादिति व्याप्तिज्ञानोत्तरमेव पक्षधर्मताज्ञानं पक्षधर्मताज्ञानोत्तर
मेव व्याप्तिज्ञानमुत्पद्यते इति नियमाभावादित्यर्थः उभयोर्नाशकत्वमज्ञानमिति उक्तज्ञानयोर्यज्ज्ञानं प्रथमतो यत्रो
त्पद्यते तत्र तस्य नाशकत्वादिति भावः विशिष्टज्ञानोत्पत्तिकालइत्यत्रोनादृशज्ञानयोर्हेतुत्वेनोन्वयेपत्तैव
उभयहेत्वन्वयोगपत्तानिर्वाहकतोतिकिस्थलभेदान्नमवर्गेनेत्याशयेनाह उत्पन्नावेववेति व्याप्तिपक्षधर्मताविषयकै
कज्ञानस्थलेपिन परामर्शयोर्योगपद्यं संभवतीति स्वयमाह यत्रेवेति मूले उभयव्याप्तिज्ञानपक्षधर्मताज्ञानात्ता

गदा० नानाभिन्नपरामर्शद्वयहेतुव्याप्तिहेतुत्ववर्मताज्ञानवत्त्वमुभयस्येत्यर्थः परस्याप्रतिबंधकत्वात् एकसत्त्वस्यापरसं
त्वाविघटकत्वात् परामर्शोत्पाद इति व्याप्त्यादिज्ञानवत्तूभयाधीनस्यैकदा समूहालंबनरूपस्याविरलक्रमेण
वा उभयव्याप्यवत्ताज्ञानस्योत्पादः तत्सर्वविशिष्टपरामर्शयोरेवैकदानुत्पादस्तत्तृतीयक्षणे वाविनाशः तेनतज्ज्ञानस्य
तन्नियमदत्त्वभिमानेनैषां कात्र अभिमानं निराकरोति व्याप्त्यादीनियौगपद्याभावात् एकपदस्थानासंभवात्ज्ञा
नमात्र एव उक्तानियमादितिभावः परस्परजन्यव्याप्तिस्मृतिप्रतिबंधकत्वात् समूहालंबनपक्षधर्मताद्वयज्ञाना
त् समूहालंबनरूपंव्याप्तिद्वयस्मरणं ततः समूहालंबनमुभयव्याप्यवत्ताज्ञानंप्रतिरोधप्रयोजनकमितिसमाव
तैनैवमितिस्वघटनिवेश्यमाणस्यानित्यसत्प्रतिपक्षदोषस्य साध्याभाववद्व्याप्यवत्त्वरूपस्य केवलान्वयिसाध्यके साध्या
भावाप्रसिद्ध्यासंभवात् अस्येति मूलं निरुक्तव्यवहारोपयिकपरामर्शसंवलनात्मकसत्प्रतिपक्षत्वपरतया व्याचष्टे
अस्येति अभिधेयत्वे द्वित्वावच्छिन्नाभावप्रतियोगित्वसाधारणरूपेण घटनिष्ठाभावप्रतियोगित्वज्ञानस्याविरोधिवि
षयकत्वेन घटेऽभिधेयत्वज्ञानाप्रतिबंधकतया तत्साम्यमनाभिधेयत्वमित्यादिग्रंथस्याभिधेयत्वप्रकारकघटनि
ष्ठाभावप्रतियोगितावच्छेदकत्वसाध्यकजात्यवृत्तित्वविशिष्टघटमात्रवृत्तितानवच्छेदकत्वसाध्यकजात्यवृत्ति
त्वविशिष्टघटमात्रवृत्तितानवच्छेदकत्वलिंगकानुमानेनतात्पर्यग्रहणंतेऽपि घटान्योन्याभाववत्त्वे पदरूपत्वं च दीधि ३०
तौ समासांके गुर्वादिमत्त्वादीनि यथाश्रुतं यथाश्रुतमूलानुसारेण यथाविवक्षिते तु सत्त्वादिपदं सत्त्वावादिपरं
एकैकस्येति केवलविशेष्यकेवलविशेषणयोरित्यर्थः ननु घटनिष्ठात्यंताभाववत्त्वेनेनप्रसिद्धपटत्वाद्यभाववि
वक्षणे तत्राभिधेयत्वप्रतियोगिकत्वस्य वाधान्न साधनसंभवः अभिधेयत्वाभावस्याप्रसिद्ध्या न पक्षसंभव इ
त्याशंकां निरसितुमाह घटनिष्ठेति उभयमतप्रसिद्धेनेत्यादिः सामान्यतः सामान्यरूपेण वाधेति सामना

तावच्छेदकविशिष्टपरं साध्यपदं एवं विशिष्टपदार्थस्य साध्यसाधनपदयोर्द्वयोः श्रवणएव साधनान्वयसं-
भवात्तथाच सति द्वंद्वात्परश्रूयमाणमत्वर्थस्य साध्येनान्वयस्यावश्यकत्वापातात् नच साध्यवत्वमत्र हे-
तुविशेषणं तथाविवक्षितसाध्यवत्वस्य व्यापकताघटकतया साध्यस्यावृत्तित्वे अतिप्रसंगानवकाशेन निष्प्र-
योजकत्वात् नचावृत्तिगगनादिवारकं वृत्तिमत्वपि व्यापकताघटकमिति मतेन तत्सार्थक्यमिति वाच्यं अनुमि-
तौ वृत्तिमत्वघटितव्यापकतावगाहित्वेन हेतुत्वेपि प्रकृतलक्षणे तदंशघटितव्यापकतानिवेशे साध्यव-
त्वग्रहाविरोधित्वनिवेशस्य प्रक्षालनाद्धीति न्यायेनायुक्तत्वात् साध्याप्रसिद्धिसाधनाप्रसिद्ध्योर्वारणाय साध्यता-
वच्छेदकादिविशिष्टनिवेशेन व्यापकताघटकसाधनवत्वग्रहाविरोधिनः साधननिष्ठवृत्तित्वस्य वारणाय सा-
धनवत्वपर्यंतानुधावनं साध्याभाववद्वृत्तित्वज्ञानस्य व्यापकताज्ञानाविरोधित्वे साध्याभाववद्वृत्तित्वादिविष-
यकसमूहालंबनरूपव्यापकताग्रहो विवक्षणीयः अथवा व्यापकताघटितव्याप्तिधीरेवानुमितिहेतुः नतुः नतु
साध्याभाववद्वृत्तित्वादिधीः तथाच साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादि-
कमेव व्यभिचारः नतु हेतौ साध्याभाववद्वृत्तित्वादिकं साक्षादनुमितिजनकज्ञानाविरोधित्वादिति मतेनायं क-
ल्पः नन्वेतत्कल्पे अत्यंतान्योन्याभावगर्भव्यापकतयोरेकोपादाने अन्यतरगर्भव्यभिचारासंग्रहः एकाभावग-
र्भव्यापकताबुद्धेः अन्यगर्भव्यभिचारज्ञानस्य ग्राह्याभावानवगाहितया अविरोधित्वादित्यत आह पूर्वंएवं
वदिति अनुमितौ व्यापकसाध्यविशेष्यतानिरूपितप्रकारतात्वेन द्विविधे व्यापकत्वप्रकारके अनुगमनीये प्राति-
स्विकरूपेण वा तत्तद्व्यापकताप्रकारकत्वं ज्ञाने निवेशनीयमित्यर्थः साध्याभाववद्वृत्तित्वसाध्यवदन्यावृ-
त्तित्वरूपव्याप्तिद्वयमेवानुमित्युपयोगि किंतु व्यापकताघटितमिति मते हेतौ साध्याभाववद्वृत्तित्वादिक-

गद०
२४

मेवदोषः न तु साध्यतावच्छेदके हेतुव्यापकतानवच्छेदकत्वं परमगुरुत्वनिरीक्षकत्वात् तन्मते च उक्तलक्षणे लक्ष्यापरि-
ग्रहोऽप्यलक्ष्यापरिग्रहश्चेति तत्परित्यज्य साध्याभाववदवृत्तित्व साध्यवद्भिन्नवृत्तित्वसंग्राहकं लक्षणमाह साध्यत-
दवृत्तेरिति साध्याभावव्याप्यहेतुसामानाधिकरण्यादिवारणाय साध्याभावव्याप्यादिव्यावृत्तेनेति आदिपदात्साध्याभा-
वावच्छेदकपरिग्रहः तत्र तादृशविरोधिताश्रयो यो हेतुसामानाधिकरण्याभावग्रहः तद्विरोधित्वं तदभावव्याप्या-
दिव्यावृत्तं न ज्ञानविरोधित्वं च तद्वत्ताज्ञानिश्चयप्रतिबध्यतावच्छेदिकासतीतद्वत्ताज्ञानप्रतिबंधकतावच्छेदिकायाप्र-
कारतात्तदाश्रयत्वेन तदभावव्याप्यवज्ज्ञानस्य तद्वत्तानिश्चयप्रतिबध्यतया तद्विषयव्युदासः वह्निव्याप्यसाध्यक-
स्थले वह्न्यभावे हेतुसामानाधिकरण्यवारणाय प्रतिबंधकतानिवेशः अथ घटाभावादेरपि वह्न्यभावत्वादिना ज्ञा-
नानस्य वह्निमज्ज्ञानाज्ञानविरोधित्वात् घटाभावादिसामानाधिकरण्यमपि वह्न्यादिसाध्यके व्यभिचारः स्यात् साध्य-
वज्ज्ञावज्ज्ञानविरोधितावच्छेदकीभूतविषयतानिरूपितहेतुसामाधिकरण्याभावविषयताशालिग्रहविरोधितानि-
वेशे चासंभवः धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावप्रकारतायाएव साध्यवज्ज्ञानप्रतिबंधकता-
वच्छेदकतया साध्याभावो न हेतुसमानाधिकरण इति ज्ञानीयसाध्याभावविषयतायाश्च तथात्वादिति चेन्नात्किंचि-
द्रूपीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वेन येन
रूपावच्छिन्नविशेष्यकसाध्यवज्ज्ञानप्रतिबंधकता तद्रूपावच्छिन्नाभावे हेतुसामानाधिकरण्यग्रहविरोधितानि- ३३
वेशे नातिप्रसंगाभावात् साध्याभावत्वादेरेव तादृशरूपत्वात् कांचनमयधूमवान्वह्नेरित्यादौ धूमेन कांचनमयद्र-
तिज्ञानस्यापि साध्यतावच्छेदकविशिष्टसाध्यवज्ज्ञानविरोधित्वात् कांचनमयत्वाभावसामानाधिकरण्या-
तिप्रसंगः साध्यतावच्छेदकविशिष्टसाध्यतावज्ज्ञानत्वेन यद्रूपावच्छिन्नप्रकारकनिश्चयप्रतिबध्यतेत्युक्तौ तत्र

विशेष्यधूमाभावसामानाधिकरण्यासंग्रहः धूमत्वावच्छिन्नाभावनिष्ठप्रतिबध्यतेत्यत्रोक्तौ तत्र विशेष्यधू-
माभावसामानाधिकरण्यासंग्रहः धूमत्वावच्छिन्नाभावनिष्ठप्रतिबध्यतावच्छेदककोटौ कांचनमयत्व
विषयतायाश्च निवेशात् तथात्वाविद्धर्मावच्छिन्नविशेष्यकविशिष्टसाध्यवत्ताज्ञानत्वव्यापकप्रतिबध्यता
निवेशे च धूमो न कांचनमय इति ज्ञानप्रतिबध्यतायाः कांचनमयत्वविशिष्टधूमादिमत्ताज्ञानत्वव्यापकता-
पाये त्वातिप्रसंगस्य दुर्वारतेत्यतः फलीभूतज्ञानधर्मितावच्छेदकावच्छिन्नविशेष्यतानिवेशः यद्यपि धूमत्वा
देरपि कांचनमयत्वादिविशिष्टधूमादिमत्ताज्ञानधर्मितावच्छेदकत्वमक्षतमेव कांचनमयधूमवान् धूमइ
त्येतादृशज्ञानस्यापि कदाचिदुत्पादात् तथापि विशिष्टसाध्यवत्ताज्ञानादिधर्मितावच्छेदका ये ये धर्मास्त
द्धर्मावच्छिन्नविशेष्यतानिरूपितयद्धर्मावच्छिन्नप्रकारतानतद्धर्मावच्छिन्नविशेष्यकविशिष्टसाध्यवत्ता
ज्ञानप्रतिबंधकतावच्छेदकतद्रूपावच्छिन्नत्वस्य विवक्षितत्वान्नातिप्रसंगः हेतुसामानाधिकरण्यविषयता
निरूपितसाध्यवत्ताधीविरोधितावच्छेदकतोप… लक्षितधर्मावच्छिन्नविषयतायाः स्वरूपसंबंधरूपं प्रतिब-
ध्यतावच्छेदकत्वमेव निवेश्यं न त्वनतिरिक्तवृत्तित्वनित्यान्योन्याभावघटितव्यभिचारधियो जन्यताभावघटित
व्यभिचारधियः प्रत्येकं प्रतिबध्यतायास्तादृशविषयितात्वावच्छिन्नव्यापकताविरहेऽपि न क्षतिः अत एव सा
धनाप्रसिध्यादावपि नातिप्रसंगः साध्याभावादिविषयतायास्तत्प्रतिबध्यतावच्छेदककोटावनिवेशात् हेतुसा
मानाधिकरण्यविषयतायां च धर्मितावच्छेदकताभिन्नत्वमुपलक्षणविधया निवेश्यं तेन धूमासमानाधिकर
णइति ज्ञानविरोधिनिधूमासमानाधिकरणवह्न्यभावादौ चह्नादिसामानाधिकरण्येनातिप्रसंगः साध्याभावव्या
प्यसाध्याभावावच्छेदकादिसामानाधिकरण्यदर्शितप्रकारापेक्षया लघुप्रकारान्तरमाह साध्यवत्ते-

गदा. तितादृशाभावेनेति हेतुसामानाधिकरण्याभावेनेत्यर्थः हेत्वाभासेनेति दोषेणेत्यर्थः विशेष्यदलप्रयोज्यदलप्रयोजनं
३९ स्फुटयति साध्याभावेनेत्यविरोधित्वात् अत्र च प्रकृतानुमितिजनकज्ञानविरोधित्वमेवाभासत्वं न तु बाधादिसाधारणं
गुरुशरीरानुमितिसाधारणो ज्ञानानुगमकप्रकारघटितप्रयोजनाभावादनुमितिजनकज्ञानस्यापि अनुमितिजनक
तावच्छेदककोटिप्रविष्टविषयतावच्छिन्नत्वेन निवेशः न तु विशिष्टपक्षे विशिष्टसाध्यव्याप्तिविशिष्टहेतुवैशिष्ट्या
वगाहिज्ञानत्वेन तथा सत्यत्यंतान्योन्याभावघटितनानाविधव्याप्तीनामननुगमेन तादृशनानाविधव्यभिचारसं
भवाद्भावद्व्याप्यवगाहि समूहालंबनानुमितिनिवेशेन तत्संग्रहसंभवे विलक्षधर्मत्वाद्यवगाहितायाः प्रयोजन।
विरहेणानिवेशप्रसंगेन तादृशाभावग्रहविरोधित्वविशेषणवैयर्थ्यं च नन्वेवं कालस्य धूमाभावव्याप्यसमाना
धिकरणवह्निमान् धूमवान् वह्नेरित्यादौ वह्निनिष्ठधूमाभावव्याप्यसामानाधिकरण्यानुपाश्रयासिद्ध्यादाव
तिव्याप्तिरित्यत आह विरोधित्वमिति पूर्वोक्तादिदोषेति विशिष्टपक्षग्रहाविरोधिज्ञानस्यविषयतयेत्यर्थः
पक्षधूमवान् धूमाभावसहचरितवह्नेरित्यादौ हेतुतावच्छेदकधूमाद्यभावसामानाधिकरण्यादिविशि।
ष्टवह्न्यसामानाधिकरण्यस्य धूमाद्यभावेनाहार्यज्ञानाप्रसिद्ध्या तत्स्थलीयसाधारण्ये व्याप्तिरित्याशंका।
यां विरोधित्वमित्यादिकमवतार्य निर्वह्निर्वह्निमानित्यादिस्थलीयदोषे सामान्यलक्षणाव्याप्तिवारकपूर्वोक्त।
प्रकारान्तरमणपरतया तद्व्याख्यानेन तत्पक्षोभनं पूर्वमेवं विधवरीति उत्तरत्र सव्यभिचारादिलक्षणे अत्र तत्संके ३७
न्यभिधानेन यौनरुक्त्यायातात् नन्वव्यभिचारित्वविशिष्टसामानाधिकरण्याभानस्यान्यभिचारज्ञानाविरो
धित्वादव्याप्तिरित्याशंकां न लक्ष्यतामेमीहृत्य परिहरति उपदर्शितेति व्याप्तिग्रहे संशयसाधारणव्यभिचार
धियो विरोधित्वात् ज्ञानत्वेन प्रतिबंधकत्वमेव लक्षणप्रवेश्यं अतो न साधनप्रसिद्ध्यादावतिव्याप्तिरिति शेषानि।

स्य पक्षस्यैव विशिष्टसाधनादिग्रहविरोधित्वादित्याशयेन विशिष्टसाधनवत्त्वादिग्रहाविरोधित्वं मनिवेश्य पक्ष
त्वांशं कृतं तन्मतमनमाह व्याप्तिग्रहेति अत्र व्याप्तिग्रहकारणत्वमेवाभावे निवेशनं तत्तताहृशसहचारदर्शनस
हकारित्वमव्यावर्तकत्वान्तरमभिधाने च सहचारदर्शनस्य यथा व्यापकताप्रत्यक्षे स्वातन्त्र्येण कारणता सं
पूर्य साधारणव्यभिचारज्ञानाभावस्यापि कारणता तथैवेति प्रदर्शनाय व्याप्तिज्ञाने प्रमयिनाविधव्य
भिचारधियः विरोधित्वादित्यवधेयं मणिमंत्रादित्यायेन विरोधितायामस्वरसात् केचिदित्युक्तं नत्र चिन्तामणि
कारमते सत्प्रतिपक्षोऽस्यापकत्वेनाग्रसाधारणस्य दूषकत्वात् साध्यव्यापकीभूताभावप्रतियोगित्वमेवासा
धारण्यमिति न सर्वेत्यादिग्रंथासंगतिरित्यत आह प्राचामिति साध्याभाववन्नृत्तेरिति पर्वतो वह्निमान् ज
लत्वादित्यादावित्यर्थः तत्रापि यत्किंचिद्विपक्षव्यावृत्तत्वसत्त्वादितिभावः नत्र भूरनित्या गंधवत्त्वादित्यादौ प
क्षमात्रवृत्तिविपक्षावृत्तित्वाद्व्याप्तिरिति विपक्षपदस्य वा सत्त्वसाध्याभाववदर्थकत्वाभिमानमूलाशंकां निराक
रोति विपक्षत्वस्येति नत्र पृथिवीत्वपर्वतीरसादित्यादिकं जलादित्यादिकं जलादौ नीरसत्वभ्रमदशायामसाधा
रणमेव सपक्षजलादिव्यावृत्तत्वस्य तदानीं हेतोर्ग्रहादिति तत्राव्याप्तिर्वास्तवसर्वपक्षजलादिव्यावृत्तत्वास
त्वादित्याशंकामलक्ष्यतयापरिहृत्य पृथिवीति मूलं तत्रापि पाहे अनित्यत्वनित्यत्वयोः साध्यत्वे शब्दत्वस्य सद्धेत
त्व विरुद्धत्वेपि साध्यतदभावेति हेतुमति पक्षे साध्यानिश्चयेन व्याप्तिग्रहाभावात् सद्धेतौ चापि तत्र साध्याभावा
निर्णयेन साध्याभावव्याप्यत्वरूपविरोधस्याग्रहेण विरुद्धहेतावपि असाधारण्यस्य दोषत्वमुक्तमेवेत्यर्थः अ
न्यथा तदानीमपि साध्यतदभावोभयस्य तत्र निश्चये सिसाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतायाः सा
५६ ध्यनिश्चयदशायामपि सिसाधयिषासत्त्वे बाधनिश्चयदशायामपि चासत्त्वात् न तद्भंग इत्यत आह दीधितौ प

हेत्वमिति मणिकारमते विपक्षव्यावृत्तेरसाधारण्यघटकतया तन्मते ग्रन्थे तादृशानाम् स्वरूपेणोपयोगितानि
पकरणमसंगतमिति तद्घटितासाधारण्यवादिप्राचीनमते दूषणपरतया तत्संगमयति मतमिति प्राचामित्यादिः
मूले दोषद्वयमिति दोषविधया ज्ञाप्यमित्यर्थः तस्याः विपक्षव्यावृत्तेरनुगुणत्वात् प्रकृतसाध्यप्रतिकूलज्ञापन
कत्वात् प्रस्तुतविपक्षव्यावृत्तत्वेनोपन्यस्तं लिंगं व्यतिरेकिमुद्रया प्रकृतसाधकमेव स्यात् तथा च परा-
र्थ स्थले विपक्षव्यावृत्तत्वसहितं सपक्षव्यावृत्तत्वमनुज्ञाप्यत्वेन नासाधारण्ये दोषत्वमिति भावः केवलसपक्ष-
व्यावृत्तत्वे कोटिद्वयानुपस्थापकत्वेन न साध्यसंशायकं किं तु मिलितमेवेत्यज्ञाप्यमित्याशंकते न चेति संशा-
यकस्य साधारण्यं यद्यपि विपक्षव्यावृत्तत्वघटितं तथापि तादृशस्य दोषत्वेनोपपद्यते विरोधिज्ञानविषयस्यैव दोष-
त्वात् विपक्षव्यावृत्तत्वांशज्ञानस्य चाविरोधित्वादित्याशयेनाह व्याप्तीत्यादि तदभाववद्वारेव न तदभावप्रयोज-
नकज्ञानविषयतयैवप्रकारेणानुमितिजनकज्ञानसाक्षाद्विरोधिविषयत्वस्यावच्छेदः तच्चावच्छेदकत्वं
दीधितिकृत् तत्स्फुटयति तथा चेति स्वतो दूषणत्वमत्वात् श्रुतमितेत्यनतावास्तज्ञाने साक्षादेव विरोधित्वा-
त् नाभसत्वं सपक्षव्यावृत्तत्वस्यापि सहेत्वाभासत्वपत्तेन विपक्षव्यावृत्तत्वस्य दूषणानुपयोगित्वेन तदंशाप-
रित्यागेनैव हेत्वाभासतावच्छेदकायेति प्राचां निराकृतापवेच स्वार्थानुमाने सर्वं सपक्षव्यावृत्तेरेव दोषद्वय
ज्ञामित्यापि न मूलस्यापि स्वार्थानुमानेपि विपक्षव्यावृत्तेर्न दूषणौपयिकत्वं सपक्षव्यावृत्तत्वस्य सहचारधीवि-
रोधितया तथात्वेपि न हेत्वाभासत्वमित्यर्थो बोध्यः ननु सहचारग्रहविरोधित्वे व्याप्तेः सहचारघटिततया तद्ग्रहे-
पि साक्षाद्विरोधित्वमेव तस्येति न कथं हेत्वाभासत्वमित्याशंकां परिहरति पक्षधर्मिव्यावृत्तत्वं चेति निश्चित- १०
साध्यवद्व्यावृत्तित्वाभावस्त्वेत्यर्थः सामानाधिकरण्येति साध्यवद्वृत्तित्वसामान्येत्यर्थः धर्मान्तरे साध्यव

द्यकांतरसंतर्भाव्यतत्संभवात् सामानाधिकरण्यग्रहोदयात् इदन्तु पक्षेण साध्यवत्वरूपसामान्यधर्मपुर
स्कारेण तद्धर्मिणां संतर्भाव्यापि तत्संभवोऽवगन्तव्यः तथा च तद्धर्मिव्यावृत्तत्वरूपविशेषाभावग्रहस्य प्रत्येकं
साध्यसामानाधिकरण्यग्रहस्यापि तद्विरोधित्वान्न तस्य सामानाधिकरण्यसामान्यघटितव्याप्तिज्ञाने साक्षा
द्विरोधित्वमेवेति भावः अन्यथा यत्किंचिदधिकरण्यसामान्यघटितव्याप्तिज्ञाने साक्षाद्विरोधित्वमेवेति भावः
अन्यथा यत्किंचिदधिकरणांतर्भावेन सामानाधिकरण्यग्रहाविरोधिनोपि दोषत्वे सतोः समीचनयोः सा
ध्यसाधनयोः वह्निधूमाद्योः व्यतिरेकित्वं हृदादावृत्तित्वे दोषाय स्यादिति तस्यापि हृदाद्यंतर्भावेन सहचारग्रहवि
रोधित्वादिति भावः संशयायकतया विपक्षव्यावृत्तत्वघटिता साधारण्यस्य दोषत्वाशंकितः संशयात्मकज्ञानमि
ति साक्षात्प्रतिबंधकत्वमभिप्रेतं अन्यथाशंकायामनिरुक्तता यादृशः तादृशाशक्ताभिप्रायमनुद्धृत्य च व्या
प्तिग्राहकमित्यादिना तादृशस्य दोषता मणिकारो निराकार्षीत् नूतनाभंगाय तादृशाभिप्रायमाशंक्य निराक
रोति अन्यथायमित्यादिना निश्चयस्येति तादृशं तादृशविरोधिसामग्रीत्वेन विरोधिज्ञानसामग्रीत्वेन विरोधिनी तिलिंग
विपरीतेनान्वयः आदिमस्य संशयस्य व्यभिचारस्य साधारण्येनासाधारण्ये न वा विशिष्टस्य द्वितीयस्य साध्या
भावनिश्चयस्य प्रतिहेतोः साध्याभाववद्व्याप्यस्य पक्षे परामर्शः तयोः तादृशग्रहाविषयव्यभिचारसत्प्रतिपक्ष
योः अत एव व्यभिचारस्य संशापकतया दोषत्वादेव पक्षवृत्तित्वं विशेषणं यथाश्रुतमेव सम्यगिति शेषः
पक्षावृत्तेः पक्षे साध्यसंशयाप्रयोजकतया पक्षवृत्तित्वे सति तात्पर्यादिलक्षणस्यासाधारण्यस्य व्यभिचारस्य दूष
कतापक्षद्वयोपगमात् लक्ष्यत्वेन तत्राव्याप्त्यप्रसंजकत्वादिति भावः एवंच यद्रूपावच्छिन्नप्रकारताशालिनि
श्चयत्वेन साध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतापक्षवृत्तित्वे सति तद्रूपवत्वं तादृशलक्षणार्थः साध्याभा

गदा० वद्व्याप्यवत्ताज्ञानस्यनिश्चयत्वं प्रतिबध्यतावच्छेदकमिति न सत्प्रतिपक्षातिव्याप्तिः वह्न्यभाववत्त्वाद्यवच्छिन्नव
त्ताज्ञानस्यापि निश्चयत्वेन प्रतिबंधकतया न निश्चयत्वावच्छिन्ने प्रतिग्रस्तो न क्षतिः दोषविशिष्टमात्रस्याभावादित्याशयाच
तिप्रसंग इत्यवधेयं नन्वेवं पक्षवृत्तित्वेन साध्यवद्वृत्तित्वेन चाघटितस्य साध्याभाववद्वृत्तित्वस्य व्याप्तिज्ञानविरोधि
तया हेत्वाभासस्याधिक्यापत्तिर्व्यभिचारान्तर्भावादित्यत आह साध्याभावेति असिद्धिरेवेति व्याप्यत्वासिद्धिरेवेत्य
र्थः तत्त्वात्तु असिद्धित्वात् यद्यपि परामर्शविरोधित्वं साधारणस्यापि साध्याभाववद्वृत्तित्वोपघटितत्वाद्द
त्तमेव तथापि प्रमेयत्वादिविशिष्टसिध्यावति प्रसंगभंगाय तादृशविरोध्यंतरघटितत्वनिवेशस्यावश्यकत्वान्ना
तिप्रसंगः प्रतिबंधकत्वानंगीकारादिति निश्चयत्वस्याव्यंसमाजगत्तन्नयासंभयानंतरम सति विशेषदर्शने नि
श्चयत्वावच्छिन्नापत्तेरयोगादिति भावः तथा च संशयसामग्र्या अपि प्रतिबंधकत्वमसिद्धमिति भावः संशयसाम
ग्र्याः प्रतिबंधकत्वमभ्युपेत्यापि दूषयति साधारणधर्मपक्षज्ञानस्येति तन्मात्रस्येत्यर्थः नतु तन्मात्रे सामग्रीत्व
पर्याप्तिविरहेऽपि प्रतिबंधकसामग्रीघटकत्वेन तस्यापि प्रबंधकत्वमव्याहतमेवेत्यत आह सामग्रीत्वेनेति सा
तत्प्रतर्गतनपतयेत्यर्थः हेत्वाभासतायोगादिति तद्विषयस्येत्यादिः यादृशविशिष्टविषयकनिश्चयत्वमनुमि
तिप्रतिबंधकतावान्निविरुद्धवृत्तितादृशत्वमेव हेत्वाभासत्वं प्रतिबंधकसामग्रीघटकज्ञानविषयः साधारण्या १०
दिस्तु न तथा विशेषदर्शनादिकालीनतदप्रतिबंधकीभूतज्ञानेऽपि तद्विषयकनिश्चयत्वसत्त्वादिति भावः अन्य २८
थाययर्थविलक्षणपरिष्कृत्यप्रतिबंधकसामग्रीघटकज्ञानविषयस्य हेत्वाभासत्वोपपादने मेयत्वादिहेतोः सा
ध्यतदभावसहचरितत्वेयत्ववान्पक्ष इत्यादिज्ञानविषयस्य दोषतायाः दुष्टत्वात् सर्वत्रेति तथा च धूमादिहेतौ
तस्यादोषत्वेन नैषापत्तिसंभवः आभासीभवेदिति धूमादिहेतुकानुमितावपि तज्ज्ञानस्य संशयसामग्रीत्वेन

प्रतिबंधकत्वादिति भावः विरोधिज्ञानसामग्रीविषयायस्य ज्ञानं प्रतिबंधकं तत्राभासतामायाय विरोधिज्ञा
नसामग्री विषया प्रतिबंधकस्य विषयस्य तामापादयतीति तथैति प्रयोजकत्वं जनकज्ञानकज्ञानविषयत्वं वि
पक्षव्यावृत्तत्वस्य व्याप्तिपक्षधर्मतायहायविरोधित्वेनाननुज्ञावनीयतायाः प्रागेवव्यवस्थापितत्वात् किंचेत्यादि
ग्रंथस्यतत्परत्वेन चटते पौनरुक्त्यप्रसंगात् नचसर्वमत्वपिनिदृष्टांतासंभवेन नूनतायावश्यकतयानतदुद्भावनेनि
पकतमितिनपौनरुक्त्यप्रसंगइति वाच्यं एवमपिव्यतिरेकिणि व्याप्तिपक्षधर्मत्वाप्रतिक्षेपकतयानतदुद्भावननिग्रह
हमितिनपौनरुक्त्यप्रसंगइतिवाच्यं एवमपिव्यतिरेकिणि व्याप्तिपक्षधर्मत्वाप्रतिक्षेपकतयानतदुद्भावननिराकरणे
पौनरुक्त्यस्यदुर्वारत्वादित्यतः केवलसपक्षव्यावृत्तत्वोद्भावननिराकरणपरतया किंचेत्यादि मूलं भवतामयानित
वमिति एवं उक्तप्रकारेण विशिष्टस्य विपक्षव्यावृत्तत्वविशिष्टस्य नतु साधनविकलस्यापि यदादेर्विशेषादर्शनदशाया
मिवविशेषदर्शनदशायामप्याहार्यसाधनवत्त्वभ्रमादिना दृष्टांतविधयोपन्यासः संभवेत्तथैवेतितत्रनूनतां विरहे
णसाधारण्योद्भावनेसार्थकं नचतत्र दृष्टांतस्य साधनवैकल्योद्भावनेनैवचारितार्थत्वसंभवादसाधारणत्वादेः
त्वांपुत्रोकांतिवेस्य तिवाक्यपादर्शिनेतियावन्निश्चितसाध्यवतिसाधनवैकल्यमसाधारण्यमेवेतिवाक्यपदर्शितना
भिधानपक्षदोषे साधनवैकल्यस्ययावन्निसाधनवैकल्यानतिरिक्ततयातस्यासाधारण्यत्वनिषेधासंगतेस्तदुद्भा
वने असाधारण्योद्भावनत्वप्रतिषेधः सपक्षांतरवृत्तित्वेपीतिहेतोर्विशेषात्तत्संभवात् वाक्यपदर्शितस्य दृष्टांतस्य
दृष्टांतस्यसाधनवैकल्यस्यसंभवात् नन्वेवं दृष्टांतस्यसाधनवैकल्यं हेत्वाभासबहिर्भूततयाव्यापिनोद्भाव्यमेतेत्यत
आह तदुद्भावनेत्विति तन्नु प्रतिज्ञाहानिः प्रतिज्ञांतरमित्यादिनिग्रहस्थानमिति भावः नन्वयथा चंदरत्यादिदृष्टांत
प्रयोगस्यसमयबंधीनत्वेनानियमितत्वान्नद्धन्यमेवोदाहरणं प्रयुक्तं तत्रैवासाधारण्यमनुद्भावनीयमित्यत आह स्था

व्यापकश्चेति तथा च तदप्रयोगे न्यूनत्वमेवेति भावः मूले ज्ञानमित्यस्य पक्ष इत्यादिः व्यतिरेकिनयेत्यनेन तदेवाका
ङ्क्षान्वेषणादित्यस्यार्थापत्तिविपत्तिविधयेत्यर्थो न संगच्छते अर्थापत्तिव्यतिरेक्यनुमानोभयविधया साधकत्व
स्यैकमतेऽसंभवादित्यतोन्यथा तद्व्याचष्टे अर्थादित्वीति व्यतिरेकित्वेऽर्थाधीनत्वात् व्याप्यधर्मनिषेकं तेऽव्य
न्यस्य योजयति व्यतिरेकिमुद्रया अर्थादिति साधयेदिति संभाव मान्यो लिङ्गसिध्युपधानसंभावना च योग्यप
ताधीना इत्यर्थः तः सालम्भनरत्या शयेन व्याचष्टे अर्थवशेनोभयसाधकत्वं उभयसिद्धियोग्यत्वं परस्परसिद्धिसा
मग्रीरूपपरस्परसिद्धिप्रतिबंधकाभावातिरिक्तोभयसिद्धिसामग्रीसमवधानमिति यावत् मूले ज्ञानमित्यंतेन हे
तुगर्भविशेषणमिति स्फुटयति उभयेनेति मूले अन्यथेति साध्यतदभावव्यापकीभूताभावप्रतियोगित्वेन ज्ञात
स्यविरोधिसामग्र्यतिरिक्तप्रतिबंधकासमग्र्यभावातिरिक्तं साध्यतदभावसिद्धिसामग्र्यसमवहितत्वे पक्षवृत्ति
त्वानुपपत्तिरिति पक्षवृत्तितया ज्ञातत्वानुपपत्तिरित्यर्थः इति साध्यतदभावोभयव्यापकतया असाधारणो दोष
इति मूलार्थं दीधितिकृद्व्याचष्टे एवं चेत्यादिना तत्र साध्यतदभावव्यापकीभूताभावप्रतियोगित्वनयोर्मिलितो
भयसिद्धिसामग्री न्वष्टां कानिराकरणाव साध्यतदभावव्यापकीभूताभावप्रतियोगित्वज्ञानानन्तरं उभयसाध
नायोन्यत्र इति संदेहयोक्तिरूपेहितावि सेधनपरस्परविरोधेन नैकमपि साधयतीति असाधारण इति दोषः २७
एवं च साधकत्वमेव हेतोर्दोषत्वमित्यवधेयं संदेहे हेतुवृत्तायां व्यापकत्वेति उभयव्यापकतया त्यस्य शब्दत्वाभावस
योभावः शब्दत्वं तद्वृत्तित्वरूपस्य व्यभिचारस्येत्यर्थः संदिह्यमानत्वादिति अज्ञानसंशयेन विषयीकरणादित्यर्थः
आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वादिति भावः एतच्च व्याप्यधर्मिकव्यापकाभाववद्वृत्तित्वज्ञानमेव व्या
पकताग्रहप्रतिबंधकमित्यभिमानेन वस्तुतस्तु तादृशज्ञानवद्व्यापकाभाववद्वृत्तित्वज्ञानमेव व्यापकताग्रह

प्रतिबंधकमित्यभिमानेन वस्तुतस्तत्ताहृशज्ञानवद्व्यापकाभाववद्धर्मिकव्याप्यवत्त्वाज्ञानमपि प्रतिबं
धकमसमानप्रकारकत्वस्याविशेषादिति कथितं संशये शब्दत्वहृत्तितया नित्यत्वाद्यभावेपि न तन्निरित्यव
धेयं ताशेषादिति कथितं संशये शब्दत्वहृत्तितया नित्यत्वाद्यभावेपि न तन्निरित्यवधेयं ताहृशेति शब्दे ।
नित्यत्वसंशयाभावदशायां घटगगनादौ शब्दत्वाभावे प्रत्येकमुभयसहचाराज्ञानात् तथात्वनिश्चयेश
ब्दत्वाभावे उभयव्यापकतानिश्चये सति तज्जन्यसंस्कारात् शब्दे साध्यसंदेहदशायामपि ताहृशव्यापकताद्व
यस्मरणेऽव्यापकत्वाभानसंभवेन व्यापकीभूताभावप्रतियोगिशब्दत्ववत्त्वस्य शब्दे प्रतिसंधाने निश्चयप्रा
पकत्वादित्यर्थः गगनघटादौ शब्दत्वाभावे नित्यत्वतदभावसाहचर्यग्रहः शब्दत्वोपस्थितावेव संभवति शब्दत्व
ज्ञानं प्रतीतौ च व्याप्तिमानं नियतमिति शब्दे नित्यत्वतदभावसंशयजनकं धर्मिज्ञानमेकतरकोट्युपस्थि
तिस्त्ववर्जनीयेति कारणांतराभावादेव न तत्र संशयविरहः अतो यत्साध्यहेतुके हेत्वभावे साध्यतदभावयोः
साहचर्यं गृह्यमाणे हेतुमतो धर्मिण उपस्थित्यनैयत्यं तत्र धर्मिताभावे नैव हेतुमति न साध्यतदभावसं
शय इति नाहृशस्थले त्वभावे साध्यतदभावव्यापकताग्रहे सो कथं माहुश्चाश्रयमिति सहचारेण सहचारग्रहे
णताहृशाभावेति पृथिवीत्वमदभावप्रतियोगितया गृह्यमाणे हेतुसत्प्रतिपक्षएवेति विरोधिव्याप्तिपक्ष ।
धर्मताज्ञानमतिरुद्धकामकत्वादिति भावः तथा च नासाधारण्यस्य स्वतंत्रदूषणतेति भावः नन्वविरोधि
व्याप्तेरन्वयव्याप्तित्वे सत्प्रतिपक्षतापत्तिः प्रयोजकमिति नात्र सत्प्रतिपक्षतेत्यत आह व्याप्तेरिति अन्वयनि ।
रूपितत्वस्य साध्यसाधनोभयनिरूपितत्वस्य व्यापकत्वे न व्यतिरेकिणा हेतुत्वं न तेन यत्र सत्प्रतिपक्षतात्त
स्थलसाधारण्याभावेन पक्षेन एवं विधेति यत्र हेतुत्वं न तेन प्रतिरोधस्तत्र सत्प्रतिपक्षतापत्तेश्च हेतुनेचत्वकार्यप्र

तिरोधस्तत्र तदन्यहेत्वाभासत्वेनाभिधानदूषणमित्यर्थः अतिप्रसंगात् पक्षान्वयिना हेत्वंतरेण प्रतिरोधस्तत्र न तदन्यहेत्वा
भासत्वेनाभिधानदूषणमित्यर्थः अतिप्रसंगात् पक्षान्वयिना हेत्वंतरेण प्रतिरोधः स सत्प्रतिपक्षः पक्षे च व्यतिरेकिणा हे॰
त्वंतरेण प्रतिरोधः स हेत्वाभासांतरमित्यप्रसंगात्तदभावसाधकस्यादेः प्रकृते पक्षहेतोरस्य पृथगभिधान॰
स्येत्यादिः अप्रसिद्धिविशेषोऽतिप्रसक्तिः उभयलक्षणाक्रांततया उभयोरंतर्भावस्येति यथा सत्प्रतिपक्षल॰
णाक्रांततया सत्प्रतिपक्षतया तथा सव्यभिचारलक्षणाक्रांततया तथात्वस्यापीत्यर्थः अविरुद्धत्वादिति त
थाच सव्यभिचारसामान्यलक्षणाक्रांततया तथात्वस्यापीत्यर्थः अविरुद्धत्वादिति तथाच सव्यभिचारमध्ये
वप्येवं विभजनीयं तथा साधारणानुपसंहार्यविभिन्नस्य पक्षे नित्यः शब्दत्वादित्यादेरसाधारणत्वेन विभजनं यु
क्तमेवेति भावः कश्चिदित्यस्वरसः सूचितः सर्वासाधारणस्यात्रमित्यत्र प्रयोजकं दर्शितबीजमनाहत्य सत्प्र
तिपक्षांतर्भावस्वीकारे व्याप्तिज्ञानविरोधित्वघटितस्य तद्व्यावृत्तस्येव साधारणसंग्राहकसव्यभिचारसामा॰
न्यलक्षणस्येव संभवेन प्रयासेन संग्रहालंबनादनुमितिविरोधिताघटितसाधारणसव्यभिचारसामान्यलक्षणस्य
तिर्यक्तिकतया तस्य सव्यभिचारांतर्भावासंभवात्सपक्षपदस्य निश्चययगर्भार्थकत्वे सत्प्रतिपक्षोत्थापकताना॰
संभवति व्याप्तेर्ज्ञानगर्भत्वादित्यतस्तथाचैव सपक्ष इति पक्षवृत्तित्वाविशेषितस्य साध्यव्यापकीभूताभावप्र॰ २७
तियोगित्वस्य यद्धर्मवृत्तित्वं हेतौ ज्ञायते इत्यादिरीत्या सव्यभिचारसामान्यलक्षणाक्रांतत्वेपि अनुमितिप्रतिबं॰
धकतानतिरिक्तवृत्तिविषयिताकत्वाभावेन न हेत्वाभाससामान्यलक्षणाक्रांतत्वं अनुमितिविरोधिताशून्यपक्ष॰
धर्मताज्ञानवृत्तिविषयिताकत्वरूपप्रतिबंधकतानतिरिक्तवृत्तित्वं सामान्यलक्षणे निवेश्य हेत्वाभाससामान्यल
क्षणाक्रांतत्वसंपादनसंभवेपि तादृशप्रयासस्य गौरवग्रस्ततासाधारण्यपीरे पक्षवृत्तित्वमंतर्भाव्य प्रतिपक्षवृत्तित्वे॰

सन्तीति यद्यप्येवं सव्यभिचारसामान्यलक्षणस्य यद्धर्मिवृत्तित्वमित्यादिना कथादिसाधारण्यप्रकारेण सं
भवति पक्षवृत्तित्वघटितासाधारण्यस्यापि धर्मिविशेषानियंत्रितत्वात् नाहपूर्वरीत्यादृष्टेनिरुक्तसाधारण्यस्यैवा
संग्रहापत्तेः तथापि प्रकृतपक्षतावच्छेदविशिष्टे प्रकृततावच्छेदकविशिष्टवैशिष्ट्यावगाहिप्रकृत।
हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाननिरूपितायां निरुक्तसाधारण्यविषयकतायां नवच्छिन्नप्र
तिबंधकतानतिरूप्यत्वे सति सद्धेत्वालंबनानुमितिविरोधित्वस्य बाधप्रतिरोधव्यावृत्तस्य निरुक्तसाधा।
रणस्य सव्यभिचारसामान्यलक्षणत्वसंभवात् साध्यवद्व्यावृत्तत्वपदेन इदं वृत्तित्वं तदा शब्दो नित्यः।
श्रोत्रग्राह्यत्वे सति गुणत्वादित्यादौ विशिष्टस्य गुणत्वादेः केवलान्वयितया नित्यत्ववद्वृत्तित्वेनोपप।
द्यत इत्यव्याप्तिः एवं साध्यवद्वृत्तित्वे सामानाधिकरण्यग्रहविरोधितया व्याप्तिग्रहविरोध्येवेति न सत्प्र
तिपक्षोत्थापकत्वमतो व्याप्तत्वात् तं वाचष्टे साध्यव्यापकइति विरोधरूपोपाधेः साध्याभावव्याप्यत्वा
पत्वे सोपि साध्यव्यापको भूताभावप्रतियोगित्वमिति संकर इत्याशंकां निराकरोति साध्यसामानाधिक
रण्याद्यानहेतुनिष्ठसाध्यसामानाधिकरण्यादीत्यर्थः आदिना साध्यनिष्ठहेतुसामानाधिकरण्यपरि
ग्रहः नन्वेवं विरोधस्य विरोध्यविषयकत्वेनानुमित्यविरोधितया न दोषता स्यादित्यत आह अन्यथा व्याप्तीति
साध्यहेतुसामानाधिकरण्यं च दिनव्याप्तीत्यर्थः पक्षावृत्तित्वप्रवेशाप्रवेशाभ्यामपि भेदसंभवात् शंका।
नैतज्जैशब्दोऽनित्यः शब्दत्वादित्यादौ वास्तवसाध्यवद्व्यावृत्तत्वाभावेनाव्याप्तिशंकामलत्यनतयापरिहरति
साध्यसामानाधिकरण्येत्विति नन्वदर्शितस्थलेपि दशाविशेषे असाधारण्यज्ञानेनानुमित्यनुत्पादाद्दोषतो।
इष्टतायामावश्यकत्वे कथमलक्ष्यत्वमित्यत आह दशाविशेषेयइति तद्भ्रमः असाधारण्यभ्रमः प्रकृ।

घटो घटाव न त्वत त्व हेतोर्ड्र ए तेत्यर्थः प्रतिबंदी ग्रह वनाय ग्रहणेत माह व्याप्य इतिमिश्र व्याख्यानमप्यस्येति नवी
नाइति सामग्रीद्वयविरोधनेति हेत्वभावे साध्यतदभावव्यापकत्वग्राहके सामग्र्योः परस्परजन्यफलप्रतिब
धकत्वेनेत्यर्थः ग्रहविरोधो ग्रहानुत्पादेः असाधारणस्य हेतो हेतुकता यां बीजं व्यापकतयोर्विरोधएव पर
स्परग्राहकसामग्र्याः परस्परग्रहप्रतिबंधकत्वसंभवतीति विरोधमेवोपपादयति तथाहीति क्वचिदधि
करणे वर्तितव्यमिति हेत्वे रधिकरणानि ज्ञापितत्वनियमादिति भावः तत्र च तदधिकरणे च साध्यतदभा
वयोरन्यतरेणावश्यं भवितव्यं प्रतियोगिभावयोरेकासत्वे परसत्वनियमादिति भावः तत्राधिकर
णेन हेत्वभावः संभावति प्रतियोगिवृत्त्याविरोधादिति भावः अतो हेत्वभावस्य तत्रासत्वादन्यतरव्याप
कत्वं साध्यव्यापकत्वसाध्याभावाव्यापकत्वयोरन्यतरवत्वेन तस्य हेत्वभावस्य तयोर्मध्ये त्वधिकरणे
यस्यास्थिति तद्व्यापकता यास्तदभावे असंभवादिति भावः एवंविधविरोधयो व्येयंवद्रीत्यानित्या
नित्यत्वतदभावव्यापकतायोः प्रावृत्त्याभावादेयेकसत्वे अपरासत्वनियमे सहाचरज्ञानमितिव्या
पकतायोः प्रावृत्त्याभावादेयेकसत्वे अपरासत्वनियमे सहाचरज्ञानमिव्यापकताग्रहकारणीभूत
गगनघटादौ सामानाधिकरण्यज्ञानमित्यर्थः विरोधिग्रहसामग्र्याः प्रतिबंधकत्वे हृष्टोतेनहृष्टपतिविरोधी
ति साध्यतदभावौ न ग्राहयतीति अत्र घंगेणात्वयः अवृत्तिवारणाय वृत्तिमत्वमिति सापक्षविपक्षव्यावृ
त्तेत्वयावत्सपक्षविपक्षनिष्ठावप्रतियोगित्वेन तु हेत्वभावत्वरूपेण सहचारज्ञानमेव तेन रूपेणव्यापक
ताग्रहकतया व्यापकत्वांतरग्रहविरोधीति तद्विषयस्यैव दोषत्वमविनाप्रायेनाहवृत्तिमदिति उभयव्या
पकीभूताभावप्रतियोगित्वज्ञानविषयत्वं भ्रममादायोभयासहचरितसाधारणमिति नो भयसाहचर्येत्र

पतयाव्याप्त्येयोभयसाधकत्वापादकत्वमतोव्याघ्रचेष्टज्ञानयोरपीति उभयसाधकत्वे उभयसाहचर्यं नृपव्य-
तिरेकानुमानत्वमप्रयोजकमिति व्यतिरेकिनयेऽन्यमथाव्याघ्रचेष्टव्यतिरेकिनियेताहृशेतिसाध्यनदूभावव्याप-
कीभूतेत्यर्थः यद्यपि ताहृशव्यतिरेकप्रतियोगित्ववत्त्वात्मोभयसहचरितं स्यादित्यनयवताहृशप्रतियोगि-
तायाउभयसाहचर्यप्रयोजकत्वंलभ्यतेतथापिअपत्तिमूलभूतव्याप्तिप्रदर्शनाय व्यतिरेकिनये पुनर्मूलेभिहितं-
मित्यवधेयं अनेनोभयसाधकत्वस्य हृत्वा तुभये साध्ये हित्यस्यार्थमाह उभयसहचरितेनेत्यवेहितियद्यपिहृतिमत्व-
विशेषितैककोटिव्यापकाभावप्रतियोगित्वस्य च तद्गतत्याअपरकोटिव्यापकाभावप्रतियोगित्वविरुद्धत्वेपि वि-
रोधाप्रतिसंधानदशायांनैकग्राहकसामग्र्याअपरग्रहविरोधित्वमितिदर्शितंतर्कावतारेणैवविरोधप्रतिसंधान-
मसाधारण्यदशायामगीकार्यं यद्यपि व्यतिरेकिनरीत्यातदवधारणेचेत्यादिनानयाचशब्देतित्यत्वानित्यत्वयोः
संदेहेसहृत्वेतदुभयचार्यमपिसंदिग्धमेवेति द्रष्टायमिथ्यां कथानोक्ता तर्कावतारसंभवः तदुभयेकाधिकरण-
वृत्तित्वस्य चाप्रसिद्धाने पत्तिसंभवः अप्रसिद्धस्यव्याप्त्यवधारणासंभवात् एवमुभयव्यापकीभूताभावप्र-
तियोगित्वमहृष्टौ प्रसिद्धं तत्र नोभयसाहचर्यमितिविरोधएवापाद्यापादकयोः कथमापत्तिः वृत्तिमत्वेसति
उभयव्यापकीभूताभावप्रतियोगित्वंवाप्रसिद्धंवृत्तिमत्वेसतितत्तत्कोटिव्यापकीभूताभावप्रतियोगित्वंवा
प्रसिद्धंवृत्तिमत्वेसतितत्तत्कोटिव्यापकीभूताभावप्रतियोगित्वेनप्रत्येकंतत्तत्कोट्युभावसाहचर्यापत्तौचेष्टा-
पत्तिर्शंकायाअनिहृत्तिरितिमहदसमंजसंतथापिजलत्वादौवृत्तिमत्वेसतिव्यद्वपरत्वाद्युभयव्यापकाभावप्रति-
योगित्वेतदुभयाभावद्वयसहचारमवधार्यसामान्यतःआपाद्यापादकयोर्यंवृत्तिमत्वेसतियदुभयव्यापका-
भावप्रतियोगितत्प्रत्येकंतदुभयाभावद्वयेकाधिकरणवृत्तीव्याप्तिरवधार्यतेतेनतस्यापाद्यत्वादौवृत्तिमत्वनित्यत्व

तदभावव्यापकाभावप्रतियोगित्वानामाहार्यज्ञानानित्यत्वतदभाववद्वृत्त्येकाधिकरणवृत्तित्वादिरूपमित्यप्रसिद्धिवि
शेषापत्तिः स्वत्वमेव सामान्यव्याप्त्यधीनविशेषानुमिताविव तदधीनविशेषानुमिताविव तदधीनविशेषापत्तावपि
विशेषप्रसिद्धेरनैगत्यात् नचोक्तायाया अप्रसिद्धौ प्रतियोग्यप्रसिध्याप्राप्तयव्यतिरेकानिश्चयासंभवेन नाप
त्ववनारसंभव इति वाच्यं विशिष्टविषयकापत्तौ विशेष्ये विशेषणाभावनिश्चयस्यापि विशिष्टधीकानिवर्तक
त्वेन हेतुत्वाधिकरणे नित्यत्वाभावो भवतु वत्वनिश्चयादेव तादृशापत्तिसंभवात् मूले व्यतिरेकिता येति यद्या
त्वेदं वैदृष्टिनं तत्वस्फुटीकरोति व्यापकाभावतीति प्रतियोगिनोऽभावाभावत्वाप्रकृतत्वे बोध्यं अन्य
येत्यस्य विवरणं न तथाभाव इति शब्दत्वस्यैकाधिकरणे उभयाभावे तस्यावृत्तित्वे चेत्यर्थः उभयत्वेवोक्तापा
द्यसत्वविरहात् अवृत्तित्वपक्षे एव शब्दत्वरूपपक्षधर्मतया अत्रपयत्तिर्न तु शब्दत्वाधिकरणे तदुभयाभाव
सत्वपक्षे तथात्वमिति उभयाभावस्य विपर्ययेण तदुभयरूपं तथा शब्दत्वाभावे तदुभयपकत्वाया पत्तानुपपत्ते
रिति मूलन्यूनता भंगायमूरयति व्यप्रेवेति इष्टापत्तिशंकाविरहं स्फुटयति तच्च तथाभाव इति तथा चेष्टापत्तिशं
काविरहेण शब्दत्वे नित्यत्वानित्यत्वोभयाभाववदधिकरणकत्वेन मिलितापादकानां वृत्तिमत्वनित्यत्वत
दभावव्यापकीभूताभावप्रतियोगित्वानाम भावे साधानीयेनित्यत्व तदभावव्यापकाभावप्रतियोगित्वयोर्द्व ३५
योरभावः पक्षधर्मताबलात् शब्दत्वे सिद्ध्यति अयमेव विरोधग्रह इति भावः न च वृत्तिमत्वाभावमादायैव न कथं पर्य
वसानमित्यत आह नवापक्षवृत्तित्वं बाधितमिति तथा च वृत्तिमत्वानिश्चयात्तु तथा पर्यवसानमिति भावः एतन्म
ते साध्यतदभावो व्यापकतत्पक्षस्य साध्यतदभावसिद्धिसामग्रीसमवाहिततये त्यर्थेन संभवति व्याप्यमहाभावे
न तादृशसामग्र्यसंभवात् अतोऽन्यथा व्याचष्टे साध्यतदभावेति टेघरत्यस्य व्याप्यव्याप्तियह प्रतिबंधक इति व्या

सिमहविरोधिधर्मेवानित्यर्थः एतन्मतेऽसाधारणोसत्प्रतिपक्षाविशेषाशंकानवकाशात् आशंकांतरेणासत्प्रतिप
तिपक्षइत्यादिमूलमवतारयतिनन्विति विरोधिव्याप्तिद्वयं साध्यतदभावनिरूपितव्याप्तिद्वयंनगृह्यतेग्राहका
सामग्रीद्वयविरोधेनएककालानगृह्यतेसत्प्रतिपक्षोच्छेदइतिपरस्परसामग्रीविरोधेनविरोधीकोद्युरस्तुमितिप्र
तिबंधोच्छेदइत्यर्थः गृहीतेतिहितद्वयधर्मिकतत्तदभावव्याप्तिग्रहाधीनत्वादित्यर्थः रूपकतायामउपयोगा
दितियत्किंचिदधिकरणेसाध्यहेतुसामानाधिकरण्यस्यापिव्यापकताग्राहकत्वेनदार्ष्टांतीयादोषत्वेऽधिर
णपावत्वस्याप्रयोजकत्वादित्यर्थः ननुयत्किंचित्सपक्षादौतोग्रहेतादृशाव्यभिचाराप्रतिबंधाद्धेत्वभावेसा
ध्यादिव्यापकताग्रहोनसंभवतीतियावत्सपक्षादौहेत्वभावग्रहोव्यभिचारग्रहविरोधितयाहेत्वभावेसाध्यादिव्या
पकताग्रहकंइतिकथंपावत्वानुपयोगइत्यतआहव्यभिचाराग्रहइतियावत्सपक्षादौहेत्वभावग्रहस्यव्यभिचार
ग्रहमात्रसंपादकत्वेन व्यापकताग्रहेऽनन्यथासिद्धत्वादित्यर्थः तथाचपावत्त्वघटितासाधारण्यज्ञानत्वेनप्र
तिबंधकज्ञानाजनकतयानतेनरूपेणप्रतिबंधकत्वमपीतिनतादृशासाधारण्यस्यदोषतासंभवः सहचारज्ञान
विषयव्यापकताग्रहकज्ञानेविषयस्ययत्किंचित्सपक्षविपक्षयोर्हेत्वभावस्यदोषत्वेवह्निमान्धूमादित्यादावपि
हृदजलह्रदादिनिष्ठधूमाभावादेरसाधारण्यताप्रसंगइतिभावः ननुवृत्तिमत्त्वेसतियावत्सपक्षविपक्षनिष्ठात्य
न्ताभावप्रतियोगित्वस्यहेतौज्ञानंवृत्तिमत्प्रतियोगिकत्वेसतियावत्सपक्षविपक्षवृत्तित्वस्यहेत्वभावेज्ञानंचतत्त
द्रूपेणव्यापकताग्रहाजनकमपिव्यापकताग्रहप्रतिबंधकमास्थीयते: साधारण्यज्ञानदशायांव्यापक
ताग्रहानुत्पादस्यानुभवसिद्धत्वादित्यतआहवृत्तिमत्त्वादितिविरोधिविषयकत्वाभावादिति तथाचतादृशासाधार
ण्यज्ञानकालेव्याप्तिग्रहानुत्पादएवनानुभविकविरोधिविषयकज्ञानकालएवज्ञानानुत्पादस्यानुभविकत्वा

गद्य० दिभावः उपदर्शितविरोधस्यैककोटिव्यापकत्वे तद्भावरूपापरकोटिव्यापकत्वानुपपत्तिरूपस्य साध्याभावादि
व्यापकताप्रतियोगिकविरोधस्य तद्वीजः साधारण्यस्य च तदेकहेत्वाभावनिरूप्यावत्त्वस्य पत्ररूपित्वाद्यैश्च नंत
५८ भावात् सत्वात् तथा चैव्याप्यस्य साधारण्ययोर्मिथो विरोधिरूपत्वाभावादिति पर्यवसितार्थः नन्वसाधा
रण्येन समं व्याप्तेर्विरोधेपि हेत्वितद्भावनिरूप्ययोर्मिथो विरोधात्तयोरेकदानिश्चयो ऽनुभवविरुद्धः एवं चासाधा
रण्यग्रहदशायां पक्षे व्यापकताग्रहः स्यात्तदा विशेषेण व्यापकताग्रह एव स्यादित्यगत्या साधारण्यग्रह
स्यव्यापकताग्रहविरोधित्वमास्थियमित्यत आह व्यापकतयोरपीति न ह्यनयोर्विरोध इति न विरोधाग्रहदशायां
भावाभावयोर्विषयतापत्तिस्तु याविषयत्वमित्यर्थः ननु उक्तरीत्या विरोधावधारणदशायोक्तापत्तिस्तुप
चारेणैव तादृशप्रतिबंधकताकल्पनभावश्यकमित्यत आह दूषितरीत्येति अव्यवश्यकं उभयस्य कल्प्य प्रतिबंधक
ताकं च व्यभिचारज्ञाने हेत्वभावाभाव[त्प]वद्धेतुमत्तिनित्यत्वतदभावसंशयात्मकसाधारण्यज्ञाने प्रतिबंधकं हेत्वभा
वे नित्यत्वतदभावव्यापक[ता]ताज्ञानं तु साध्यनिर्वाहकं तस्यापि तत्र नियमेन कल्पनसंभवात्तथा च न तदनुरोधेनाप्य
साधारण्यज्ञानस्य प्रतिबंधकताकल्प्यते इति भावः अत एव तादृशस्थले वासाधारण्यधीमात्रेण व्याप्तेर्ग्रहप्रतिबंधा
देव भवति व्याप्तिधीरिति असाधारण्यज्ञानेन कोटिस्मरणजनकत्वादिति भावः असाधारण्यज्ञानस्य प्रतिबंधकत्वेन
अतर्कस्य किंचित्करतया व्याप्तिधीरिति साधारण्यज्ञानेन कोटिस्मरणजनकत्वादिति भावः असाधारण्यज्ञानस्य प्र
तिबंधकत्वे तत्र तर्कस्याकिंचित्करतया व्याप्तिग्रहासंभवात् तदुपष्टंभसंगतिः एतेन लाघवप्रतिबंधकतयैव निर्वा
हेणानुकूलवलविरोधिव्याप्तिग्रहसामग्रीत्वेन विरोधिव्याप्तिग्रहासाधारण्यानन्त्यकारणसमवायत्वेन नत्वसा
धारण्यज्ञानत्वमात्रेण तर्कवता रेणपकारिणोपनैवनकांचतनेनतुल्यवलनैवसकलकारणासंवलनमेवना।

त्वीति विरोधिव्याप्तिग्राहकस्य तर्कस्यानुकूलतर्काभावसहितस्य प्रतिबंधकतया तदभावस्यापि सा
मग्रीघटकत्वादिति भावः अतो न तत्र व्याप्तिग्रहानुपपत्तिरिति शेषः उपयोगित्वात्तदुक्तस्यत्वे व्याप्तिग्रहे
उपेक्षणीयत्वोपपत्तेः अतिरिक्तप्रतिबंधकताकल्पयितृत्वानवोक्ततर्कावतारस्य नियतकालिकत्वादिति शेषः
केचित्तु तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेनेति स्वसमानकालीनप्रकृतव्याप्तिग्राहकसामग्रीया
वत्कारणघटिता तावत्कारणाघटिता तावत्कारणघटिता या विरोधिव्याप्तिग्राहकसामग्री तत्त्वेनेत्यर्थः
तुल्यबलत्वे च विरोधिव्याप्तिग्राहकसामग्र्यां नास्ति तद्व्याप्तेस्तर्कासत्त्वेन न्यूनत्वादिति भावः तर्कस्येति तथा च
तर्कस्य व्याप्तिग्रहकारणत्वाभावात् तत्सत्त्वासत्त्वेन न्यूनाधिकबलभावाभावहेतुरिति व्याचक्रुः हेत्वाभासत्वा
योगाद्वेति प्रागुपदर्शितातिप्रसंगादिति भावः नन्वेवं सत्प्रतिपक्षस्य हेत्वाभासत्वानुपपत्तिरित्यत आह सत्प्रतिप
क्षे चेति विरोधीति ग्राह्याभावादीत्यर्थः नन्वेवमुभयव्याप्यवत्तानिश्चयदशायामेकसाध्यस्य बाधावतारेपि
साध्यांतरस्यानुमानप्रसंग इत्यत आह बाधावतारेति निश्चव्याप्यत्वादित्यादिनापक्षधर्मत्वपरिग्रहः एतेन ज्ञा
नेच व्याप्तिविशिष्टहेतुमत्ताज्ञानविशेषणतापन्नविशेषताधर्मिविशेषणतया बोध्यं तथा च प्रतिहेतूपराम
र्शे व्याप्याद्यंशेः प्रामाण्यज्ञाने इति पर्यवसितार्थः पक्षे तत्साध्याभावनिश्चये पक्षविशेषणतापन्नहेतौ चैतत्सा
ध्यव्याप्तिप्रकारकपरामर्शीयहेतुविषयतायां साध्याभाववत्पक्षविषयतानिरूपितत्वग्रहेण ततस्तत्त्वदशायामनुमिति
ष्टत्वव्याप्यभाववद्विशिष्टत्वान्यतरवत्त्वेन तद्विशेषणतायामनुभावेशाक्यतर इति चाद्यनिश्चयस्य परामर्शः प्रा
प्रामाण्यग्राहकता बोध्या एतेनाव्याप्यत्वादिज्ञानस्यानुमितिविरोधिव्याप्यवत्ताज्ञानसत्त्वेनाकिंचित्करतया व्याप्य
वत्तापरामर्शेण प्रतिबंधाद्युद्घट्टनाचेत्यसंगतिरिति परास्तं अप्रामाण्यज्ञानेः व्याप्यत्वादेर्धर्मितावच्छेदकानवा

छिन्नपर्वतेहेतोर्भानात्तस्यव्याप्त्यादिनिश्चयाप्रतिबंधकतयाविरोधिनिश्चयोत्तेजकीभूतत्वसमवधानेप्रकृतस्याध्या

नुमितिसंभवात् सर्वमभिधेयंघटत्वादित्यादित्यादेः केवलान्वयिसाध्यकस्यापिननिर्दोषत्वरूपंसद्धेतुत्वंसर्व
मनित्यंघटत्वादित्यादेर्व्यतिरेकिसाध्यकस्यापिनसाधारणत्वमतोहेतुविशेषपरतयासद्धेतुत्वात्साधारण०
त्वादिनिर्मूलयति सद्धेतुत्वमितिन्यूनताभेगायव्यतिरेकिसाधनस्थलस्यैतोष्वयंनिप्रकारोतिव्यतिरेकि
णश्चितिभागासिद्धत्वंसर्वपक्षकस्यसर्वस्यैवव्यतिरेकिणः साधारणत्वविरुद्धत्वयोरसंभवे सर्वमनित्यंसंद्
व्यत्वाद्गगनत्वादित्यादेर्वोध्येकेवलान्वयिसाध्यकसद्धेतुवारणायेतितस्यसद्धेतुत्वेनालक्ष्यतायाः प्रा०
गभिहितत्वादितिभावः व्यतिरेकिसाध्यकेतिपर्वतोवह्निमान्धूमादित्यादीत्यर्थः सद्धेतुत्वंप्रकृतदोषरहितत्वं
प्रकृतदोषरहितत्वंतेनपर्वतोधूमवान्वह्नेरित्यादेर्वारणीयत्वेपिनन्यूनतापत्तत्वपरिसंदिग्धसाध्यकात्वेन०
दाकेवलान्वयिनिसाध्येपक्षनिष्ठाभावप्रतियोगित्वसंशयमादायपक्षतासंपादनसंभवेपिसत्यंतवैयर्थ्यं०
दुर्वारमेवकेवलान्वयिसाध्यकेपिसंशयरूपायांपक्षतायांअनुपसंहारित्वस्यैवेनतद्व्यावर्तकविशेषणदानानौ०
चित्यात् अतएवसिद्धांतलक्षणेसंदेहात्मकपक्षत्वघटितेपक्षताहृदयविशेषणंपरिसत्तमेवेतिपक्षत्वमन्यथा
व्याचष्टेपक्षत्वमितिसाधकबाधकमानसत्त्वमितिसाध्यनिश्चयबाधनिश्चयाभाववत्त्वमित्यर्थः केवलव्य० १२
तिरेकिवारणायबाधनिश्चयाभावनिवेशः ईदृशीचपक्षतासर्वमभिधेयंप्रमेयत्वादित्यादौयदाकदाचिदपिसा
ध्यस्यनसंशयोनापिनिश्चयस्तदापक्षतैवेतितदानींतत्रानुपसंहारित्वस्यसिद्धांतिनोप्यनिष्टस्यवारणायस
त्यंतदलस्यैवसार्थक्यमितिभावः नन्वेवमपिसत्यंतदलवैयर्थ्यंदुर्वारमेवकेवलान्वयिसाध्यकेसाध्याभावाप्र० मे
सिद्धाबाधनिश्चयघटितपक्षत्वाप्रसिद्धाविशेष्यदलस्यैवासत्त्वादित्यतआह केवलान्वयिसाध्यकेपीतिवा

धर्म्मानप्रसिद्धिरस्त्वेवेति पक्षत्तित्वाभावप्रतियोगित्वधीरेव सकलभोवाधकत्वमेवेतिनिश्चेष्टः बाधकमानपदस्य साध्य-
वत्ताज्ञानत्वावच्छिन्नविरोधिनिश्चयपरत्वादिति भावः ननु त्रापि लक्षणे पूर्ववल्लक्षणोक्तलक्ष्याप्रसिद्धिर्जाग
र्त्ति सर्वमनित्यं प्रमेयत्वादित्यादेः साधारण्यादिसंकरेणालक्ष्यत्वासंभवादिति कथमेतल्लक्षणावतार इत्य
तआह निश्चितेति निश्चितसाध्याभाववद्वृत्तमात्रं विवक्षितं तथा च निश्चितसाध्याभाववद्वृत्तित्वे साधारणत्वे
निश्चितसाध्याभाववन्मात्रवृत्तित्वे विरुद्धत्वमिति यथासंख्येनान्वयः इतीति हृदयमित्यग्रिमेणान्वयः प
र्वेच सर्वमनित्यं प्रमेयत्वात् गगनत्वादित्यादिकमेव पक्षतावच्छेदकयामसंकीर्णोदाहरणमिति भावः ननु साधा
रणपक्षीयपक्षानितिविरुद्धत्वविशेषणस्य वैयर्थ्यं न प्राह निष्पक्षतत्वान्निश्चयवत्त्वादिति साधारणाभिप्रायेण लक्ष
णान्तरेण संगच्छतेति अस्य योगवैयर्थ्यस्याप्यतिस्फुटत्वादित्यतो दोषान्तरे हन स्यात्कालेदेवान्तरवतोऽपि हेतो
रनुपसंहारित्वेनैवानुमित्यनुत्पादकत्वमिति लक्ष्यत्वमित्यभिप्रायेणैतल्लक्षणमित्याह साधारण्यादीति ना
विरोधभागासिद्धिपरिग्रहः सर्वमभिधेयं प्रमेयत्वादित्यादेः सद्धेतुतया अलक्ष्यत्वस्य प्रागभिहितत्वात्तद
व्याप्यभिधाने संगमयति सद्धेतुत्वं चेति व्याप्तिनिश्चयपदस्याथ्यामेवेति तथा च सर्वत्र साध्यसंदेहदशायां तस्य
लक्ष्यत्वमेवेत्यव्याप्तिरेव तत्र सत्यं न विरहादिति भावः पक्षातिविक्तेत्यादि यथाश्रुतमूलेऽप्रतीतेः पदस्य पक्षाति
रिक्तपदव्यवहिततया पक्षापक्षातिरिक्तेसहचारप्रत्ययो न लभ्यत एवं व्याप्तिग्रहानुकूलपदसहचारपद
योरव्यवधानविरहेण व्याप्तिग्रहानुकूलसहचारत्वावच्छेदेनाप्रतीतत्वात् पाठान्तरं निविपर्ययेण योजयित्वा व्या
चष्टे पक्षातिरिक्त इत्यादि सर्वत्र साध्यसंदेहदशायामपि हेतोः साध्यसहचारस्य स्फुटोपलम्भानिसंभवात् प्रतीतप
दं निश्चितार्थकं तथा व्याप्तिग्रहेऽप्रतीतेरिति व्याप्तिग्रहानुकूलत्वेनानुगमनीयं सहचारविशेषणं विशिष्य दर्शनीय

गदा.

तिरन्वयेन व्यतिरेकेणा वेति सहचारस्य साध्यसाधनसहचारत्वेन निवेशो व्यतिरेकिणि साध्याभाववद्धेत्वभावसहचा
रत्वेनोभयोरनुगमे उदासीनपदार्थसहचारग्रहदशायामनुपसंहारिण्यपि व्याप्तिरिति तन्मते तु रूपेणा
नुगमफलं बोध्यं यस्य यस्य व्याप्तिग्रहेणान्वयः घटपटयोः संबंधस्तत्र हेतुकानुमित्यनुकूलत्वं तथा च तदेव
कानुमित्यौपयिकव्याप्तिग्रहानुकूलसहचारनिश्चयाभाववत्त्वस्यानुपसंहारित्वमिति लक्षणं पर्यवसितं
यदि च पक्षे व्याप्तिग्रहः कथंचिदित्यादिग्रंथः सर्वं पक्षकपरं एव सर्वपक्षकपरत्वेन तत्रैव सद्धेतावाने व्याप्तेरि
त्यादिग्रंथासंगतेः पक्षे सहचारप्रत्ययेपि पक्षातिरिक्ते प्रतीतसहचारकत्वेनातिव्याप्तेः पक्षातिरिक्त
प्रसिद्धारेव संगतेः एवं सर्वस्य पक्षत्वे पक्षे व्याप्तिग्रह इति विशेषाभिधानग्रंथसंगतं स्यात् एवं च तत्र पक्षा
तिरिक्तत्वविशेषणमहिम्ना लक्षणगमनात् सद्धेतावेवेत्यभिधानमसंगतमित्यतः पक्षातिरिक्तत्वांश
स्य लक्षणाघटकत्वाभिप्रायेण तत्संगमयति तथा चेति विशेषकं सहचारग्रहस्थलव्यवर्तकं न त्वेवमग्रिम
दूषणद्वयदानविरोधदृष्टान्ततोऽभिप्रायानवबोधमूलकत्वेन तत्संगमयति विशेषकत्वेन दूषणद्वयं अप्र
सिद्धेरित्यन्तं ग्रन्थः नित्यः शब्दत्वादित्यादौ प्रसिद्धसाधारणे गगनादौ व्यतिरेकसहचारस्यैव प्रतीतत्वादप्र
गोरस्त्वादिसाध्ये विरुद्धे च घटादौ व्यतिरेकसहचारनिश्चयसंभवान्नातिव्याप्तिसंगतिरतो साधार
णाविरुद्धयोरिति मूलं तद्विशेषपरतया व्याचष्टे असाधारणमिति वक्ष्यमाणा केवलान्वयिसाध्यकहेतो
र्विपक्षाप्रसिद्ध्यानलेनिः शब्दे हृपीनसर्पर्शवत्त्वात् इत्यादौ वाधावतारदशायां च विपक्षप्रसिद्धावपि तद्व्या
वृत्तत्वाभावात् सपक्षव्यावृत्तत्वाभावाद्रूपं असाधारणेन संभवतीति असाधारण इत्यस्यार्थमाह सपक्ष
व्यावृत्त इति शब्दोऽभिधेयः शब्दत्वादित्यादौ पक्षान्वयसहचारस्य सत्त्वेन दृष्टान्तविशेषे निश्चयसंभवादाह पक्ष

५९

२३

एतत्तादृशायामिति अतिव्याप्तिरित्यग्निमेण संयोगेन यत्र यत्र सहचार एव नास्ति तादृशमुदाहरति जलमि
ति निर्लेहत्वे स्नेहवदव्यत्वेत्र च सर्वे दैवातिव्याप्तेः एतत्तादृशायामित्यस्य न संबन्धः इत्याविष्कृतंमित्या
दामिति निमध्ये मुक्तेत्र सच विरुद्धत्वेपि बाधानवतारदृष्टायां तद्दृष्टासंभवाद्बाधारणानयोपपादनमविरुद्ध
रूपं जलं चेति ग्रन्थमेः सिद्धिसंकीर्णो द्वितीयं च बाधसंकीर्णो विरोध इति भेदः चेदादानुत्पत्तिकाले गुणाद्य
पद्रूपहेत्वभावसत्वेपि प्रतियोगिवैयधिकरण्यावच्छिन्नेतस्मिन्साध्याभावसहचारो न संभवति स एव च व्यतिरेक
व्याप्तिग्रहानुकूलः प्रतियोगिवैयधिकरण्यावच्छिन्नाया व्यापकतायाश्च व्याप्यवृत्तिव्यभिचारीण्यतिव्याप्ति
वारणाय एतादृशव्याप्ते निवेशनीयत्वात् अतिव्याप्तिसंगतिः प्रतियोगिवैयधिकरण्यानवच्छिन्नेपि यदभावे सा
ध्याभावसहचारो न संभवतीति नातिव्याप्तेरिति स्फुटं तथा तादृशमपि हेतुमाह गुणकर्मवृत्तीति समवायेनाद्र
व्यत्वसहेतुतायाश्च लाभाय जातीति अतिव्याप्तिरिति यद्यपि प्रथमोक्तासाधारणाभिन्नस्थलत्वे व्याप्तिग्र
हानुकूलसहचाराप्रसिद्ध्या नातिव्याप्तिसंभवः तथापि प्रकृतसाध्यादिसहचारस्य प्रमेयत्वकेवलसहचारप्रा
दिना निश्चयदशायामनुपसंहारिणि व्याप्तिवारणाय व्याप्तिग्रहानुकूलो यः सहचारनिश्चयः प्रकृते तच्छून्यत्वदभाव
एव विवक्षया चोक्तस्थलेपि कदाचित्कस्य विरुद्धं दीपसहचारैः साध्यादिसहचारत्वभ्रमेण व्याप्तिभ्रमोत्पत्त्या प्रसि
द्धतादृशभ्रमरूपसहचारनिश्चयाभावमादायातिव्याप्तिसंभवात्तत्संगतिः एतातिरिक्तत्वविशेषणस्य दूषकतायाः
मनुपपन्नत्वेपि तस्य विशेषणत्वाभ्युपगतेन दोष इति प्रत्ययांशाघटितस्य दोषत्वासंभवपरतया दूषकतायामित्या
दिमूले व्यावृत्तिदूषकतेति न तु प्रत्ययांशस्य प्रत्ययांशाघटितस्य सहचारप्रत्ययाभाव. से तियावत् ज्ञानं विरोधीति ग्र
५० न्थं योगान्वयः ग्राह्याभावविषयत्वादिभावः प्रत्ययांशापरित्यागे च विरोध एव पर्यवसानमित्याशयः अनुपसंह

गदा॰ रित्वज्ञानस्याविरोधित्वेपि अनैकांतिकरूपसामान्यधर्मस्याविरोधिधीविषयत्वेन दोषत्वयानुपसंहारिणो दुष्टत्वम
व्याहतमित्याशंकते मूलेन चेति दीधितावनैकांतिकग्राह्यार्थेति अनैकांतिकत्वं व्याप्तिग्रहविरोधिधर्मवत्वं
५१ साधारण्यादेः साधारण्यादिधर्मस्य दोषत्वोपपादनीयं अनुगततादृशधर्मांतरासंभवात् तथा च साधारण्या
दिज्ञानत्वेनैव प्रतिबंधकत्वमावश्यकं इत्यनुपसंहारित्वे दूषकत्वाविरोधप्रत्ययाशनित्वेन दोषोद्भाव
एवेति भावः मिश्रमतमाह केचित्विति असाधकतासाधकतायामित्यस्यानुपसंहारितादोषस्यासादिः एवं च
साध्यसहचाराभावस्यैवासाधकताव्याप्यत्वेन व्यभिचाराचारकत्वेन प्रत्ययांशवैयर्थ्यं चोद्यं नच दूषक
तेत्यत्र चपदं तन्मते दूषकताऽसाधनं अनैकांतिकत्वेन प्रत्ययांशवैयर्थ्यं बोध्यं नच दूषकतेत्यत्र चपदं तन्मते दू
षकता लिंगेन न तत्प्रत्येकं अनुपसंहारित्वादिना तथा च तस्य व्यभिचाराचारकविशेषणं च त्वेपि न दाति
विविता दृशमूलाशयः उभयकोटीति साध्यतदभावेत्यर्थः केउपस्थापकत्वादीत्यादिना विरुद्धान्यपद
हतित्वे सतीत्यादिरूपपरिग्रहः साध्योपस्थापकत्वादित्यादिना द्वितीयानैकांतिकत्वं दुष्टकसत्वेन परिग्र
हः व्यर्थत्वादित्यविरुद्धादेरपि असाधकत्वेन तत्तावनैकतादृशविशेषणस्य व्यभिचाराचारकत्वादि
तिभावः अथ साध्योपस्थापकतावच्छेदकरूपमात्रस्यासाधकताहेतुत्वे यथा तादृशसाध्यसहचा २७
रवति सद्धेतौ व्यभिचारस्तथा साध्याभावोपस्थापकतावच्छेदकरूपमात्रस्य हेतुत्वेपि तादृशसाध्याभाव
वद्व्यावृत्तत्ववति सद्धेतौ व्यभिचारो दुर्वार एवेति कोटिद्वयोपस्थापकतावच्छेदकरूपसहेतुतायां वैय
र्थ्यभिधानासंगतिः साध्योपस्थापकतावच्छेदकसाध्यसहचारतदभावोपस्थापकतावच्छेदकतदभाव
वद्व्यावृत्तत्वयोः सद्धेतुसाधारण्येपि तद्रूपविशिष्टविषयकज्ञानजन्यसाध्योपस्थितिर्यद्रूपविशिष्टज्ञा

ज्ञानजन्यसाध्याभावोपस्थितिसहकारेण संदेहे जनिकातदुभयरूपवत्त्वस्यैवोभयकोटिकव्यापकतावच्छे
दकरूपवत्त्वमित्यनेनविवक्षितत्वात् नाव्हेशस्य सद्धेतव्याप्तत्वेनासाधकत्वसंभवादिति चेन्नानिष्ठाप्रमते धर्मि
तावच्छेदकविशिष्टे धर्मिणि यद्रूपावच्छिन्न ज्ञानं साध्यसंदेहजनकं तद्रूपवत्त्वस्यैवोभयकोटिकव्यापकताव
च्छेदकरूपवत्त्वमित्यत्र विवक्षितत्वात् तत्र धर्मितावच्छेदकविशिष्टे साध्यतदभावोभयप्रकारकज्ञानस्यै
व साध्यसंदेहपदार्थत्वे तत्र साध्यप्रकारकज्ञानमात्रनिवेशे साध्याभावप्रकारकज्ञानमात्रनिवेशे साध्याभा
वप्रकारकानुमितिप्रतिधर्मितावच्छेदकविशिष्टधर्मिणि साध्याभावव्याप्तिविशिष्टस्य ज्ञानस्य हेतुतयावि
रुद्धातिव्याप्तेर्वारणायैव साध्यप्रकारकत्वनिवेशात् अन्यथा साधकत्वानुमाने च सद्धेतौ व्यभिचाराप्रसक्त्या
तद्वैयर्थ्यस्य दुर्वारत्वात् साध्यप्रकारकत्वमात्रनिवेशे साध्यानुमितिजनकसाध्यव्याप्यवत्ताज्ञानविषयता
वच्छेदकत्वमादाय सद्धेतौ व्यभिचारात् तद्वारकसाध्याभावप्रकारकत्वांशवैयर्थ्यप्रसक्तेनेन तद्वैयर्थ्या
प्रसक्तेनेन तद्वैयर्थ्यमुक्तं एवं चोभयकोटिकव्यापकत्वादाविवादे साध्यतदभावप्रकारकज्ञानजनकत्वो
क्तोपस्थितिविशेषणतया प्रविष्टं यत्साध्यप्रकारकत्वं तदादितिविशेषणवैयर्थ्यादित्यर्थो द्रष्टव्यः सह
चारग्रहस्याभावः सहचाराभावाद्व्यपचेति धर्मिभेदादेवैयर्थ्यस्वरसबीजबोध्यं सर्वस्वपक्षत्वे मात्रा
र्थाभावादिति केवलान्वयिसाध्यकाव्यासो न हेतुः साध्ये केवलान्वयित्वाभिधानानुपयोगापत्तेरिति
साध्याभावाप्रसिद्धेरेव न हेतुत्वे मूलकृतोऽभिप्रेतं संवसोत्यादिकं च सर्वपक्षकसामान्य एवाभिप्रेतायाः
संदेहानतस्य हेतुत्वपरं एवं च पक्षे साध्ये निष्ठाभावप्रतियोगित्वप्रतिपक्षे विप्रतिपत्त्यर्थपदार्थत्वप्रसन्देहवा
मूलगतिरिति तत्संगमयन्तं विप्रतिपत्तिपदार्थोऽवितर्कपतिविप्रतिपत्तिपदात्पदं विषयताविशेषलाभाय।

गदा.

५०

लेपक्षत्वरूपविप्रतिपत्तिविषयत्वमित्यर्थः केवलान्वयिसाध्यकेऽतिव्याप्तेरिति पाठे मात्रपदार्थाप्रसि
द्ध्यातिव्याप्त्यसंगतिस्तत्संगमनाय विशेषणानि तन्मात्रवृत्तित्वमित्यत्व व्याप्यवृत्तिकत्वं विप्रतिपत्तिविष
यत्वव्याप्याधिकरणतावत्त्वं विप्रतिपत्तिस्थसाध्यवत्तानिष्ठाभावप्रतियोगित्वं प्रतिपत्तिरेव तत्रेत्ति विप्र
तिपत्तिविषये तत्रेत्यर्थः केवलान्वयिसाध्यकस्य विप्रतिपत्तिविषयत्वव्याप्यवृत्तेः सर्वमभिधेयं प्र
मेयत्वादिहेतोर्लक्ष्यतया नातिव्याप्तिः संगच्छेतेत्यत आह रूढं वेति कथं चिदिति सर्वत्र साध्यसंदेह
सत्वेपि प्राचीनव्याप्तिग्रहरूपायामित्यर्थः व्याप्यनिश्चयरूपायामेव तस्य लक्ष्यत्वादिति भावः अ
साधारणव्यतिरेकिणो व्यतिव्याप्तिर्बोध्या एवेत्यस्य सहचारग्रहाभावरूपैकधर्मोपसंहाराभावे
नान्वये व्यतिरेकिणि व्याप्तिः व्यतिरेकसहचारप्रकारकग्रहस्य हेत्वभावेपि विषयतया तदभावस
हेनावत्तत्वात् तस्य व्याप्तावन्वयेपि व्यतिरेकसहचारग्रहस्यान्वयव्याप्तिग्रहत्वे सोवातिव्याप्तिः व्यति
रेकव्याप्तेः प्रकृतत्वहेतुनिष्ठत्वाभावात् समभ्यर्थविषयताया व्याप्तिग्रहेः न्वयेपि स एव दोषः प्रकृत
हेतोर्व्यतिरेकसहचारग्रहाधीनव्यतिरेकव्याप्तिग्रहाविषयत्वात् अतः षष्ठ्यर्थपरतया सप्तमी व्याचष्टे
एवेति एवं च व्यतिरेकव्याप्तेः प्रकृतहेतुनिष्ठत्वविरहेपि तद्ग्रहस्य प्रकृतविषयकत्वविरहेपि चान्तसं
बंधितया तद्ग्रहात्मकलसहसहचारग्रहरूपाया न तत्रातिव्याप्तिरिति भावः ननु यत्किंचित्संबंधस्याद्य
सीनव्याप्त्याद्यावृत्तिपि सत्त्वेन व्याप्तेराधाराधेयभावो विषयत्वरूपो वा संबंध एव विवक्षणीयः तथा च तद्दोष
तादवस्थ्यमित्यत आह तथा चेति हेत्वभिमतेति स्वहेतुकप्रकृतसाध्यसिद्ध्यौपयिकत्वसंबंधतात्पर्य
ग्राहकहेत्वभिमतपदसमभिव्याहारादित्यर्थः एतेन तत्पदस्यैव यथाश्रुतौपनिपत्ततामित्यर्थलाभादि

ति उपसंहाराभावस्तत्र कथं न निष्ठत्वं प्रतीतस्य हेतोरनुपसंहारित्वमित्यर्थलाभादित्यर्थः सर्वं द्रव्यमि
त्यादौ गुणवत्त्वादित्यादौ अन्वयसहचारस्य व्यतिरेकसहचारस्य चाविरहान्न लक्षणसमन्वयसंभवेन प्रसिद्धा
नुपसंहारिणि सर्वमभिधेयमनित्यं वा प्रमेयत्वात् द्रव्यत्वादित्यादावव्याप्तेरभिधानेनासंभवस्य पद्य
युक्तत्वेऽपि प्रकृतव्याप्तिग्रहाणुकूलसहचाराप्रसिद्ध्या न यथाश्रुतलक्षणसंभवस्तथापि प्रकृतसाध्य
सिद्ध्योपयिको यो यो व्याप्तिग्रहस्तदनुकूलसहचारमात्रकत्वं विवक्षितं यदा यो न तत्सहचारस्य प्रकृतसा
ध्यसिद्ध्योपयिकव्याप्तिप्रमानुकूलत्वाभावमादाय तल्लक्षणसमन्वयसंभवः न च गुणादिनिष्ठद्रव्यत्वा
दिसहचारस्य द्रव्यभेदादिसहचारस्य द्रव्यभेदादिसहचारत्वं न मविषयतया प्रकृतव्याप्तिग्रहानुकू
लत्वाविरहस्यासत्त्वान्न सहचारवचामान्यं नतदनुकूलत्वमिति कथं लक्षणगमनमिति वाच्यं सहचार
त्वविशिष्टपर्याप्तविषयताया विवक्षणीयत्वात् अभावविधेयविशिष्टसहचाराप्रसिद्ध्या तद्विषयता
याश्चास्तत्वसहचारत्वविशिष्टायाः पर्याप्तत्वात् प्रमात्मकज्ञानविषयतासामान्ये च प्रकृतव्याप्तिग्रहानु
कूलत्वाविरहस्याक्षतत्वात् तृणमिति प्रतियोगिवैयधिकरण्यानवच्छिन्ने गुणाभावे द्रव्यान्यत्वाभाव
सहचरस्यासंभवात् गुणकर्मान्यत्वविशिष्टसत्त्वहेतुत्वे सत्त्वांशज्ञानद्वारासिद्धिपक्षेऽवसाध्यांशज्ञानद्वारासिद्धा
त्मकः कारणाभावेनयोः व्याप्ति ग्रहकारणाभावतयास्वरूपसम्बन्धेव ज्ञानानपेक्षत्वदोषः परे परया
नुमितित्वावच्छिन्नत्वादप्रयोजकः न हेत्वाभासः इति यद्यपि वस्तुमात्रमात्रासंदेहाविषयत्वरूपमनुपसंहारित्व
मपि स्वरूपे स्वरूपसंदेहाविरोधी इति न तस्य हेत्वाभासतासंभव इति लक्षणद्वयेऽपि तत्त्वानुयोगस्तथापि
५६० प्रथमस्य कारणाभावतया स्वरूपसहकारित्वेन स्फुटत्वेन द्वितीयस्यानैकान्तिकत्वादित्यापातदृशात्र

ग.दी. योगेनद्वितीयावतारसंगतिरित्यवधेयं पक्षपरस्य साध्यवान्नवेति संशयविषयपरत्वे केवलान्वयिपि
साध्यवान्नवेति संशयविषयपरत्वे केवलान्वयिसाध्यकेऽव्याप्तिस्तत्र कोट्यप्रसिद्ध्या संशयासंभवात्
५१ त्वनिष्ठाभावप्रतियोगित्वसंशयविषयसाध्यकान्वाकत्वे पक्षविशेष्यकसंशयदशायामनित्यत्वा
दिसाध्यकेऽव्याप्तिस्तत्र संशयद्वयमनुगमयति पक्षइति पक्षतायां तद्व्याख्यानमेतत् यद्यपि घटः प्र
मेयवाननित्योहा प्रमेये घटनिष्ठाभावप्रतियोगिनेव सादि संशयविषयतायाः केवलान्वयिधर्मव्यापक
त्वात् यथाश्रुतेऽपि नाव्याप्तिः विषयताविशेषानवेशे उभयविधसंशयधर्मिविषयतायाएकविधत्वाभा
वादननुगमः मद्धतानुमितित्वहेपनिष्ठनिरोधिसंशयविषयतानिवेशो विशिष्टस्मिन्साध्यसंदेहदशायां
व्यतिरेकिधर्मावच्छिन्नेसाध्यसाधकस्याप्यनुपपंमेहाविनाया दूषकतावीजसत्वेनोपयोगात्तव्यतयातत्रा
व्याप्तिः तथापि स्वप्रतिबंधकतावच्छेदकीभूतसाध्यवत्तानिरूपणविशेष्यतासमानाधिकरणसंशय
ताविवक्षणान्नदोषः प्रमेये घटनिष्ठाभावप्रतियोगीनवेत्यादिसंशयस्य घटादिमात्रविषयतायाएव
ताहृषसंशयप्रतिबंधकतावच्छेदकप्रमेयादिप्रकारतानिरूपितविशेष्यतासमानाधिकरणत्वात्ता
दृशाश्च केवलान्वयिधर्मोऽव्यापकत्वात् नतु यत्र केवलान्वयिसर्वत्वादिकं धर्मितावच्छेदकीकृत्य न ५०
साध्यसंशयः अपितु द्रव्यत्वगुणत्वादिविशेषधर्मं धर्मितावच्छेदकीकृत्यैव विविविशिष्टविषयकसंशयः त
संशयविषयतायां स्वरूपसंबंधरूपकेवलान्वयिधर्मावच्छिन्नत्वाभावादव्याप्तिस्तज्ञापि सहचारग्रहीभा
वेदूषकतावीजसत्वेनालक्ष्यतास्वीकारासंभवातइत्यतआह अवच्छेदकत्वेचेति स्वान्यूननदृत्ति
त्वात्वामिति तथाच केवलान्वयिधर्मव्यापकत्वे चात्यंताभावाप्रतियोगित्वमेवनतुकेवलान्व।

पिधर्मव्यापकत्वं चात्यंताभावाप्रतियोगित्वमेव न तु केवलान्वयिधर्मवन्निष्ठात्यंताभावाप्रतियो
गित्वं निष्ठांतनिवेशे प्रयोजनाभावात् स्वरूपसतोपि संशयाधर्मिणः प्रकारीभवतोपि नाव्याप्तिरिति
तादृशसहचारालंबनसंशयाविषयतायाः तत्संशयविषयतात्वेन केवलान्वयिधर्मव्यापकत्वादिति
भावः यत्रविशेष्ये नैकसंशयविषयतापि तु क्रमिकसंशयद्वयविषयतैव तादृशसंशयाश्रयता
त्वेन तत्कालीनसंशयाविषयतात्वेन व्यापकत्वे विवक्षणीये हेत्वादीनामादिना हेत्वभावपरिग्रहः व्या
प्यग्रहेणेति वाप्यानिश्चयेनेत्यर्थः सहचारनिश्चयासंभवादिति भावः न च धर्मिणि किंचिद्रूपेण साध्या
दिसंशयेपि साध्याद्यंशे निर्धर्मितावच्छेदकसाध्यादिसहचारस्य हेतौ निश्चये बाधकाभाव इति वाच्यं न हि
तया गृह्यमाणे सर्वत्र तत्संशयदशायां तत्र सहचारसंशयसामग्र्या अवश्यं तात्पर्यकत्वात् अविरत्वाधिक
णे तन्निश्चयदशायामेव तादृशानिश्चयेन स्वाधिकरणवृत्तित्वनिश्चयेन कानत्तसामानाधिकरण्याभा
वभानानिवर्तत्वात् स्वाश्रिनतत्सामानाधिकरण्यसंशयसामग्रीविघटनासंभवात् आभासत्वे हेतोरुक्तत्वे
हुले मद्हेताविति क्वचिदधिकरणे साध्यानिश्चयदशावच्छिन्न इत्यर्थः साध्यानिश्चयदशायां सर्वत्र साध्य
वद्देशदशायां पक्षत्वे केवलान्वयिधर्मस्य पक्षतावच्छेदकत्वेन दृष्टियेत्वसाध्याभावोपानिश्चयरूपज्ञानवि
रहदशायामित्यर्थः इदंदृदमेवानुसंहारावित्यर्थः दूषणांश्रामित्यन्तत्वाद्दृश्यप्रयोजकं न तु साधारण्यं तादृशा
निश्चयात्मकज्ञानाविषयस्य तत्स्यात् तथा त्वादिति भावः तदेवागमे साधारण्यस्य यथोक्तनिश्चयरूपावगाम
दशायां साधारण्यसंकरश्चेति कालांतरीणानुपसंहारितासमानाधिकरणसाधारण्यप्रयोजकरूपवाश्रमित्य
न्त्यादित्यर्थः तथा चोभयोरेव पृथक् प्रयोजकतया नान्यतरदोषत्वमिति भावः अनुपसंहारितादशा

गदा० यां व्याप्यनिरूपयत्वरूपव्याप्यत्वासिद्धेर्वानुमितत्वनुसारतनिर्वाहाद्दनुपसंहारितानरूपणमित्यपीतेनेत्या-
दिनाशंकावाउपजीव्यतयानरूपणत्वमप्येव्यवस्थाप्य पंचव्याप्यत्वासिद्धेरित्यादिनाप्युपजीव्यतया
रूपणत्वेव्यवस्थाप्यतइतिपीनेरूनयाशंकांसार्थंपरार्थानुमानपरतयानिराकरोतीति हीयितेपरार्थे
52 ति बहिर्भावेऽसिद्धिर्बहिर्भावः स्वार्थस्थले व्याप्यनिरूपयस्यज्ञानेऽज्ञायमानयोरनुपयोगादितिभावः
अनुपसंहारित्वस्यदूषणाविशेषेव्याप्येऽपिहेतौसत्वेनव्याप्यभावरूपव्याप्यत्वासिद्धेर्नियतत्वाच्चतज्ज्ञा-
पकत्वसंभवइत्यसिद्धिपदमज्ञानरूपासिद्धिपरतयाव्याचष्टेऽसिद्धिरितिअज्ञायमानेऽथज्ञानद्वारैवोपजी-
व्यतयानदभिधानेनैवोज्ञापकज्ञानेऽप्युपजीव्यत्वलभ्यतइत्यज्ञायमानाधीनपरकीयज्ञानपरतयाज्ञानं
पदंव्याचष्टेज्ञानइतिनचोऽज्ञायमानाधीनेपरकीयज्ञानेप्राप्तमेवतत्रानुपसंहारित्वस्यलिंगस्यनोपजीव्य-
तासंभवइतिवाच्यं वाच्यवाक्याद्व्याप्यनिरूप्यापितत्स्ययोजकेविरहशंकयातत्राप्रामाण्यशंकायस्त्रनिह
त्वेनतत्स्ययोजकानुपसंहारित्वज्ञानस्यापेक्षितत्वात् संदेहेऽनुपसंहारित्वंतद्विपर्ययोवानदधीनोव्याप्य
निरूपयोवानत्राद्यदूषयतिहेत्वनुमतिनिनाभासइतितथाचनतद्विशेषानुपसंहारिरूपोपीतिभावः स्वत
पेवनत्वज्ञायमानतयाद्वितीयंदूषयतितत्रद्वितीयेदूषयत्याहेतौसाध्याभावसामानाधिकरण्य ५३
हेतुमात्रसाध्यवान्वेति संप्रायस्यसाध्येहेतुमत्त्विषाभावप्रतियोगित्वसंबन्धयोगेनत्रस्यविषयः केवलान्व-
यिसाध्यकेसर्वमभिधेयंप्रमेयत्वादित्यादिप्रसिद्धानुपसंहारिणि इदमनुपलक्षणंसर्वमनित्यंघटत्वादित्यादि
व्यतिरेकिसाध्यव्याप्यानुपसंहारिण्यपितदसत्वंबोध्यं व्यतिरेकिसाध्यकेसर्वमनित्यंप्रमेयत्वादित्या-
दौसंदिग्धानैकांतिकत्वमितिपदेननिश्चितसाध्याभाववद्वृत्तित्वंसाधारण्यंसाध्याभाववद्वृत्तित्वेनिश्चया

त्मकस्यैव साधारण्यज्ञानस्य प्रतिबंधकत्वादन्यथा पक्षे साध्यसंदेहेनानुमानमात्रोच्छेदापत्तेः संदिग्धसा
ध्याभावसामानाधिकरण्यं पुनरनुपसंहारित्वमतो भेद इत्याशंकां निराकृतानियतविषयं संप्राप्य स्थलेपि हेतो
संदिग्धसाध्याभावसामानाधिकरण्यादिरूपोद्भावनकौनवतावे दोषतोपगमात्रस्य साधारण्यताया एवौका
र्यत्वात् तत्सप्रस्थलेन स्याविरोधित्वे सर्वत्र साध्यसंप्राप्तस्थले व्यविरोधित्वापत्तेः तज्ज्ञानस्य प्रतिप्रतिबंधकतानतेर
मानाभावात् तृतीयं दूषयति विशेषेति सहचारग्रहात् व्याप्तिग्रह इत्यनिमेणाचयः ग्रहो निश्चयः दोषज
याप्तीकृते इति शेषः सहचारनिश्चयत्वेन दृष्टव्यापकताग्रह कारणतायाः स्वानाभिमतत्वया व्याप्तिग्र
हप्रयोजकांतरमाह संप्रायेति साध्यतदभावसंप्रायेति साध्यतदभावसंशयेत्यर्थः साध्यतदभावनिश्चयप्रति
बंधादिति निश्चयव्यतिरेकव्याप्तिशरीरांतर्गततया तदंशेनिश्चयत्वघटकविपरीतभानासंवलितसाध्यतदभा
ववत्वभानविघटनादित्यर्थः विपरीतकोट्यभाने तज्ज्ञा[illegible]कसामग्र्यभावस्य प्रयोजकत्वादिति भावः अज्ञा
नरूपासिद्धिरेव दोषतया पर्यवसिता तथा च पूर्वोक्तैकधर्म्युपसंहाराभावस्यैव नास्यापि हेत्वाभासत्वमिति भा
न तु व्याप्तिग्रहस्याज्ञानरूपासिद्धित्वेन हेत्वाभासताविरहेपि तदुपजीव्यतया साध्यसंदेहः सहचारादिश्चयो वा
व्यभिचारवदाभासस्यादेव असिद्ध्युपजीव्यत्वेः ज्ञायमानविरोधितायाश्चाभासस्य[illegible] एव असिद्ध्युपजीव्यत्वे ज्ञा
यमानविरोधितायाश्चाभासत्वाविरोधित्वादिति मूलानुसारिणां शंकां निराकरोति उपजीव्योपि चेति सत्तयैव
विरोधित्वादिति तथा चाज्ञायमानविरोधिनोः ज्ञानरूपासिद्ध्युपजीव्यत्वं न हेत्वाभासताप्रयोजकं दृष्टांतस्य सा
धारण्यज्ञायमानतयैवाविरोधित्वादिति भावः अत्रैव सर्वपक्षे ऽव्रप्रम इत्यादिनिश्चयेत्ता समाधानं दूषयित्वमपर
न्यस्याप्तिमस्तित्यासीति प्रथमलक्षणाधारणे व्याप्तिग्रहेति व्याप्तेर्ग्रहानुकूलो यो यः सहचारनिश्चय

गदा विरोधित्वमपेक्ष्य निश्चयत्वावच्छिन्नत्वस्य प्रतिबध्यताविशेषणत्वात् आकाशाभाववानाकाशादित्या
दौ हेत्वादेः वृत्तित्वस्य उभयसहचारग्रहविरोधित्वेपि नातिव्याप्तिः अवच्छिन्नत्वं स्वरूपसंबंधविशेषः वि॰
५७ रोधसहकृतो साध्यसामानाधिकरण्यात्मकस्य उभयस्याप्यवारणं दर्शयति विरोधित्विति संशयेत्यनेन प्रति
बध्यतायां निश्चयत्वानवच्छिन्नत्वं दर्शितं अन्वयमात्रेत्यनेन व्यतिरेकसहचारग्रहविरोधित्वदलव्यवच्छेदः
यद्यपि अनुपसंहारिण्यपि हेत्वनिष्ठकेवलान्वयिधर्मव्यापकसाध्यसंशयविषयवृत्तित्वं न हेत्वभावे सा॰
ध्याभावसहचारनिश्चयविरोधिहेत्वभावधर्मिकसाध्याभावसंशयविषयवृत्तित्वग्रहस्यैव तद्धर्मिकसह॰
चारसंशयसामग्रीत्वेन तद्धर्मिकतन्निश्चयप्रतिबंधकत्वात् व्यापितत्सहचारनिश्चयत्वावच्छिन्नविरो॰
धित्वं नैकधर्मविशेषणं तथा सर्वमनित्यं घटत्वादित्यादौ अन्वयसहचारनिश्चयविरोधि यद्धेत्वविशिष्टतादृ
शसंशयविषयवृत्तित्वं यच्च हेत्वभावनिष्ठं तादृशसाध्याभावसंशयविषयवृत्तित्वं तदुभयरूपवत्त्वमादा
यलक्षणसमन्वयः येन केनापि संबंधेन विरोधिरूपवत्त्वनिवेशात् हेत्वभावनिष्ठसंशयविषयवृत्तित्व
स्याप्येकज्ञानविषयत्वादिना हेतौ न निष्ठत्वात् इदमभिधेयमनित्यं वा प्रमेयत्वादित्यादौ व्याप्तिग्रहा॰
नुकूलव्यतिरेकसहचारासमसिद्ध्यायोः सहचारस्त्यनेनाप्यन्वयसहचारमात्रस्योपादानात् तत्र विरोध्येकं
रूपमादाय लक्षणसमन्वयः एवं तेष्वपि हिमान्धूमादित्यादौ साधनादेर्वृत्तिर्न साध्यादिसहचारनिश्चयविरोधि
नो यद्यद्धर्मिणि विशेष्यसंबंधोत्तायते तावद्धर्मिषु विशेषणसंशयस्यैवाविशिष्टवृत्तित्वसंशयहेतुतया विशि
ष्टलिंगरूपविरोधित्वात् न हि पर्वते वह्निसंदेहे महानसादिवृत्तितया गृहीतधूमो वह्निमद्वृत्तित्वसंशयः नानाप्र॰
कारदंडवत्त्वेन ज्ञाते घटप्रकारकयादिदंडो रक्तत्वादिसंदेहेपि रक्तदंडवान्न वा घटप्रकारकत्वादिसंशयानुदयात् न ५७

न्निर्वह्निस्वविशेषणकत्वेनासंदिह्यमानेसंविशेष्यसंबंधत्वानाभावस्यविशेष्यसंबंधज्ञानस्यचपरस्प
रसहकारितैवहेतुत्वकल्पनयेति अन्वयसहचारनिश्चयत्वावच्छिन्नविरोधितामात्रनिवेशेऽतिप्रसंग
ह्वचयति असाधारणइतिशब्दोऽनित्यः शब्दत्वादित्यादौपृथिवीतरेभ्योभिद्यतेपृथिवीत्वादित्यादौचेत्य
र्थः ग्रहविरोधेग्रहानुत्पादः तथाचतत्रसाध्यसंशयविषयपक्षवृत्तिपृथिव्यादिवृत्तित्वेऽन्वयसहचारनि
श्चयविरोधित्वेपिव्यतिरेकसहचारनिश्चयविरोधित्वाभावान्नातिप्रसंगइतिभावः व्यतिरेकसहचरनि
श्चयेरेकसचारनिश्चयत्वावच्छिन्नविरोधिनिष्ठत्वभावेनिष्ठसाध्याभावसंशयविषयपक्षादिवृत्तित्वेऽतिप्र
संगोबोध्यः तादृशमितिविरोधितावच्छेदकमित्यर्थः लक्षणस्यविरोधिरूपवत्त्वरूपानुपसंहारित्वलक्षण
स्यपक्षवृत्त्यत्रविग्रहेसाध्यसंशयविषयीभूतपक्षपदार्थघटकसाध्येलक्षणसंबंधितत्वाभावस्यार्थसंबंधान्वयेके
वलान्वयिधर्मावच्छिन्नविषयताकसंशयविषयसाध्यकत्वलभ्यतेनुसचज्ञानेनव्याप्तिज्ञानविरोधिकृत्त
वत्त्वामानक्रमेणसाध्यसंशयविषयवृत्तित्वज्ञानमेवानलक्षणाभावसंशयविषयधर्मान्वितानिश्चयतासव
धर्मकत्वेषुयः प्रदर्शयितुमाहयस्याश्रयइतिकेवलान्वयीतिश्चवच्छिन्नांतविषयतान्वयितन्निवेशप्र
योजनमाह व्यतिरेकेत्यादिना असाधारणपरिग्रहः पर्वतोवह्निमान्धूमादित्यादेः संशयविष
यमात्रवृत्तित्वंनिवेशपूर्ववारणसंभवाद्व्यतिरेकव्याप्त्यनुधावनेसाध्यवत्तानिश्चयविरोधित्वेनसंशयानुगमस्या
वश्यकतयाप्रतिबंधकतायांतादृशनिश्चयत्वव्यापकत्वमेवनिवेशयितुमुचितंविषयतायांकेवलान्व
यिधर्मव्यापकत्वस्यनिवेशेप्रयोजनाभावादित्यभिप्रायेणाहसाध्यवत्त्वेतिसामान्यपदेनव्यतिरेकादिवार
णंस्फुटयतिधर्मिविशेषेतिधर्मिविशेषणनियंत्रितः कतिपयमात्रधर्मिकः नात्यधर्मिकेतिसमानविपरीतज्ञा

गदा॰ नस्यैव विरोधित्वादिति भावः ननु यत्र यत्र हेतुस्तत्र व्यतिरेकस्य ज्ञानः तावद्धर्मिकासर्वविषयकसाध्यविष-
यकसंशयदशायामपि हेतौ व्यनुपसंहारित्वात् सहचारनिश्चयानुत्पादस्य ग्राहकताबीजस्य सत्त्वादिति तत्रोक्त-
54 लक्षणाव्याप्तिरतस्तत्साधारण्याय प्रकारान्तरमनुसरति साध्यसंदेहेति उक्तस्थले वा ज्ञायमानहेतुव्यतिरे-
कसमानाधिकरणसंदेहविषयत्वासत्त्वेऽपि न क्षतिः ज्ञायमानसत्ताया एव व्याप्तिग्रहानुकूलत्वादथवा यत्र
साध्यवति न हेतुर्यत्र वा साध्याभाववति हेतुस्तत्र न साध्यसंशयः किन्तु यत्र धर्मिणि साध्यहेत्वोः साध्याभावहेत्व-
भावयोः सहचारस्तादृशे धर्मिण्येव साध्यसंशयस्तत्रापि हेतावनुपसंहारित्वं व्याप्तिग्राहकसहचारनिश्चयासंभ-
वरूपबीजस्यासत्त्वादिति तत्साधारण्याय प्रकारान्तरमाह साध्यसंदेहेति साध्यवन्निष्ठहेत्वभावसत्तायाः सा-
ध्याभाववन्निष्ठहेतुसत्तायाश्च व्याप्तिग्राहकसहचाराघटकतया व्याप्तिग्रहाननुकूलतया तदनुकूलसत्ता-
याः साध्यसंशयविषयताव्याप्यतयोक्तस्थले लक्षणसमन्वय इति भावः साध्यसंदेहस्य चोक्तानुगतरूपेण
वा निवेशो बोध्यः असाधारण्यव्यतिरेकिहेतुसत्तायाः साध्यसंशयविषयत्वव्याप्यतया अतिप्रसंगवारणाय
साध्यसिद्ध्यनुकूलत्वेनान्वयव्याप्तौ अनुगमयति अनुकूलानुकूलत्वे तु व्यतिरेकसत्तयोरनुगमः एतदेव दर्शय-
ति तादृशीवेति तादृशी तादृशग्रहोपयिका अन्वये अन्वयसहचारनिविष्टा व्यतिरेके व्यतिरेकिसहचारनिविष्टा यद्वा
नीमनुपसंहारित्वस्य ज्ञायमानतया हेत्वाभासतानिर्वाहाय विरोधित्वं व्यवस्थापयति स्वरूपसहितेति साध्येत्या-
देर्हेतौ तन्निरूपादिति तन्निश्चयेति साध्यसामानाधिकरण्यनिश्चयेत्यर्थः ननु हेतुमति साध्यसंशयस्य हेतौ साध्यसामा-
नाधिकरण्यसंशयसामग्रीत्वमेवासिद्धमित्याशंकायामाह हेतुमतीति निश्चोचित्यावर्जितत्वापदांतेति हेतुमति सा-
ध्यसत्त्वे हेतौ साध्यसामानाधिकरण्यनियतं सर्वत्र तदभावसत्त्वेन च न तत्सामानाधिकरण्याभावनियतमिति

तदुभयभानौचित्येनाप्रमाण्याक्षेपत्वादित्यर्थः ननु साध्यसंदेहस्याधिकरणे सत्वेपि साध्यसामानाधिकरण्य
स्याभावस्यानुपस्थित्या न संशयः संभवति तदुपस्थापकसाधारणधर्मादिदर्शनसत्वे तदेव संशयकम-
स्तीत्यत आह साध्याभावेनेति साध्यसामानाधिकरण्याभावस्य साध्याभाववृत्तित्वेनाश्रयतया तत्संबोधि
साध्याभावविषयकसाध्यसंदेहस्यैव तदुपस्थापकत्वादित्यर्थः एवं च संशयज्ञानस्यानुपयोगित्वेपि तद्वि
षयवृत्तितायाः ज्ञानस्य संशयसामग्रीविषयसाध्यसामानाधिकरण्यघटकत्वमपि निश्चयविरोधितया तस्यानु
संहारित्वरूपहेत्वाभासतानुकूलत्वेनेति समुदायभावः अनुपसंहारितोदशायां साध्यसामानाधिकरण्यसंशयप
वदुच्छेदः कथं तज्ज्ञानस्य तत्संशयसामग्रीत्वमित्यत आह सर्वत्रैवेति पक्षविदर्योतिकमपि धर्मिणि संतर्भाव्य साध्यां-
शे निश्चयरूपसाध्यवदवृत्तित्वप्रकारकज्ञानस्याजातत्वेनेत्यर्थः तदभावस्य साध्यसामानाधिकरण्यज्ञा
यद्विन्नाभावस्य गृहीतुमशक्यत्वान्न संशयेन कोटितया गृहीतुमशक्यत्वात् ग्रहणस्याशक्यत्वे हेतुमाह प्र-
तियोगितावच्छेदकेति सर्वांशे निश्चयरूपस्य प्रतियोगितावच्छेदकप्रकारकज्ञानस्येत्यर्थः अभावधीहेतुताया
इति प्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयविधया हेतुताया इत्यर्थः प्रतियोगि
विशेषिताभावबुद्धेः प्रतियोगिप्रकारकविशिष्टवैशिष्ट्यावगाहितानियमादिति भावः यत्त्वपि भ्रमतासिद्धत्व
तेन प्रतियोगिज्ञानहेतुताभिप्रायकोयं ग्रन्थ इति तदसत् अभावलौकिकप्रत्यक्षं प्रत्येव स्वतंत्रतद्धेतुतायाः
स्वीकारान्न संशये उपनीताभावकोटिभाने तादृशकारणविरहस्याकिंचित्करत्वात् अथ सर्वत्र साध्यसंदेहदशायां
तादृशप्रत्यक्षनिश्चयासंभवेपि कालांतरीणनिश्चयजन्यसंस्कारतः स्मरणात्मकतादृशनिश्चयः संभवत्येवेति
चेन्न यस्य पुंसः प्रागपि क्वचित्साध्यनिश्चयो न जातस्तस्य सहचारसंशयसामग्र्या एवमपि दुरुपपादत्वात् ननु सा

गदा० धांशेनिधर्मितावच्छेदकं तद्देशेनिश्चयरूपं साध्यसामानाधिकरण्यज्ञानं सर्वत्र साध्यसंशयदशायामपि
सुलभमेव धर्मितावच्छेदकावच्छिन्नधर्मिविषयताया एवसंशयत्वघटकतया धर्मितावच्छेदकानवच्छिन्न
55 तद्विशेष्यताया निश्चयत्वसंपादकत्वात् नच धर्मितावच्छेदकप्रकारेण सकलधर्मिणामेव तदा मानवसंभ
वात् धर्मिविषयतायाः धर्मितावच्छेदकानवच्छिन्नत्वं दुर्घटमिति वाच्यं एवं ज्ञाने धर्मितावच्छेदकावच्छिन्नत
दनवच्छिन्नविषयतायाः स्वतेबाधकाभावादित्याशयेनाह ज्ञात्वेति सः स्वप्रतियोगितावच्छेदकीभूतसाध्यस
मानाधिकरण्यप्रकारकनिश्चयः सर्वत्र साध्यसंशयदशायामपि पक्षे हेतुमत्तानिश्चयसत्त्वे हेतुमत्तांशे
निश्चयात्मकहेतुसामानाधिकरण्यज्ञानसत्त्वेन साध्ये हेतुसामानाधिकरण्याभावसंशयः सुलभ एवेत्याशयेना
ह साध्य इति नतथापि हेत्वाभासत्वमितत्वयः उक्तानुपसंहारितायाइति शेषः अत्र हेतुः सामग्रीत्वेन प्रतिबंध
कतयेति तज्ज्ञानस्येति शेषः अन्यथा प्रतिबंधकसैव सामग्र्यात्मकधीविषयस्यापि हेत्वाभासत्वे व्यभिचारिता
व्यभिचारितेत्यादि पंचस्वेव साधारणान्वयः तत्र च व्यभिचरितादिघटकएवसाधारण्यत्वादि प्रत्येकंहेतोः सा
धनवत्त्रिः साधनसाधारणतद्भिन्नत्वं पक्षस्यबोध्यं प्रथमद्वयं हेतौ व्याप्तिघटकदलयोः प्रत्येकाभावसंशायकं तृती
यं विशिष्टव्याप्त्यभावसंशायकं तुरीयं पक्षधर्मत्वसंशायकं पंचमं पक्षे साधनाभावसंशायकमिति भेदः तस्यापि ५५
तादृशरूपवत्त्वादिमत्त्वस्यापि इतरसाधनस्येन विशेषादर्शनादिसहकारेण तन्निश्चयेति अव्यभिचारादिनिश्चयेन्य
थाः मन्यतसामग्री लौकिकप्रत्यक्षसामग्रीघटकविशेषणज्ञानादिविषयातादृशसामग्र्या अपि बलवद्विप
रीतभानसामग्रीत्वेन पक्षादौ हेतुमत्ताज्ञानप्रतिबंधकत्वादिभावः दूषणांतरमाहापिचेति साध्याभावसंदेह
विषयमात्रवृत्तित्ववृत्तित्वमिति तन्मात्रकव्याप्तिग्रहाविरोधित्वेपिविरोधवदन्वयव्याप्तिग्रहविरोधित्वेन हेत्वाभा

सातायात्पृथ्वीत्वादिति भावः व्यतिरेकिणि पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ नियतविषयत्वेन पृ
थिव्यादिमात्रविषयेण संपद्यते निर्वहतीति तथा च तत्राप्यनुपसंहारित्वापत्तिरिति भावः इदमुपलक्षणं असा
धारणो व्यतिप्रसंगो बोध्यः वस्तुतस्तु असाधारणेपि व्यतिरेकव्याप्तिग्रहेण व्यतिरेकिपदेनासाधारणस्य सा
ध्यादेव लाभः नन्वसाधारणादिव्यावर्तनायैव संदेहविषयताव्याप्यव्यतिरेकसत्ताप्यनुपसंहारित्वे निवेश्य
त्यत आह इष्टापत्तेः अन्वयव्याप्तिग्रहप्रतिबंधलक्षणहेत्वाभासताप्रयोजकत्वे साध्यसंदेहविषयमात्रवृत्तित्वा
श्रमात्रस्यासाधारणादिसाधारण्येन हेत्वाभासताविरोधीत्यर्थः नन्वस्तु तर्हि व्यानुपसंहारित्वं व्यतिरेकिणस्तथा
त्वेपि व्यतिरेकव्याप्त्युपदर्शनात्तानुमितिविरोध इत्यत आह न चेति व्यतिरेकव्याप्तिग्रहविरोधिनो हेत्वाभासांतरता
विरहात्सव्यभिचारस्य पंचतभावे सोपाधिकत्वात्सोपाधिकानुपसंहारित्वप्रपत्तौ र्हि तत्त्रयेणैव व्यवस्थापयितुं भूमिकामा
ह व्याप्तिग्रहेति एकहेत्वाभासत्वं सव्यभिचाररूपैकहेत्वाभाससव्यभिचाररूपैकहेत्वाभासांतर्गतत्वं स्वरूपं व्यापकता
ज्ञानस्यानुमितिहेतुतया निराकृतत्वादाह व्यभिचारित्वस्यैवेति सामानाधिकरण्यस्य साध्यसामानाधिकरण्य
स्य सामानाधिकरण्यमेवासाधारण्येन तु मणिकारसंमतं साध्यव्यापकीभूताभावप्रतियोगित्वेन तस्यानुमितौ सा
क्षादेव विरोधित्वेन सत्प्रतिपक्षादिवद्व्यभिचारान्यहेत्वाभासतापत्तिरित्याशयः असाधारण्यस्य सा
ध्यसामानाधिकरण्यरूपत्वे नाशेति विरोधित्वादिघटित इष्टोक्तसामान्यलक्षणस्याव्याप्तिव्याप्तिकवलित
त्वात् स्वयं सामान्यलक्षणमाह लक्षणांतरेति ज्ञानस्य विषयतया विषयीभूयविरोधितावच्छेदकं प्रतिबंधकता
वच्छेदकीभूतज्ञानवृत्तिविषयताकत्वमिति पर्यवसितं एवमग्रेपि सर्वत्र बोध्यं अनुपसंहारित्वसंग्रहायाह व्या
मीश्चेति केनापि रूपेणव्याप्तीनामनुगमे तज्ज्ञानसामान्यविरोधित्वेन साधारण्यादिरित्यत आह प्रातिस्विकेनेत्य

गदा॰ सिद्धिभेदस्यैवानेनात्वस्यत्वं दर्शितं अप्रसिद्धिभेदो व्याप्यत्वासिद्धिः साध्यसाधनयोरवृत्तित्वं साध्यसाधनसा-
मानाधिकरण्यग्रहविरोधितया व्याप्यसाधारण्यमेवेति न ह्याप्तेरनपेक्षितया साध्यादिमत्त्वघटिततानवधावनेन
56 धूमवान् वह्नेरित्यादिस्थले पक्षसाधारण्यानुसंग्रहप्रसंगः तत्र विशिष्टसाध्यादिग्रहविरोधप्रसिद्धेः न च विशिष्टसा-
ध्यादिग्रहविरोधिनी कामिनीजिज्ञासैव प्रसिद्धेति तदन्यज्ञानविषयव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वमादा-
य लक्षणसमन्वयः संभवतीति वाच्यं पक्षपदीयपत्रकामिन्यादेरेव साध्यताहेतुतनावातत्र साध्यादिग्रहविरोध-
प्रसिद्धेरुर्वीवत्त्वादित्यत आह साध्यसाधनभेदेनेति साध्यतावच्छेदकसाधनतावच्छेदकभेदेनेत्यर्थः नोपादे-
यमिति तत्र साध्याप्रसिद्ध्यादिदोषाप्रसिद्ध्या तदनुपादानेऽप्यतिप्रसंगानवकाशादिति भावः तथा च दर्शितस्थ-
ले विशिष्टसाध्यादिग्रहविरोधप्रसिद्ध्या व्याप्तेरनावकाशत्वात् प्राप्यः पदस्वामतिवत्र विशिष्टसाध्यादिग्रहकत्व-
मविरोधं न्नार्थ स्तदाः विरोधिनङ्क्त्वं तत्स्योपादानेऽपि नाव्याप्तिरित्यपि बोध्यं अन्यत्रापि वस्तुमाणसाधारणादिल-
क्षणेऽपि शेषं अवच्छेदकत्वनिर्वचनविशिष्टानतराचटितत्वनिवेशनादिकं नत्र नीलधूमादित्यादौ हेतुतावच्छे-
दकस्य साध्यसामानाधिकरण्यानवच्छेदकत्वरूपव्यर्थविशेषणतायां व्याप्यत्वासिद्धिप्रभेदत्वेन व्याप्तिग्रह-
विरोधित्वमानियव्याप्तिग्रहविरोधित्वामति व्याप्तिमाशंक्याह साध्याव्यभिचरितेति स्वमनेव्यापकताज्ञानस्यानु- ५७
मित्यहेतुत्वेन तद्विरोधिनोऽव्यापकत्वादेः साक्षात्ज्ञानकज्ञानाविरोधित्वेन न हेत्वाभासत्वमिति तन्मताभिप्रा-
येणाह व्यभिचरितत्वं चेति साध्याभाववद्वृत्तित्वमेवेत्यर्थः कण्ठाद्यादिति पक्षज्ञानविषयतयेत्यर्थः हेतौ साध्या-
व्यभिचारावगाहित्वे सतीति तत्र सामानाधिकरण्यावगाहिज्ञानं तद्विरोधित्वेन विशेषणं न तु व्यभिचारविशिष्ट-
सामानाधिकरण्यावगाहित्वमिति सम्प्रदायार्थः तथा च विशिष्टाभावग्रहस्य विशिष्टवत्ताज्ञानस्य विरो-

धितपातत्वेपि साध्याव्यभिचारी साध्याव्यभिचारी साध्यसमानाधिकरणस्य हेतोरविशेषकलितदलद्व-
यावगाहिज्ञानोदयाव्यभिचारी साध्यसमानाधिकरणस्य हेतोर्विशिष्ट विशिष्टाभावेऽतिव्याप्तिरिति भावः सा-
ध्याप्रसिद्ध्यादेर्व्यभिचारानात्मकस्यापि व्याप्यत्वासिद्धेः सत्त्वाद्विशिष्टाभावस्यासिद्धिर्व्यभिचारोभयरूपत्वे-
पि नतिरिक्त्यत्रानिर्भरस्तद्वचनापगाहिभावनीयत्वेपुनर्विशेषः ग्रन्थानुमितौ सामानाधिकरण्यसंबंधेना-
व्यभिचारविशिष्टस्य सामानाधिकरण्येन तत्प्रकारकहेतुज्ञानत्वेन न हेतुता सामानाधिकरण्यविशिष्टाव्य-
भिचारज्ञानत्वेनापि विनिगमनाविरहेण हेतुताप्रसंगान् हेतोर्व्यभिचारज्ञानकालेपि हेतुविशेषणतापन्न-
सामानाधिकरण्यांशे विशेषणतया व्यभिचारभाने बाधकाभावेनानुमित्यापत्तेश्च न चोभयविधविधिवि-
शिष्टज्ञानस्यानुमितिहेतुत्वोपगमाद्धेतौ व्यभिचारग्रहदशायां तत्र सामानाधिकरण्यविशिष्टाव्यभिचार-
ग्रहदशायां तत्र सामानाधिकरण्यविशिष्टाव्यभिचारग्रहाभावान्नानुमित्यापत्तिरिति वाच्यं उभयविधज्ञान-
सत्त्वे वानुमितिरित्युभयानुभवविरोधेनासंभवात् तृणारणिमणिन्यायेनैवोपदर्शितोभयविशिष्टज्ञान-
हेतुतायाः स्वीकरणीयत्वाद्व्यभिचारग्रहकाले तदभावविशिष्टसामानाधिकरण्यग्रहाधीनानुमित्यापत्ते-
रुद्धरत्वात् तथा चाव्यभिचारसामानाधिकरण्योभयावच्छिन्नहेतुविषयताशालिज्ञानत्वेनैवानुमितिहेतु-
तावाच्यतादृशविषयज्ञाने प्रत्यक्षाभावज्ञानमेव विरोधितत्वेकविशिष्टापराभावज्ञाने प्रतियोगितावच्छेदकविशि-
ष्टप्रतियोगिमत्ताबुद्धेरेवाभावधीप्रतिबध्यत्वादिति विशिष्टाभावस्य हेत्वाभासत्वमेव दुर्घटं ज्ञातभावविचा-
रइति चेन्न सामानाधिकरण्यसंबंधेनैकविशिष्टापरस्याभावग्रहो यथा तादृशविशिष्टप्रकारकग्रहविरोधी
तथा यकगापद्विशेषणाविशिष्टोभयधर्मावच्छिन्नतयापकधर्मिग्रहेप्युभयाभावग्रहवद्विरोधस्युभयाभावस-

गदा॰ मपीलतावच्छेदकाभावग्रहदशायां सामानाधिकरण्येनैकविशिष्टापरग्रहसमये तद्धर्मद्वयवत्ताग्रहात्त्या॰
दृशस्यानुभवसिद्धतया प्रत्यासत्त्यात्तमशक्यत्वात् अतएवासिद्धिग्रंथे व्याप्तिविशिष्टपक्षधर्मताविरहस्य विशि
57 ष्टपरामर्शविरोधितयता दोषत्वं स्वयं व्यवस्थापयिष्यते नहि विशिष्टपरामर्शस्य व्यापकविशिष्टापरामर्शस्य
पकविशिष्टापरावगाहित्वेकारणतावच्छेदकं लाघवेनानुभवबलेन च हेतौ व्याप्तिपक्ष धर्मतोभयावगाहि
ज्ञानस्यैवानुमितिहेतुत्वोपगमात् न चैवं विशकलितव्यभिचारेण संभव इति वाच्यं विशकलितोभ
यावगाहित्वं हि न मिथो विशेषणीभावानापन्नोभयावगाहित्वं अपि तु धर्मिनिष्ठविभिन्नविषयतानिरूपि
तोभयविषयताप्रतियोगित्वं तच्च साध्याव्यभिचारी हेतुः साध्यसमानाधिकरणो हेतुरिति समूहालंबनबु
द्धौ तस्याप्यनविशिष्टाभावधीप्रतिबध्यता अपि तु उभयविषयतानिरूपितैकविषयताशालिबुद्धेरेवेति
वर्णितं साधारण्यग्रंथे असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषकतायां मणिकारसंमततया दत्रापि॰
नापूर्वं साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यमिति व्याख्यातं तच्च स्वानभिमतमित्यन्यथा तन्निर्व
क्तिअसाधारणत्वे त्विति पक्षव्यावृत्तत्वमिति पर्यंतग्रंथस्य पदं विवरणीयमिति तदेवासाधारण्यत्वरूपमा॰
मस्तु किं मे तत्रत्यतद्विवरणेन तथापि सपक्षव्यावृत्तत्वमसाधारण्यत्वमिति प्राचीनप्रवाहाविरुद्धत्वं स्वमतस्य ५१
दर्शयितुमेतद्विवरणं निश्चितसाध्यवद्व्यावृत्तत्वस्य व्याप्तिग्रहं प्रति साक्षाद्विरोधितायाः प्राग्व्यवस्थापित॰
त्वात् निश्चयांशपरित्यागेन सपक्षपदं व्याचष्टे सपक्षेति तद्व्यावृत्तत्वं पक्षेतदवृत्तित्वेन तदा साध्यादिनिष्ठहे॰
तुसामानाधिकरण्यसाध्यवद्वृत्तित्वविशिष्टसाधनादेरसंग्रह इति तत्साधारण्यपव्यावष्टे तद्व्यावृत्तत्वमि
ति साध्यप्रसिद्धादेरपि विशिष्टसाध्यादिसाध्यादिसामानाधिकरण्यग्रहविरोधितयेति प्रसंगवारणाय विशि

ष्टसाध्यादिमत्त्वग्रहाविरोधित्वमधिकं प्रवेशयन् विरोधिपदस्य प्रतिबंधकपरताभ्रमनिराकरणायेत
दर्थं विवृणोति प्रकृतेत्यादिना प्रकृतत्वं साध्यतावच्छेदकत्वादिवैशिष्ट्यं तदुभयेनविशिष्टसाध्यसाधनोभ
येत्यर्थः इत्थं सामानाधिकरण्यग्रहाविरोधितात्मकानुगमकप्रकारेण न त्वविशिष्टसाध्यसाधनसामाना
धिकरण्यग्रहत्वावच्छिन्ननिरूपितविरोधितामवलंब्य विशेषविरोधिताव्यावर्तनायावश्यं प्रवेश्य
तेन च चावच्छिन्नत्वं स्वरूपसंबंधात्मकमेव निवेश्यते न न्यूनवृत्तित्वं गौरवात् तथा च विशिष्टसाध्यसा
ध्यसाधनग्रहाविरोधित्वनिवेशनमनर्थकं साध्याप्रसिद्ध्यादिग्रहप्रतिबध्यतया विशिष्टसाध्यादिग्रह
त्वेनैवावच्छिन्नत्वादित्यत आह चास्वयस्येति विशेष्ययोस्सर्पशाल्वयोः परस्परमसामानाधिकरण्यं संश
ष्टं तदित्यनेनान्वयः तथा स्वरूपसंबंधरूपावच्छिन्नत्वनिवेशे तत्राव्याप्तिः तादृशविरोधित्वस्य प्रतिबंध्यताव
च्छेदककोटौ साध्यतावच्छेदकत्वाद्युपत्वादिविषयत्वाप्रवेशो विशिष्टसाध्यादिसामानाधिकरण्यग्र
हत्वावच्छिन्नविरोधितायास्तत्रासत्त्वादित्यन्यूनवृत्तित्वरूपमेव तन्निवेश्यं तथा च न तत्स्थलीयसाध्याप्र
सिद्ध्यादिग्रहप्रतिबध्यतायामपि विशिष्टसाध्यादिसामानाधिकरण्यग्रहत्वान्न्यूनवृत्तित्वात् तथातिप्रसं
गवारणाय विशिष्टसाध्यादिग्रहाविरोधित्वनिवेशनमावश्यकमिति भावः ननु साध्यस्यावृत्तित्वे वा
धरूपेसानस्य चावृत्तित्वे स्वरूपासिद्ध्यात्मके ऽतिव्याप्तिः तत्र तद्ग्रहस्यापि साध्यवत्तादिग्रहविरोधितया
तद्धेतौभयसामानाधिकरण्यग्रहाविरोधित्वादित्याशंकां तयोर्लक्ष्यतास्वीकारेणानोपयनेविति र
भावः ननु साधनादेः साध्यसामानाधिकरण्यादिके विरोधपदस्य कथमसाधारण्यतोपगम इत्यत आ
ह इमिति मणिकृतपदस्यार्थविरोधित्वमनुमतं न तु गमेत्यर्थः नन्वेवं भवतां को विरोधि इत्याकांक्षायामाह

गदा०

58

इत्थं चेति तदीयं मणिकारीयं साध्यव्यापकीभूताभावप्रतियोगित्वरूपमसाधारणत्वं ननु साधनादेः
साध्यसामानाधिकरण्यवत् तस्य तद्व्याप्यत्वमप्युभयसामानाधिकरण्यग्रहविरोधीति तत्रोक्ता
लक्षणाति व्याप्तिरित्याशंकां त्वस्यताप्रदर्शनेन निरकरोति प्रकरणसमे पक्षनिष्ठसाध्याभावादिव्या
प्यत्वं तद्व्याप्यं पक्षनिष्ठसाध्याभावादिव्याप्यव्याप्यं न स्वबाधसत्प्रतिपक्षविशेषत्वाभावादिति शेषः
तत्र हेतुमाह पृथगिति पक्षनिष्ठसाध्याभावादिव्याप्यसत्प्रतिपक्षतया स्वतंत्रपरिगणनात् तादृशस्य तद्
व्याप्यस्य साध्यवत्ताज्ञानाविरोधिधीविषयत्वे न हेत्वाभासत्वाविरहाच्चेत्यर्थः व्यतिरेकव्याप्तिग्रहं इति हेत्व
भावत्वावच्छिन्नधर्मिकसाध्याभावव्यापकताग्रहेत्यर्थः साध्यादेरित्यादिना साधनस्य साधनाभावस्य च
परिग्रहः स्वेतराभावाप्रतियोगित्वेनादिपदग्राह्यसाधनस्याप्यन्वयः स्वप्रतियोगित्वादीत्यादिना सा
ध्याभावव्यापकत्वपरिग्रहः तस्य च साधनाभावेन संबंधः स्वाभावाप्रतियोगित्वधीः स्वाभावप्रतियोगि
त्वप्रकारकं ज्ञानं प्रत्येव विरोधिनी न तु तदप्रकारकसाध्याभावव्यापको हेत्वभाव इत्यादि ज्ञानं प्रतिग्रा
ह्याभावानवगाहित्वात् न चैतादृशज्ञानेपि संसर्गतयाऽभावप्रतियोगित्वभानात् अभावाप्रतियोगित्वं
ग्राह्याभावरूपमेवेति वाच्यं अभावांशे विशेषणीभवतः साध्यादेरनुयोगितायाएव संसर्गतया प्रतियोगिता
यास्तत्राभानात् प्रतियोगितानिरूपकत्वावच्छिन्नैवानुयोगितासंबंधेन तु केवलाप्रतियोगितात्वेन प्र
तियोगियोगितायाः यास्तत्राविरहात् तद्रूपावच्छिन्नाभावस्य विरोधित्वानुपपत्तिः यत्तु अभावे अनुयोगिता
संबंधावच्छिन्नसाध्याद्यभावस्य वैशिष्ट्यविवक्षणे तदपि न वाच्यत्वादिसाध्यहेतुकेपि संयोगादिसंबंधा
वच्छिन्नप्रतियोगिताकस्याद्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य वाभावस्यानुयोगितासंबंधेन साध्यादिसं

बंधित्वात् तदभाववत्तावच्छेदेन तत्संबंधावच्छिन्नसाध्याद्यभाववत्ताः प्रसिद्धेः अभाववत्त्वसामानाधिकरण्यमात्रेण
तद्वत्ताधियः अभाववत्त्वसामानाधिकरण्यमात्रेण साध्यादिप्रकारकव्यतिरेकव्याप्तिग्रहाविरोधितया तस्य
दोषत्वायोगात् स्वरूपादिसंबंधावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगितानिरूपितानुयोगितासंबंधस्य चा
प्रसिद्ध्या तादृशसंबंधावच्छिन्नाभावोऽपि प्रसिद्ध इति न तादृशस्य दोषतोपगमसंभवः साध्यताद्यवच्छेदकस्य
त्वावच्छिन्नसंबंधविशेषावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नप्रतियोगिताकाभावोऽभावांशे तादृशसं
बंधेन प्रतियोगिविशेषणतापन्नसाध्यताद्यवच्छेदकादिप्रकारकव्यतिरेकव्याप्तिग्रहविरोधितयाऽनुपसंहा
रित्वमित्यपि न सार्वत्रिकविशेषणतानवच्छिन्नज्ञानत्वाद्युपपन्नसाध्यताद्यवच्छेदकतानवच्छेदकस्वरूपतत्त्वप्र
कारकव्यतिरेकव्याप्तिबुद्धेरेव हेतुत्वनियतत्वेन तदभावप्रकारकज्ञानस्य नियमेन तदंशे प्रतियोगितावच्छेदक
प्रकारकप्रतियोगिमत्ताबुद्धेरेव समानप्रकारकतयाऽभावग्रहप्रतिबध्यत्वात् वृत्त्यनियामकसंबंधस्य संसर्गा
भावप्रतियोगितानवच्छेदकतया तादृशसंबंधावच्छिन्नाभावाप्रसिद्धेश्चापतेन तत्संबंधेन तत्प्रकारकबुद्धेः समा
नधर्मिकतत्संबंधावच्छिन्नतदभाववत्ताबुद्धिवत् तद्धर्मस्य तेन संबंधेन तत्प्रकारकबुद्धेः समानधर्मिकत
त्संबंधावच्छिन्नतदभाववत्ताबुद्धिवत् तद्धर्मस्य तेन संबंधेनासंबंधित्वग्रहस्यापि प्रतिबंधकत्वमानुभविकं
अत एव साध्यादेर्वृत्तित्वस्य बाधादिप्रभेदतोक्तिरपि संगच्छते एवं च साध्यादेर्वृत्त्यंताभावाप्रतियोगित्वादिकमि
ति यथाश्रुतस्यैव संगतिरित्यप्यफलं केवलान्वयिद्वित्वाद्यवच्छिन्नाभावप्रतियोगित्वसत्त्वेन न तन्निरूपितप्रति
गित्वाप्रसिद्धेः स्वरूपादिसंबंधावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तदभावस्याप्रसिद्धेः सा
ध्यताद्यवच्छेदके संबंधविशेषावच्छिन्नप्रतियोगितानवच्छेदकत्वमनुपसंहारित्वमित्यस्य स्वरूपतो ज्ञानत्वादि

गदा. प्रकारेणासंवद्धत्वेग्रहस्यासमानप्रकारकतयाः विरोधित्वात् साध्यतावच्छेदकावच्छेदेनवर्तमानः साध्यतावच्छे
दकसंबंधावच्छिन्नप्रतियोगित्वाभावोऽनुपसंहारित्वमितिप्रगल्भानुसारिमतमनुमतमेवदीधितिकृतांव्या
59 सिवाद्दोनिराकृतत्वात् अत्राहुः विशिष्टबुद्धौ विशेष्येप्रकाराभावग्रहवद्विशिष्टसंसर्गकबुद्धौसंसर्गसंसर्गता
वच्छेदकाभावग्रहोपिविरोधीसंसर्गविशेषावच्छिन्नविषयतायाएवग्राह्याभावप्रतिवध्यतावच्छेदक
त्वात् विशिष्टसंसर्गकस्थलेसंसर्गतावच्छेदकीभूतविशिष्टस्यापिसंसर्गातः यातिसंसर्गतयासंसर्गतावच्छेद
कविषयतायाअपिसंसर्गावछिन्नत्वात् एवंचवाच्यत्वाद्यवच्छिन्नत्वस्वरूपसंबंधावच्छिन्नतोभयविशेषि
तप्रतियोगितासंसर्गकवाच्यत्वाभावव्यापकोहेत्वभावइतिज्ञानेप्रतियोगितात्वावच्छेदेनतदुभयाभावग्रहस्य
विरोधितयातद्विषयतारूपाभावोनुपसंहारित्वमितिविवक्षितंअधिकयत्नंत्रानुसंधेयंननूक्तलक्षणस्यहेतौनिष्ठ
साध्याभाववद्वृत्तित्वरूपसाधारण्येऽतिव्याप्तिः तज्ज्ञानस्यापिहेत्वभावप्रतियोगिकाभावेहेतौसाध्याभावसामाना
धिकरण्यावगाहितयाहेत्वभावेसाध्याभावसमानाधिकरणाभावाप्रतियोगित्वज्ञानविरोधित्वात् साध्याभाव
समानाधिकरणत्वेनभासमानेअभावेहेत्वभावप्रतियोगिकत्वग्रहस्यतदल्पविषयितयाहेत्वभावेतादृशा ५७
भावप्रतियोगित्वावगाहनादित्यभिमानेनिराकरोतिवस्तुभावाभावत्वेनेतिकदाचिद्विरुध्यादिति संभावना
यांलिङ्गत्वपवितिवेषयतायांमानाभावात् भावेवेहापिअसमानप्रकारकतयाउक्तज्ञानस्यव्यापकताज्ञानविरोध
तायाविवादसहत्वादनिर्भरोनत्ववच्छिन्नत्वेनेतितेनरूपेणमानेहेत्वभावांशेप्रतियोगितायाअसंसर्गाहितिभावः
नातिप्रसंगइतिहेतुतावच्छेदकावच्छिन्नस्यसाध्याभाववद्वृत्तितायाएवसाधारण्यत्वात् उक्तबुद्धेर्विरोधितायाःआ
मासिकत्वेहेत्वभावाभाववत्त्वावच्छिन्नस्यसाध्याभाववद्वृत्तितायालक्ष्यत्वादेवेतिभावः ननुअभावेपिअभावाप्र

तियोगित्वरूपत्रयसंहाहित्वसंभवेपि अन्वयव्याप्त्युपादानेन अन्वयव्याप्तिधीसंभवेन नानुमितिप्रतिरोधः वि
शेषदर्शिनोपि नानुमित्यनुत्पादः नचैवमपि केवलान्वयिसाध्यकहेतौ एतपातत्वघटकाः निग्रहप्रसं
गइति वाच्यं अभिमतसाधकतावच्छेदकाभावस्यैव निग्रहप्रयोजकतया अन्वयिमुद्रयागमकतापाद
कियता तत्र निग्रहायोगात् व्यतिरेकिप्रयोगे निग्रहस्येष्टत्वादिति व्यभिचारः गंधः साध्याभावत्वं साध्य
विरोधित्वमात्रमिमत्र मूले साध्यविरोधित्वपदं साध्यासामानाधिकरण्ये तदा साध्यासामानाधिकरण्यपदोपा
दानेनैव यथेष्टमिति न ह्यावश्यं साध्यैति साध्यासामानाधिकरण्यत्वं साध्यानधिकरणवृत्तित्वं न तु साध्याधिकरण
वृत्तित्वमतो न साध्याभावपदोपादानवैयर्थ्यं अधिकरणभेदेन संयोगाद्यभावभेदाद्दलक्षणं अतो न संयोगाद्
व्यत्वादित्यादावतिव्याप्तिः साध्यासमानाधिकरणपदं प्रतियोगिवैयधिकरण्यविशिष्टार्थकमित्यपि केचि
त् तत्र साध्याभावप्रतियोगित्वेन साध्योपादानस्यापि रोवफलेन नास्तिकास्पर्शानल्पत्वात् मूलस्यमात्रपदे
न भावव्यावर्तकाभावत्वनिवेशव्यवच्छेदः अभावस्य अभावप्रतियोगिकस्य भावत्वेपि भावतयाऽभावत्वविर
हेपि अभावत्वनिवेशाभ्युपगमेनाभावाभाव इत्यादिकल्पातपभिधानस्यासिद्धांतभ्रमनिरासायाह दीधितौ एक
देशीति न च घटाभावो नास्तीत्यादिप्रतीत्या घटाभावाभावत्वविशिष्टधर्मीसिद्ध्यतिनस्यातिरिक्तत्वे च सैव विरुण
द्धि तस्यापव घटादिरूपभावे स्वाभावप्रतियोगित्वावगाहित्वादित्याशंकनेन चेति संबंधांतरत्वात् अभावत्वा
त्मसंबंधत्वात् सच संबंधः स्वरूपाद्यतिरिक्तोनतिरिक्तो वोभयथैवनत्तातिरिति भावः वाधादित्यस्य भावइत्या
दि अविरोधादिति अभावाभावस्यातिरिक्तत्ववादिनापि प्रतियोगिमत्ताज्ञानस्याभावग्रहप्रतिबंधकत्वोपगमा
दिति भावः अनवस्थाअतिरिक्तानामभावानामप्यनतिरिक्ताभावकल्पनायामनंताभावकल्पनागौरवं वाध

गदा० काभावादिति भावस्यैवाभावत्वकल्पनायोगादिभावः मूले भावेनैवेति घटाभावो नास्तीति प्रतीतेर्घटादि-
60
रूपभावविषयकत्वेनैवेत्यर्थः किमधिकेन घटाद्यनतिरिक्ताविषयकत्वेन यथाऽतिरिक्तस्यापि तेजोभावादे
रिदंत्वादिविशिष्टस्य न प्रतियोगिग्रहसाध्येत्यग्रहत्वं किंत्वभावत्वावच्छिन्नस्यैव तथा च घटत्वादिविशिष्टस्य
प्रतियोग्यनिरूप्यत्वेऽपि घटादेरभावत्वेन प्रतियोगिनिरूप्यत्वे बाधकविरहादिति भावः अभावाभावप्रतीतेः प्र
मात्वाभिधानस्याभावे भावप्रतियोगिकत्वबाधकतादृशप्रतीत्यप्रमात्वप्रसंजनसूचकतां स्फुटीकरोति दी
धितौ भावस्येति भावस्याभावप्रतियोगिकत्वेऽपि घटाभावो नास्तीत्यादिप्रतीतेरभावादिवैशिष्ट्यांशेऽप्रमात्वसंभ
वाद्भावरूपप्रतियोगिधर्मितावच्छेदकतायामभावत्वांशेऽप्रमात्वानुपपत्तिलाभाय व्याचष्टे भावेति अभाव
त्वं भाववैधर्म्यं तच्च भावेन संभवतीति तद्विशिष्टवाचकतज्जहेत्वित्यादि घटाभावो नास्तीत्यादिप्रतीतेस्तेन रूपेण घ
टाद्यवगाहित्वे तदंशेऽप्रमात्वं व्याहन्येतेति मूलाभिप्रायः अभावत्वं यदि भावभिन्नत्वं तदा भावे तदप्रसक्त्या
भावेऽप्यभावत्वस्वीकार इत्यर्थकान्यथेति मूलान्तर्गतेति इतोऽभावत्वस्यानतिरिक्तत्वं व्यवस्थापयति अभावत्वं चेति
प्रथमं भावत्वादिप्रकारकज्ञानानन्तरमतिदृष्टायामभावो न भाव इति एतावतापि अभावत्वस्य भावभिन्नत्वस्वरू
पत्वानिराकृतत्वात् यथा सत्यभावो न भाव इत्यनयोः समानार्थकतया विषयभेदाधीनद्विधाभित्वानुपपत्तेः न ६०
नु तथाप्यभावत्वस्य निर्विकल्पकावेद्यतायाः सिद्धौ न सिद्धत्वाद्विशेषणज्ञानविरहेण प्रथमं तत्प्रकारकप्रत्यय
स्यानुपपत्तिरित्यत आह तच्चेति अनुपस्थितमिति विशिष्टबुद्धौ विशेषणज्ञानहेतुतायाः विशेषणभेदेन भिन्नत
याऽभावत्वविशिष्टबुद्धौ उक्तज्ञानहेतुत्वाकल्पनादित्यभिप्रायः न तु केवलप्रमेयत्वादिनाऽभावत्वादिप्रका
रकोपनीतभानस्वीकारात्स्वरूपतोऽभावत्वप्रकारतानैयत्यवारणाय स्वरूपतस्तत्प्रकारकबुद्धौ लौकिकान्य

त्वं कार्यतावच्छेदककोटावनिवेशेऽपि स्वरूपसत्तद्विषयकज्ञानत्वेन हेतुता कल्प्यते लाघवात् तथा
च घटो नास्तीत्यादिलौकिकप्रत्यक्षपूर्वकालेऽपि स्वरूपसत्तद्विषयकज्ञानमपेक्षितमित्याशयेनाह नि
र्विकल्पकोऽपेक्षितेति तस्याश्चाभावत्वस्य निर्विकल्पकावेद्यत्वप्रयोजकभावविभिन्नत्वरूपाभावत्वमे
तेष्वतत्स्य घटाद्यन्तरतादात्म्यादीनां तत्तत्स्यानिर्विकल्पकवेद्यत्वाभिप्रायमेवेति भावः नन्वेवमभावत्वस्य
नित्यत्वे सत्यनेकव्यक्तिवृत्तित्वेन तथा जातित्वापत्तिरित्यत आह अभाववच्चेति इदन्तु बोध्यम् अभावत्वं प्रति
योगितारूपः प्रतियोगिनिरूपितः संबंधविशेष एव प्रतियोग्यादिभेदाद्भिन्नश्चेत्यनुगमकधर्मान्तरप्र
कारेणैव तस्य नास्तीति बुद्धिप्रकारता संबंधिकतया च तस्य प्रतियोग्युपरागेणैव भानं निर्विकल्प
कवेद्यता चानुगमकधर्मस्यैव प्रपंचितं चैतदधिकमधस्तात् अधिकरणस्याभावरूपत्वे अभा
वाधिकरणत्वानुपपत्तेरतस्तद्धर्मैवेति अभावत्वाव्याहारोपपत्तेरिति भावेऽभावाभावत्वस्वीका
रे भावाभाववत्वस्यापि तत्र संभवादिति भावः प्रतिवादिमात्रस्यानुमतत्वेन तथा फक्किकां दर्शयति लाघवादिति
अनेन धर्मिण्यभावत्वकल्पनापेक्षया पक्षत्वकल्पने इत्यादिः घटत्वाद्यभावाभावस्यातिरिक्तत्वे दूषणा
क्यासंभवाद्भावो नाभाव इति प्रतीतेरुपपत्तयाऽभावत्वं भावव्यावृत्तमेवेति फक्किकावेदनिर्भरं दर्शय
ति अबाधितेति प्रमात्मके इत्यर्थः एतेनानेकधर्मिणां बहुत्वस्य पक्षधर्मकल्पनाधामबाधकत्वे अभा
वमात्रासिद्धिप्रसंगेन संयोगादिसाधारण्येनैतस्य सप्रतियोगिकत्वस्येत्यादिः तथा च सप्रतियोगिकत्व
स्य नास्तीति प्रतीतिविषयत्वे घटसंयोगादिमत्यपि घटो नास्तीति प्रतीतिः स्यादिति भावः अत्रासिद्धाना
नुमानिनः अभावत्वं भावाभावसाधारणमेव नास्तीति प्रत्ययनियामकं यादि भावो भाव इति प्रत्ययः

गदा॰

प्रामाणिकः तद्घटाभावव्याप्तत्वमप्यभावत्वेनाप्रत्ययनियामकतयास्वीक्रियतां न तु तद्देवनास्तीति
प्रत्ययनियामकं तथा सत्येतदभावकल्पनगौरवात् भावाभावसाधारणैकधर्मस्यैव लाघवेन नास्ती
ति प्रत्ययनियामकं तथा सत्येतदभावकल्पनगौरवात् भावाभावसाधारणैकधर्मस्यैव लाघवेन
नास्तीति प्रत्ययनियामकतया कल्पनौचित्यात् यत्तु अनन्तघटादीनां घटाद्यभावत्वकल्पने गौर॰
वात् ज्ञातत्वेनानतिरिक्तैकैकाभावेन तत्कल्पनमुचितमिति तन्न इदं प्रतिभाति घटाभावाभावनिरूपितो॰
नुयोगिताविशेषः स च घटनिष्ठघटाभावनिरूपितोऽनुयोगिताविशेषः स च घटनिष्ठघटाभावीयप्रति
योगितातो नातिरिच्यते सा चानन्तघटेषु प्रत्येकं सत्त्वान्नैवमत्र घटाभावप्रतियोगिग्रत्रघटाभावाभावइति
प्रतीत्योर्विशेषापत्तिः प्रतियोगितानुयोगितात्मकरूपविभिन्नधर्मावगाहने नैव तद्विशेषात् अभाववि
रहात्मत्वं वस्तुनः प्रतियोगिनेति प्रवादाविरुद्धस्वापयथाः घटादेः संयोगादिसंबंधस्यैव संसर्गादिसंबं॰
धावच्छिन्नस्वाभावाभावत्वविशिष्टनिरूपितत्वं स्वीक्रियते न तु समवायादेः तेनैकपादौ संयोगादिसंबं
धावच्छिन्नघटाभावो नास्तीत्यादिप्रत्ययप्रसंग इत्यलमपल्लवेन साधारणविरुद्धयोर्गमकत्वभ्रमनूपा
पाकोनकश्चिद्विशेषइति मूलोक्तं हेत्वयतिव्यभिचारिणीत्यादिना अव्यभिचारमात्रइति भ्रमइत्यग्निमे ६०
णान्वयः मात्रपदेन साध्यसामानाधिकरण्यभ्रमव्यवच्छेदस्तत्सामानाधिकरण्यांशेयौन्यपिनाअव्यभिचार
सम्बन्धः नन्वेवमप्यनुमितिविरोधिरूपं उभयोरपि साध्याभावसामानाधिकरण्यमेवेति साधारणविरुद्धयोः
पृथक्परिगणनमसंगतमित्यत आह रूपकतायामिति अनुमित्यनुत्पादप्रयोजकरूपभेदविरहेपीत्य॰
र्थः निग्रहस्थानत्वेन विशेषादिति निग्रहस्थानविशेषप्रयोजकत्वेनानैकान्तिकवहिर्भावादित्यर्थः भेदेनो

पन्यासः विरुद्धस्य स्थानत्रयेणापरिगणनं अत एव उक्तं यत्तु विरुद्धस्यानैकांतिकविशेषत्वमिहेर्भूतत्वा-
देव विरुद्धस्यानैकांतिकलक्षणाक्रांतत्वेपि सूत्रांतेषु गणनद्विभजनं संगमयति तत्र लक्षणाद्योः पदार्थवि-
भाजकनिग्रहस्थानत्वाक्रांतत्वेपि यथा पदार्थेषु स्वतंत्रविभजनमविरुद्धेन यथा विरुद्धस्यानैकां-
तिकविशेषणतया अन्यैकांतिकत्वभासविभाजकरूपाक्रांतत्वेपि हेत्वाभासेषु स्वतंत्रविभजनमवि-
रुद्धमिद्धमित्यर्थः मूले विरुद्धलक्षण इति विरुद्धपदं केवलभेदानुमानेत्यर्थः नव्यार्थत्वे नियमांश-
स्य व्यर्थत्वे हेतुमन्निष्ठाभावाप्रतियोगित्वरूपायाः साध्याभावनिष्ठहेतुव्यापकतायाः हेतुसाध्या-
भावसमानाधिकरण्यघटिकाघटिततया तद्घटितविरोधभावे साधारण्यभानस्यावश्यकत्वाभिधा-
नं मूलकृतो न संगच्छते इति तत्संगमनाय वितर्कं पति व्यापकत्वमिति निरुक्तविरोधित्वादित्याद्याभावा-
द्यनवगाहनेन तज्ज्ञानस्य व्याप्तिज्ञानाद्यप्रतिबंधकत्वादित्यर्थः ननु हेतौ साध्याव्यापकीभूताभावप्र-
तियोगित्वज्ञानस्य व्याप्तिज्ञानादौ ग्राह्याभावाद्यनवगाहितया प्रतिबंधकत्वे न संभवतीति कथं हेतु-
निष्ठतादृशप्रतियोगितस्य विरोधरूपतया सिद्धांतप्रणयनमित्यत आह तत्प्रतियोगिकेति हेत्वभावप्र-
तियोगिकेत्यर्थः हेत्वभावाभावत्वेन भासमानएव साध्यसामानाधिकरण्यग्रहस्तदभावे तु लघवि-
तिवेषतया साध्यसामानाधिकरण्याभावप्रतियोगित्वमवगाहते इति तत्र तादृशप्रतियोगित्वाभावरूप-
कतया ग्रहप्रतिबंधकत्वेन तु हेतुतावच्छेदकरूपेणाभासमाने साध्यसामानाधिकरण्यग्रह इत्यरुचेरत्र-
पदं वक्ष्यमाणतया अभिप्रायेणेति प्रदिवेत्यनेन न वे हेत्वभावे साध्यव्यापकताग्रहरूपायामिति स्वरणीय-
तदभावे तु हेत्वभावेत्यर्थः असामानाधिकरण्यग्रहेपि सामानाधिकरण्यग्रहासंभवेपि साध्यव्यापका-

गदा॰ त्वं साध्यासमानाधिकरणस्वाभावकत्वरूपं यदि विवक्ष्यते तदा प्रत्रणं विनैव असामानाधिकरण्यग्रहे यो-
त्यस्यासामानाधिकरण्यग्रहदशायामिति यथाश्रुतार्थकतयैव च संगतिर्बोध्या न त्वेवं हेतुतावच्छेदका-
रूपेण अवृत्तिहेतोर्विरुद्धत्वस्याव्याप्तितया विरोधरूपतायाः श्लिष्टत्वाद् वृत्तिधर्मेति च व्यर्थमित्यत आह वृ-
त्तीति पक्षधर्मत्वाविरोधरूपतायाः श्लिष्टत्वाद् वृत्तिमन्न इति धर्मेति च व्यर्थमित्यत आह वृत्तीति पक्षधर्मत्वा-
विरोधित्वमहत्त्वाकमिति प्रतन्न्यदर्शनेन च स्वरूपासिद्धिवैलक्षण्यस्य विरोधे लाभायेति ध्येयं विशेष-
कं विरोधशरीरे समविष्टार्थकं हेतुकतायां प्रतिबन्धकतायाम् अनुपयोगित्वात् तदर्थं विषयतायाम् अनु-
पयोगित्वात् अव्याप्तिकारत्वान् अवृत्तिविरुद्धासंग्रहप्रयोजकत्वात् वृत्तिविशेषेति न संबंधेनाविरुद्ध-
त्वमभिमतं तत्संबंधावच्छिन्नसाध्यवद्वृत्तित्वनिवेशलाभायेत्यर्थः तन्निवेशनप्रयोजनमाह तेनेति लक्ष-
णं च तु एव स्वभेदं स्फुटयति आद्ययोरिति अभावाविति अत्यन्ताभावावित्यर्थः पृथिवी इतरेभ्यो भिद्यते
पृथिवीत्वादित्यादौ व्यतिरेकि साध्यवद्वृत्तित्वसत्त्वात् तत्त्वनिव्याप्तिर्न संभवतीत्याशयेनाह ज्ञानानीति प्र-
सक्तिमिति हेतुमति साध्यवत्त्वाग्रहेण तत्र साध्यवद्वृत्तित्वग्रहसंभवादिति भावः असाधारणो ग्राह्यो नि-
त्यः शब्दत्वादित्यादौ एव स्वतिव्याप्तिशङ्कोल्लक्ष्यते तां स्वीकृत्य निराकुरुते मूले असाधारणे चेति संकरप्रवे-
ति विरोधस्य दोषान्तरसामानाधिकरण्यनियममेवेत्यर्थः अनेन विरुद्धत्वेन तस्य असाधारणहेतोर्दोषत्वा-
त् उक्तत्वे सति विरुद्धात् साध्याभाववद्वृत्तित्वज्ञानाभावस्य साध्यवद्वृत्तित्वज्ञानप्रयोजकत्वेन संभवति
कार्याभावस्य कारणव्यतिरेकाप्रयोजकत्वादिति तेनेत्यनेन साहित्यलाभसंगतिरिति तदन्यथा व्याख्यानत्र- गो॰
पाद त्रैरीधितौ तेनेत्यादीति वृत्तिमत्त्वनिवृत्तिमत्त्वविशिष्ट साध्यवद्वृत्तित्वरूपहेतुज्ञानं च इदं तत्साध्याभा-

ववह्निमित्वानुमितिसामग्र्याः फलोपहितत्वानियमादित्यर्थः तथा च सामग्र्याः फलोपधाननियमात्त्र
तेधात् तज्ज्ञानस्यावसत्वकत्वमिति भावः मूले उपजीव्यत्वेन भिन्नत्वादिति व्यभिचारज्ञानोपजीव्यत्वेन विरो-
धस्यापि पृथग्दोषतयावश्यकत्वादित्यर्थः न स्वतो दूषकमिति उपाधिवन्न हेत्वाभास इति शेषः व्याप्ति
ग्रहप्रतिबन्धकत्वमित्यस्य स्वतोपीत्यादिः व्यभिचारज्ञानविरोधित्वेनेति मूलस्य व्यभिचारज्ञानाभावावि-
रुद्धत्वेनेत्यर्थो न संभवति तावता व्याप्तिज्ञानप्रतिबन्धकत्वालाभादित्यन्यथा तद्व्याचष्टे दीधितौ व्यभिचारे
तीति व्याप्तेर्व्यभिचारसामानाधिकरण्यघटितत्वमभिधाय तत्तदंशभानविरोधिनो ज्ञानस्य व्याप्तिज्ञान-
प्रतिबन्धकतां स्फुटीकुर्वन् तद्विषयस्य हेत्वाभासतायां निर्व्यूढत्वं दर्शयति तदयमर्थ इत्यादिना विरो-
धस्यैव निरूढत्वात् सचापमित्यस्य तत्त्वपरामर्शकताभ्रमं निराकरोति सचापमिति साध्याभावव्याप्यत्वज्ञा-
नवत् साध्यवद्भेदव्याप्यत्वज्ञानस्यापि विरोधितया तदनभिधाने न्यूनतां परिजिहीर्षुः साध्याभावपदं सा-
ध्यवत्त्वं तदन्योन्याभावपरतया व्याचष्टे तदभाववत्त्वमिति साध्याभावव्याप्यव्याप्यत्वादिज्ञानस्याभावपदं
विरोधिताविशेषणस्तच्चकं उपरत्रापि साध्यव्यापकाभावेत्यत्रापि अन्यथा साध्याव्यापकभाववद्भेदवत्त्वासंग्रहादि-
ति भावः व्यापकाभावव्याप्यत्वव्यापकविरुद्धत्वयोरभेदात् द्वितीये व्याप्यपदार्थाविवक्षामाह व्याप्य-
त्वमिति विरुद्धपदस्य तदभावव्याप्यतत्त्वद्वृत्तित्वोभयपरतामाह साध्यव्यापकेति सामानाधिकरण्यविरोधित्वं ग्रह-
प्रतिबन्धकताविषयत्वेन तत्तदधिकरणवृत्तित्वं तदभाववत्त्वादेरपि तत्सामानाधिकरण्याहतित्वात् व्यापकवद्-
वृत्तित्वादीत्यादिना व्यापकाभावव्याप्यत्वपरिग्रहः इदं च तदभावव्याप्यत्वग्रहस्य तत्सामानाधिकरण्यग्रहविरो-
धित्वमंगीकृत्य विरुद्धत्वादिग्रहस्य वा विरोधीति तत्तदुपलंभग्रह इत्याशयेनोपलंभपदनामविवक्षितार्थकतामा-

गाद॰ ह सर्वत्रेति सर्वत्र व्यापकविरुद्धोपलंभादित्यत्राग्निमप्रतियोग्युपलंभादित्यादौ चेत्यर्थः ॥ साध्याभावतद्व्या-
पकाभावव्याप्यत्वेनेत्यत्र मूले व्याप्यपदार्थाविवक्षायां साध्याभावव्याप्यत्वालाभः तद्विवक्षायां च साध्यव्याप-
63 काभावत्वालाभः अविवक्षिते तन्न व्याप्यत्वलाभस्तेत्यतो व्याचष्टे साध्याभावेत्तोतिज्ञानस्य दोषत्वादिति मूले ज्ञा-
नस्य विरोधित्वादित्यर्थकं तथा च सामानाधिकरण्यग्रह विरोधिरूपाणां परिगणनीयतया न तद्रूपज्ञानवि-
रोध इति भावः स्वव्यापकतयाप्यत्वसाधारण्यप्रयोजकार्थसाध्याभावत्वस्य कथितं तन्न भावरूपत्वाकांक्षायामाह दी-
धितेति तथा चेति प्रतियोग्युपलंभपदं साध्यीभूताभावच्छेदकानवच्छेदत्वतत्त्वन्ताभावत्वाद्युपग्राहकं तथा चा-
चष्टे प्रतियोग्युपलंभादिति स्वरूपतरूति विरोधिताविशेषसूचकं साध्यव्यापकाभावत्ववारणाय विरोधि-
त्वात् विरोधिज्ञानप्रकारतावच्छेदकधर्मवत्त्वात् निरुक्तान्यतमादीतिति रागिकान्यतमत्वादीत्यर्थः सा-
ध्यव्यापकविरुद्धोपलंभादित्यनेन साध्याभावव्याप्यत्वोपग्रहायाह साध्यव्यापकेत्यग्रेति धूमवत्त्वादिनित्त
योदाहरणस्य साध्यव्यापकाभावतया मध्यमे धं तन्निर्भावः संभवतीति निरूपणाविशेषे व्यापकविरुद्धान्तर्भावं दर्श-
यति धूमाभावस्येत्यादिना दर्शनयामि मतं तन्त्रमेव कारः सर्वः मध्यमे साध्यव्यापकाभावत्वेनाविषयतया-
रूपे ग्रहे दर्शनायां चरमे साध्यव्यापकविरुद्धज्ञानविषयतया रूपे स्वरूपतो ज्ञानान्ये चेति प्रकारो मध्ये योज्यः तथा ७३
च ग्राह्याभावव्याप्यत्वादिना अग्रज्ञानान्यपि व्याप्तिविरोधीनीत्यर्थः अ सामानाधिकरण्यव्याप्यत्वेनेति साधारण्यम-
तोनवत्तमाण रूपणा संगतिः व्यापकाभावव्याप्यत्वादेरित्यादिना व्यापकवदवृत्तित्वपरिग्रहः स्वरूपेणैव ज्ञान-
योरपीत्यर्थः साध्याभावः साध्यसमानाधिकरण इत्यनाहार्यज्ञानात्त्यनसाधर्मितावच्छेदकतासंबंधेन तत्सामा-
नाधिकरण्यप्रकारकानाहार्यबुद्धौ तदभावत्वादिपर्याप्तविषयतासंबंधेन ज्ञानत्वेन प्रतिबंधकत्वादिति
६

भावः। यथाकथंचिद्विरोधरूपाणामेवायं विभाग इत्याशंकते तथात्वेपीति स्वरूपतो विरुद्धत्वेपीत्यर्थः। तत्त्वं विरु
द्धत्वं अविरुद्धे अस्तत्वेन असामानाधिकरण्यस्येति असत्त्वरूपतस्य सामानाधिकरण्यस्येति धीविरोधित्वादिति भावः
समानाधिकरणेति असमस्यः साध्याव त्वादिव्याप्तौ सत्त्वात्वादीनामित्यर्थः। तेषामप्यसत्त्वाद्यसामानाधिकरण्यव्या
प्यत्वेन विरोधित्वादिति भावः। सच्चाप्रमित्यादिग्रंथेन सामानाधिकरण्यधीविरोधिरूपपरिगणनपरः। किंतु विरुद्ध
हेतुप्रभेदपरिगणनपर एव। एवंच साध्यासामानाधिकरण्यरूपवत्तां धर्मिणो साध्याभावव्याप्यत्वादिनैवोपग्रहा
न्नाधिक्यमिति शंकां निरस्यति नचैतानीति सर्वेषां साध्यव्यापकाभावादीनां साध्याभावव्याप्यत्वेनेति तेषां च तेषां
न एष ग्रपाहानान्नुपपत्तिरिति भावः। इदमुपलक्षणं एतज्ज्ञानेयीत्यादिस्थलविरोधोपि द्रष्टव्यः। विभागं संगमयतां के
षांचिन्मतमाह। विरोधोन्नामके निप्रवंच साध्याभावव्याप्यत्वादिनाज्ञातस्य यदूषकत्वमभिहितं तत्र यपि विरोधज्ञा
नद्वारा न तु साक्षादिति न विरोध इति ध्येयं विरोधाप्रमायकहेतूनामानंत्याज्जैविध्यानुपपत्तिस्तदवस्थैवेत्यस्वरसःसू
चनाय एवहतीति स्थले सर्वेषामपि विशेषणद्वारापीति उक्तानि विवक्षयप्रकारेण विरुद्ध विशेषणनिर्बंधनो पीत्यर्थः। अत्र वि
विशेषणनिर्बंधवत्त्वस्याविरोधरूपविशेषणेन संक्रमो बोध्यः। क्रमस्तगर्वितिअत्र विशेष्यधूमत्वावच्छिन्नस्य साध्यस
मानाधिकरणत्वात् कडत्वादिविशिष्टस्यैव विरुद्धत्वादिभावः। अत्र प्रत्येकविशेषणावच्छिन्नस्यैव विरुद्धता बोध्या
वाधस्वरूपसिद्धान्त्यतरसंकरस्यावश्यकतया ज्ञाविताताभिधानेन संगच्छत इत्याशंक्यतदुभयानुगमकेनतद्द्वया
वच्छिन्नसंकरस्य कदाचित्कात्वे विवक्षितमित्याह दोषितो वाधेत्यादिना न तु गवि तेधस्यात्वे दोषांतरस्यावश्यकत्वे किम
स्य दोषताभ्युपगमेनोत्पत्त आह ज्ञाना संकराद्वेति दोषांतरज्ञानस्यापायो विरोधज्ञानेनामप्यत्तमिति प्रतिबंधादस्य
दोषांतरत्वभावश्यकमिति भावः। विरुद्धग्रंथः। संमानबलेत्यादिमूलंस्य प्रकृतसाध्यानुमापकबलशालित्वेसतिप्र

गदा० कृतेन साध्याभावानुमापकबलप्राप्तिहेतुत्वेन रकत्वमित्यर्थः अत्रानुमापकत्वमनुमितिफलोपहितत्वमनुमितियो
ग्यत्वं वा अग्रिमग्रन्थे तद्ग्रहणमाह परस्परेति उभयोरबोधकत्वादित्यस्य सत्प्रतिपक्षतादशायामित्यादिर्द्वितीयपक्षे यतद्बो
धानयकाले तद्बलपदार्थे चित्तर्क्य दूषयति बलं चेति बलपदार्थश्चेत्यर्थः सपक्षसत्त्वादीति आदिना विपक्षसत्त्वविप
क्षासत्त्वयोः परिग्रहः व्यतिरेकिणीति अभावात् सपक्षाप्रसिद्ध्या तत्सत्त्वासंभवात् एतद्रूपलक्षणं सर्वत्रैव सत्प्र
तिपक्षेपकहेतौ सपक्षसत्त्वविपक्षासत्त्वयोरेकतराभावोपि दृष्टव्यः समानेति संख्यातायातं बलपदार्थस्य समा
नत्वाचरितत्वात् विरोधेनेति विरुद्धसाध्यतदभावव्याप्ययोरेकतरपक्षसत्त्वनियमेनेत्यर्थः तद्रूपेति व्याप्तिपक्षधर्म
तयोरेकतरप्रभावे इत्यर्थः व्याप्तिपक्षधर्मतया व्याप्तिसहितपक्षधर्मतया ज्ञानत्वं ज्ञायमानत्वं व्याप्तिविशिष्टत्ववैशि
ष्ट्यज्ञानविषयपक्षकत्वमिति समुदितार्थः तेन नित्यत्वव्याप्तश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्या सन्निमतद्बलसंगतिः
नित्यत्वव्याप्येति शब्दो नित्यः कृतकत्वादित्यादौ श्रावणत्वादिरूपप्रतिहेतौ वर्तमानस्य अनित्यकव्याप्यवत्त्वज्ञान
स्यादोषाः प्रसिद्ध्यासंभवेन समानबलत्वासंभवादित्यर्थः यत्राव्याप्यः प्रतिहेतुः तत्र पक्षधर्मे श्रावणत्वे अन्यत्र
प्रसिद्ध्याया व्याप्तेरारोप एव बलं यत्रापक्षधर्मः प्रतिहेतुः तत्र साध्यव्याप्ये पक्षधर्मत्वारोप एव बलमिति ऐकायो
विशिष्टाप्रसिद्ध्या व्याप्तिविशिष्टपक्षधर्मत्वारोपासंभवाभिधानमसंगतमित्यत आशयं स्फुटयति दीधितौ व्याप्य १
त्वादिना व्याप्ते व्याप्तिविशिष्टे पक्षधर्मे पक्षधर्मताविशिष्टे प्रत्येकं व्याप्तिविशिष्टत्वविषयकपक्षधर्मताज्ञानत्वादि
ना अव्यापकः सकलमतप्रतिपक्षासंग्राहकः अव्याप्यादिहेतौ व्याप्त्यादिविशिष्टत्वाप्रसिद्धेरिति भावः वैशिष्ट्या
रोपो व्याप्तिविशिष्टपक्षधर्मतायाः स्वस्मिन् ग्रहः वाच्यः बलपदेन विवक्षणीयः एकधर्मिणि साध्यकमेकत्रेत्यादि
मूलग्राह्यविवरणं विशिष्टस्येति पादर्शसाध्ये पक्षे बाधितेन तदीयव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वस्याप्रसिद्ध्या न संभव

२

तीतितथाचनित्यत्वव्याप्तिविशिष्टश्रावणत्वाद्यप्रसिद्ध्या यथाव्याप्त्यादिविशिष्टतद्धेतुधर्मिकपक्षधर्मत्वादि
ग्रहोऽप्रसिद्धस्तथानित्यत्वादिव्याप्तिविशिष्टशब्दवृत्तित्वाद्यप्रसिद्ध्या श्रावणत्वादौ तद्ग्रहोऽप्यप्रसिद्ध इति श्रावण
त्वादेः समानबलत्वासंभवेन कृतकत्वादेः सत्प्रतिपक्षत्वानुपपत्तिरिति भावः व्याप्तिपक्षधर्मतोभयज्ञान
विषयताचावलत्वेनैव दोष इत्यतो दोषांतरस्वरूपमाह विरुद्धव्याप्तिवति आदिना साधारणपरिग्रहः साध्याभा
वच्छेदवृत्तित्वरूपव्याप्तेरन्यत्राप्रसिद्धत्वाद्व्याप्त्योरसंभवात् स्वव्यापकेत्यादिरप्रसिद्धेश्चेति तज्ज्ञानघटितसमान
बलत्वासंभव इति शेषः व्याप्तिप्रकारेण पक्षे स्वप्रकारकज्ञानविषयत्वलक्षणे सामान्यादेरपि स्वसमवायादिरूपहेतु
तावच्छेदकसंबंधेन हेतोरप्रसिद्धिर्न वृत्तिभावहतीति सः प्रसिद्धिर्नोक्ता व्याप्तिघटकानां स्वरूपाः प्रसिद्धत्वात्त्व
दर्शिनां परस्परोपश्लेषाभावग्राहिज्ञानस्य बलतयाविवक्षणेनैव हेत्वोद्धारसंभवेऽपि अन्वयव्यतिरेकव्याप्तिज्ञा
नयोरननुगमेनैकोपादानेऽन्यत्राव्याप्तिरुद्धैवेति भावः साध्यानुमिति साध्यवत्ताज्ञानविरोध्यनुमितिसमर्थ
त्वेनानुगमे तत्सिद्धांतलक्षणपर्यवसानं व्याप्तिभंगाभंगरूप इति मूले व्याप्तिपक्षधर्मताप्रतीतिविषयत्वतद्भ्र
मविषयत्वान्यतररूपैकपक्षतरविषयकव्याप्तिपक्षधर्मताज्ञानस्य भ्रमत्वनियमेऽपि तदनवधारणेनानिर्धारि
तविशेषत्वसंभवादेकत्रभंगानियमादिति दूषणान्यसंगतमित्यत आह तथा चेति तादृशभंगानियमेवेत्यर्थः तत्
दवधारणभंगावधारणं अनयोरेकतरं बाध्यविरुद्धार्थग्राहकत्वादिमनुमाने सत्प्रतिपक्षतादशायामस्तीत्य
र्थः यद्यप्यनयोरेकतरमित्यादेः एकत्रपक्षे साध्यतदभावव्याप्यवत्ताग्राहकहेतुद्वयज्ञानान्यतरत्वं भ्रमः पक्षधर्मियो
विरुद्धद्वयसाधकद्वयान्यतरत्वादित्यर्थानि साध्यः सद्धेतुपरामर्शेष्वन्यतरत्वरूपहेतुमत्त्वेन भ्रमत्वस्य चाभावेन व्य
भिचारात् न चैकपक्षकाहेतुप्रतिहेतुपरामर्शान्यतरत्वं पक्षीकृत्य सविरोधिसाधकद्वयवृत्तित्वेन भ्रमवृत्तित्वेन र

गदा.

65

गान्तमेव तादृशान्यतरत्वाश्रयैकत्र भ्रमत्वसत्त्वेनैव तत्र भ्रमवृत्तित्वसत्त्वान्न व्यभिचारप्रसक्तिरिति वाच्यं तथा
सत्यपि रजतादिविषयकसमूहालंबनरूपे यत्र परामर्शे तत्र घटाद्यंशे भ्रमत्वमादायापत्तौ तद्वारणाय तद्धेतो॰
स्तत्साध्यव्याप्तिपक्षधर्मतान्यतरभ्रमस्य निवेशनीयतया तद्धेतुद्वयांतर्गतस्य हेतोर्न तत्साध्यादिव्याप्यादिभ्रमा
प्रसिद्ध्या साध्यादिव्याप्यादिभ्रमाप्रसिद्ध्या साध्याप्रसिद्धेः तन्नद्धेतुद्वयान्यतरांशे न तत्साध्यव्याप्तिपक्षधर्मतान्यतर
भ्रमवृत्तित्वसाधने व विरुद्धार्थसाधकान्यहेतुकपरामर्शद्वयान्यतरत्वे व्यभिचारः सध्यप्रसिद्धिमात्रेणैव हेतुतदा॰
स्यतावच्छापितत्साध्यव्याप्यवच्छिन्नपक्षविषयतानिरूपितहेतुविषयताद्वयान्यतरत्वं पक्षीकृत्य भ्रमत्वा॰
नियतविषयतावृत्तित्वंप्रकारधर्मिकाविरुद्धानुमितिजनकतावच्छेदकविषयताद्वयवृत्तित्वेन साधनीयं भ्रमत्वव्या
नुगतं कथंचिद्विवेचनीयं उच्यते इत्यादिग्रंथस्य दोषनिर्वचनपरत्वं न संभवति साध्यविरोधग्रहस्यापनेत्यादिना
न स्य ग्राह्याभावावगाहितया अनुमितिप्रतिबंधकतया तस्य हेत्वाभासत्वासंभवादिति सत्प्रतिपक्षव्य
वहारविषयतानिर्वचनपरतया व्याख्यातव्यं कामी व्यवहारविषयवधारयति सत्प्रतिपक्षे चेति सत्यसतिवेति
समीचीनैः समीचीने सत्यर्थः तथा च सद्धेतावुक्तलक्षणस्य दूषणाविरोधे इति प्रसंगेन दूषणावहत्वाभावः प्र
पराहृष्यमाण इति कृत साध्यसिद्ध्यौपयिकस्वविषयकपरामर्शरूपानवच्छिन्न इत्यर्थः एतेन साध्यसिद्ध्यौप
यिकपरामर्शकालीनत्वरूपसमानबलवत्त्वनिवेशसार्थक्यं दर्शितं तेन सति गृहीताप्रामाण्यकेव परामर्शे
सत्प्रतिपक्षव्यवहारविरहादिसंधियग्रंथस्तत्सति सत्यस्य हेत्वाभासविधया प्रदर्शनेन अगृहीताप्रामाण्यकत्वा
श्रमात्र व्याहृतिप्रदर्शनपरम् इति नयोनकाइ विघमान विरोधिपरामर्श इति विरोध्यनुमितियोग्यपरामर्शरूपान॰
वच्छिन्न इत्यर्थः एतेन वक्ष्यमाणस्थितिप्रतिबद्धकार्यकतावाप्तानिवेशनप्रयोजनं दर्शितं अत एवेति प्रकृतप॰

रामर्शस्य विरोधिपरामर्शस्य चासत्त्वदशायां सत्प्रतिपक्षव्यवहारविरहादेवेत्यर्थः अतीतानामन्यप्रति
हेतुपरामर्शदशायामपि सत्प्रतिपक्षपदस्य हेतुपरतापक्षेऽपि विजयपरामर्शपरतामाह विरोधिपरामर्शो वे-
ति परामृश्यमानस्येति यद्यप्यन्यपदार्थे परामृश्यमानत्वेन प्राहतो लभ्यते तथापि प्रतिपक्षपदस्यैव फलितान्य
स्वकार्यप्रतिरोधकपरतया परामृश्यमानस्य स्वकार्यानुमितिविरोधिपरामर्शपरत्वात् फलितार्थविवरणमि
दं तदनुसारेण तादृशव्यवहारानुसारेण बाधाश्रयासिद्धिनिर्णयवारणोपेक्षितं तद्दशायामनित्यासिद्धिवारणाये
त्यर्थः तयोरपि साक्षादनुमितिप्रतिरोधकत्वादिति भावः न चाश्रयासिद्ध्यादिनिर्णयस्यानुमितिप्रतिबंधकत्वे-
पि तस्य परामर्शनाशित्वमेव विरोधास्य समर्थकालेनसमवधानं दुर्घटमिति वाच्यं लौकिकसंनिकर्षादेव तस्य संभ-
वात् आश्रयासिद्धिपदं साध्याप्रसिद्धेरप्युपलक्षणं केवलं केवलपदे नैव तद्वारणात् समर्थितनैवेयर्थ्यमित्याशं-
कां निष्टंकयेति न चासावित्यादिना आश्रयबाधादिनिर्णयः व्याप्तीति धूमो वह्निव्याप्तिविशिष्टपर्वतताद्यवृत्तिता
वन्नादृशाभाववान् धूमो गुणवान् द्रव्यत्वादित्यादौ धूमादौ वह्न्यादिव्याप्तिविशिष्टपक्षधर्मतानिश्चयरूपपरा-
धाश्रयासिद्धिनिर्णयस्य व्याप्तिपक्षधर्मतात्मकावलोपस्थितित्वसमत्वादित्यर्थः नन्ववच्छेदपदं प्रकृतसाध्याभावव्या-
प्तिविशिष्टधूमवृत्तितायां पक्षवृत्तित्वादित्यत आह पक्ष इति इतीत्यस्य प्रतिरोधकज्ञानविषयस्येति शेषः पक्षस्य
व्याप्तेश्चाभिन्नत्वादित्यन्वयः प्रथमे प्रकृतपक्षस्य द्वितीये प्रकृतसाध्यस्य पक्षे भेदः व्याप्ते भेदकाद्वयमाह व्या-
पकेत्यादि व्यापकभेदेनेति व्यापकयोः साध्याभावपक्षवृत्तित्वाभावयोर्भेदेनेत्यर्थः अन्वयव्यतिरेकभेदेनेति-
पकसाध्यात्मकव्याप्तेरन्वयव्यतिरेकरूपनिरूपकभेदेनेत्यर्थः अविवक्षितत्वात् विवक्षितत्वमशक्यत्वात् न-
न्वनुगतरूपेण दर्शितसकलव्याप्तिपक्षधर्मतानिवेशेनायं दोष इत्यत आह साध्येति विरोधेषु हेनेनेति तादृशानुमि

गदा.

66

तिजनकज्ञानत्वेन प्रतिबंधकज्ञानस्यैव निवेशात् तद्विषयविषयकत्वेन पुनस्तन्निवेशोऽनुचित इत्यर्थः तथा च
विरोध्युपस्थापनसमर्थत्वेनैवोपस्थितिनिवेशो कार्य इति भावः उपस्थितेर्विरोधित्वं प्रतिबंधकत्वं तेन न सामा॰
न्मते लोकस्येवाभेदान्वयः प्रयत्नेनोपपाद्यः एतद्रूपरसेन साध्यपदस्य लक्ष्यार्थपरत्वानुरोधेन च कल्पान्तरमा
ह साध्यविरोधीति तद्ग्रहप्रतिबंधकज्ञानविषयत्वस्यैव विषयविशेषणत्वात् साध्यवत्ताज्ञानप्रतिबंधकज्ञानप्र
तिबंधकज्ञानविषय इति विवरणसंगतिः साध्याभाववत्त्वादिरित्यादिना एतादृशसाध्यादिपरिचयः एतच्च यावि
तकथनं तदुपस्थितेरिति त्वारूपापत्तादेः कर्मतया उपस्थितिनिर्वाहाय यामत्वयोग्यतापरमेवेति भावः अग्रे वपद्धे सा॰
ध्यवत्ति साध्याभाववत्त्वादेरप्रसिद्ध्या प्रतिरुद्धहेतावव्याप्तिरिति चेत् तद्रूपावच्छिन्ने धर्मिणि तद्रूपावच्छिन्नवत्ता
ज्ञानं प्रतिसाध्यतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नवत्ताज्ञानप्रतिबंधकं तद्रूपावच्छिन्नसाध्यकानुमितिः
जनकयोग्योपस्थितिप्रतिरुद्धकार्यकत्वविवक्षणात् केचित्तु यत्र बाधादिदोषः तत्रैव सत्प्रतिपक्षदोषः प्रतिहेतुप
रामर्शसंवलनदशायां तत्रैव हेतौ सत्प्रतिपक्षव्यवहारो यथा इत्याशयेनैव एतत्कतया उपनगरं तथा च साध्यव॰
त्वसत्त्वकहेतौ तदनुपानं तत्राव्याप्तिरित्यत आह वस्तुतस्तु साध्यवत्ताज्ञानप्रतिबंधकज्ञानत्वेनैवोपस्थितिर्ल॰ ११
क्षणे निवेश्या नादृशज्ञानविषयविषयकत्वेन तन्निवेशस्य विशेषणेनैवोपायेन हेयत्वात् साध्यादिपदकस्मा ४६
ध्यतावच्छेदकाद्यभावव्याप्यवत्तापरामर्शगारणायविशिष्टसाध्यादिग्रहाविरोधित्वेनाप्युपस्थितिर्विशेष्या जनन
योग्यपेतिजनं एवार्थः योग्यत्वं च समर्थपदार्थः बले समानत्वेन विशेषणं तस्याविवक्षितत्वादपि तदुपस्थितावेवे
ति स्फुटीकर्तुं समानयेसमासलिखनेन तथाविधव्याप्यादिबुद्ध्या साध्याभावव्याप्यादिबुद्ध्या एतद्दपि वस्तुतः
ष्टं तेन तथा प्रतिरुद्धत्वं च तत्प्रकारज्ञानत्वात् प्रतियोगित्वं वह्निव्याप्याभावादि साध्यकस्थले व्याप्तिरनन्यता विषय

8

यकानुमितिजननयोग्ययथावद्व्याप्त्यादिव्याप्यवत्त्वोपस्थित्याबाधनिश्चयद्रूपया कार्यप्रतिरोधदशायामनुमित्या
सिवारणाय साध्यवत्ताज्ञानप्रतिबंधकत्वे प्रथमोपस्थितिविशेषणं वह्निव्याप्यवत्त्वोपस्थितेरपि साध्यव
त्ताज्ञानप्रतिबंधकत्वाद्वह्निव्याप्यादिमत्त्वविषयकसमूहालंबनरूपवह्न्यादिमत्त्वविषयकानुमितिं
प्रति स्वरूपयोग्यतापायपाञ्चलेऽज्ञानितामेवेर्वारणाय साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकविषयता
वच्छिन्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयत्वपर्यंतं समर्थोनेन विवक्षणीयं न च साध्यवत्ताज्ञा
नप्रतिबंधकतावच्छेदिका साध्याभावादिप्रकारतानविधेयतैव च प्रतिबंधकतावच्छेदिका साध्याभावादि
प्रकारतानविधेयतैव च प्रतिहेतुपरामर्शजन्यतावच्छेदकोनिन्नजन्यतायां न प्रतिबंधकतावच्छेदकविषय
तावच्छिन्नत्वमित्युक्तविवक्षणासंभव इति वाच्यं, प्रकारताविशेषस्यैव विधेयतारूपत्वात् । अन्यथा तद
पृ०१ दवच्छिन्नविशेष्यकयदवच्छिन्नप्रकारकत्वं प्रतिबंधकतावच्छेदकं तदवच्छिन्नपक्षकतदवच्छिन्नविधेय
कत्वावच्छिन्नेनिरूपितकारणत्वमेव च निवेश्यं । न च तादृशोपस्थितिकालीनज्ञानविषयत्वमेव सम्यक्
कितन्यानि रुद्धकार्यकज्ञानविषयत्वपर्यंतनिवेशेनन्याकाङ्क्षायामाह विरोधीत्यादिना प्रामाण्यग्रहविशि
ष्टायाव्याप्त्याद्युपस्थितेर्न विरोधानुमितिनियोग्यत्वं तद्ग्रहविशिष्टत्वेनैव परामर्शस्यानुमितियोग्यत्वा
दीति न ईदृशोपस्थितिमादायातिव्याप्तिप्रसक्तिरित्याशङ्कां निराकरोति विरोधीत्यादि विषयत्वलक्ष
णयोग्यताशालिन्या इति जनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यता नात्र विवक्षिता
किंतु जनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यता नात्र विवक्षिता किंतु जनकतावच्छेदकको
टिप्रविष्टविषयतारूपैवेति भावः अथवा अप्रामाण्यग्रहाभावानामनुमितिजनकतावच्छेदकोपित्वस्या

तेनैव जनकमेवेत्यभिप्रायेणेतत् कार्यप्रतिरोधाऽनुधावनमिति तथा चाप्रामाण्यग्रहाभावविशिष्टविरोधिपरामर्शस्यैवानुमितिप्रतिबंधकतया गृहीताप्रामाण्यविरोधिपरामर्शस्य कार्याप्रतिरोधकत्वात्तत्रोक्तस्यलेऽतिप्रसंगः यथाप्रामाण्याघ्रातानास्कंदितविरोधिपरामर्शस्य गृहीताप्रामाण्यकबाधादिबुद्धिरूपत्वे तत्प्रतिरुद्धकार्यकत्वमपि दुर्वारमिति यथाश्रुतेऽतिव्याप्तिवत्त्वेऽपि तथापि विरोध्यनुमितिजनकतावच्छेदकरूपस्य कार्यप्रतिरोधप्रयोजकतावच्छेदकत्वविवक्षणेनातिव्याप्तिर्वारणीया न च यत्र विरोधिपरामर्शानंतरक्षणे तद्विषयकाप्रामाण्यग्रहो जायते तत्र पूर्वक्षणेऽप्रामाण्यग्रहाभावविशिष्टतज्ज्ञानरूपप्रतिबंधकसत्त्वेन तत्क्षणे कार्योत्पत्त्यादृतत्क्षणे सत्प्रतिपक्षत्वं दुर्वारमेवेति वाच्यं यत्कालीनो यस्य स्थित्याग्रिमक्षणे यस्य कार्यानुत्पादः स तदा सत्प्रतिपक्ष इति विवक्षयाऽतिप्रसंगवारणात् उपाध्यापरीत्या समानपदं सार्थकयितुं तदर्थमाह समानत्वं चेति १ अगृहीताप्रामाण्यकेति स्वविषयकाप्रामाण्यग्रहाभावविशिष्टेत्यर्थः अथागृहीताप्रामाण्यकत्वशरीरेऽन्वयव्याप्तिशे व्यतिरेकव्याप्त्योरेव परं प्रामाण्यं तद्ग्रहाभावविशिष्टत्वं निवेश्यं तत्र व्याप्यांशेऽप्रामाण्यग्रहसत्त्वेन तद्व्याप्यवत्ताबुद्धिपरामर्शस्य सत्प्रतिपक्षत्वाप्रयोजकत्वात् तथा चान्वयव्यतिरेकव्याप्त्योरेकतरविषयकपरामर्शदशायामन्यतरव्याप्त्यंशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षताविरहः स्यात् न च स्वयोग्यकानुमितिविरोधिग्रहत्वेनाप्रामाण्यग्रहद्वयमनुगमय्य तदभावविशिष्टत्वं निवेशनीयं विरोधित्वे निवेशनीयं विरोधित्वं च समानविशेष्यकत्वानवच्छिन्नं ग्राह्यं तेन न विरोधिपरामर्शादिव्यावृत्तिरिति वाच्यं एवं सति तादृशव्याप्तिद्वयविषयकसमूहालंबनपरामर्शे एकतरांशेऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षत्वानुपपत्तेरिति चेत् त्वदीयमते किंचिद्विषयताप्रयोज्यानुमितिप्रतिबंधकज्ञानसामान्याभावस्य निवेशनीयत्वात् विरोधित्वं च विरोधिपरामर्शादिव्यावृत्तत्वया

शंसमूहालंबनपरामर्शस्थले याहृशाव्याप्यंशेः प्रामाण्यज्ञानं नास्ति तादृशाव्याप्तिविषयताप्रयोज्यानुमि
तिविरोधित्वात् न सामान्याभावस्य सत्वान्न तत्र सत्प्रतिपक्षत्वानुपपत्तिः स्वविषयकपरामर्शे प्रसक्तिश्च विषमाः
नेपरामर्शे स्वस्य सत्प्रतिपक्षत्वव्यवहारविरहात् न चासत्तिगृहीताप्रामाण्यकेवाप्रकृतसाध्यानुमापकपरा
मर्शः प्रामाण्यज्ञानाभावसहकृतपरामर्शरूपकारणविरहादेवानुमितिविरहो न विरोधिपरामर्शप्रयुक्त इति स
मानत्वान्निवेशो यितातिप्रसंगावकाश इति वाच्यं। तत्रोभयोरेव कारणाभाववत्याविनिगमनाविरहेण कार
णाभावप्रयोजकतायाः दुर्वारत्वात् विरोधिपरामर्शमात्रयज्ञात्वस्य प्रयोजनविरहेण निवेशात् यत्र प्रतिरोधि
परामर्शे बाधनिश्चयस्तत्र वर्त्तते तत्रापि सत्प्रतिपक्षितत्वस्येष्टत्वात् मिश्रैस्तु समानपदव्याहृतिं दूषयित्वा प्रत्य
त्यस्यातिपत्तिनिप्रामाण्यनिर्णायेन स्वविषयप्रामाण्यनिश्चयेन पक्षे बाधकताप्रयोजकाधिकबलतायां।
हेतुः बाधकस्य विरोध्यनुमित्यप्रयोजकस्य निश्चितप्रामाण्यकपरामर्शजन्यानुमितौ व निश्चितप्रामाण्यकवि
रोधिपरामर्शो न प्रतिबंधकः इत्यभिमानः समानेतीति समानत्वं च विरोधिबोधानुपधायकत्वे विरोधिबोधा
व्यवहितप्राक्क्षणविशिष्टत्वाभाव इति यावत् तत्प्रतिरुद्धकार्यकत्वं वदभावातिरिक्तसकलप्रकृतसाध्य
कानुमितिकारणसमवधानकालावच्छिन्नतत्प्रयुक्तकार्यानुपधायकत्वं सकलकारणनिवेशात् उभयपरा
मर्शसत्वे बाधेन हीनबलस्य हेतोर्न सत्प्रतिपक्षत्वं कार्यप्रतिरोधनिवेशात् स्वपरामर्शे प्रामाण्यनिश्चयेनाधि
कबले हेतौ व्याप्तिविचारणीयैवेति बोध्यं प्रतिहेतोः साध्यबाधेन हीनबलतायां प्रकृतहेतोः सत्प्रतिपक्षताका
रणायां विरोधिपरामर्शेपि प्रकृतहेतुपरामर्शाद्यातिरिक्तसकलकारणसमवहितत्वे निवेश्यं चलतो मिश्रम
तेनुमितौ न विरोधिपरामर्शमात्रस्य विरोधित्वं किंतु विरोध्यनुमितिसामग्र्या एव न तथा चेतरकारणसमवहित

गदा॰ त्वंनिवेशयन्नुक्तौ मिश्रमते अनुमितौ न विरोधिपरामर्शमात्रस्य विरोधित्वं किंतु विरोध्यनुमितिसामग्र्या एवेत्या॰
चेत्तरकारणसमवहितस्य परामर्शस्य कार्यप्रतिरोधकतया विरोधिपरामर्शेनेतरकारणसमवहितत्वं विशेषणं
68 देयं। उभयपरामर्शे प्रामाण्याग्रहमते एकत्र प्रामाण्यनिश्चयेपि तस्यानुमितिजनकत्वासिद्ध्या विरोधिपरामर्श
स्य सामग्रीविधया स्वातन्त्र्येण वा विरोधितायां न प्रतिबध्यानुमितिजनकपरामर्शीयप्रामाण्यग्रहस्योत्तेजकत्व
मित्याशयेनाह व्यभिचारेणेति उक्तस्थले विरोध्यनुमित्युत्पत्तौ तत्र प्रकृतसाध्यानुमापकपरामर्शाभावरूपक
व्यत्वव्यभिचारप्रसंगेनेत्यर्थः अबलत्वात् प्रकृतपरामर्शे प्रामाण्यग्रहन्यूनत्वेनोक्तस्थलेऽनुमित्यनुपधायक॰
त्वात् तथा च सत्प्रतिपक्षत्वमिष्टमेव अथ चाव्यभिचारेण तज्जनकज्ञाने प्रामाण्यनिश्चयं विनाप्यनुमितिहेतु
त्वाजनकत्वान्न प्रामाण्यग्रहस्याबलत्वात् अनुमितिसामग्र्यघटकत्वात् तथा च यत्र प्रकृतपरामर्शे न प्रामाण्य
ग्रहः किंतु विरोधिपरामर्श एव तत्रापि प्रकृतपरामर्शे प्रामाण्यग्रहासत्त्वे कोटिद्वयानुमितिसामग्र्या अन्यूनत्वात्
परस्परविरोधेनैकस्याप्यनुमितिरिति सत्प्रतिपक्षत्वमिष्टमेवेति भावः ननु एकत्र प्रामाण्यग्रहणायामेव को
ऽनुमितेरनुभविकतया तस्याबलत्वमावश्यकमित्यत आह अन्यत्रेति परामर्शान्तर इत्यर्थः तदुपधेयत्वे प्रामाण्य ६३
ग्रहस्यानुमित्युपधायकत्वात् बलस्याविवक्षितार्थकत्वेपि समानपदस्य निरूढार्थेन तात्पर्यग्राहकतया बलपा
दानं सार्थकयति बलपदेति लिंगपदोपादाने वैयर्थ्यशंकां परिहरति लिंगपदेति स्वीयलिंगत्वौपयिके निरुक्तनिष्ठ
प्रकृतसाध्यानुमापकतावच्छेदकविषयताविशेषानुपगमकतानिर्वाहकेत्यर्थः आत्मादेरिति अन्यथा तस्यापि ६
धूमलिंगमित्यात्मकार्यकत्वसत्त्वेन धूमादेरिव सत्प्रतिपक्षितत्वापत्तिरिति भावः न च प्रतिरुद्धकार्यत्वं प्रति
रुद्धकार्यकपरामर्शविषयत्वं नात्मादेरिति नातिप्रसंगाशंकेति वाच्यं आत्मादेरपि प्रतिरुद्धकार्यकसमूहालंबना

दिरूपपक्षमादिपरामर्शविषयत्वसंभवात् प्रतिरुद्धकार्यकत्वमित्यनेन प्रतिरुद्धकार्यकपरामर्शविषयत्वमः
वश्यमेव विवक्षणीयं अनुमितेर्हेतुकार्यत्वाभावात् यथा च तादृशविषयताया प्रकृतानुमितिजनकतावच्छे
दकत्वनिवेशनेनैवोपपत्तेः विरोधिपरामर्शे स्वनिष्ठप्रकृतानुमितिजनकतावच्छेदकविषयताकपरामर्शका
लीनत्वनिवेशनमनुचितमित्याशयेन तथैव निष्कृष्टार्थमाह विरोधिपरामर्शेति प्रकृतानुमितिविरोध्यनुमि
तियोगिपरामर्शप्रयोजकाग्निग्रहणावच्छिन्नानुमित्याद्यप्रतियोगिप्रकृतानुमितिजनकतावच्छेदकीभूतपरामर्शी
यविषयताविशेषविशिष्टत्वमित्यर्थः अगृहीताप्रामाण्यकपरामर्शत्वेनानुमितिजनकतामते जनकता
वच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यतानगृहीताप्रामाण्यकपरामर्शत्वेति कार्यप्रतिरोधनिवेशमन्तरेणै
वोपपत्त्या तं परित्यजति अगृहीताप्रामाण्यकेति बाधोपस्थितिसमर्थेति साध्यवत्ताज्ञानप्रतिबन्धकत्वे सति तत्प्र
तिबध्यायानुमितित्वयोग्येत्यर्थः साध्यवत्ताधीप्रतिबध्यत्वनिवेशात् साध्याभावव्याप्यानुमितिसमर्थपराम
र्शकालेनातिप्रसंगः तत्कालीनत्वं च एककालावच्छिन्नैकात्मवृत्तित्वसंबन्धेन तद्विशिष्टत्वं तेन व्यभिकरण
परामर्शमादाय नातिप्रसंगः यदि वायमिति अनुमितिः प्रामाण्यकीत्यत्र न वक्तव्यं तिपक्षत्वमित्यत्र च यदि वेत्यस्य
संबंधः तदभाववद्व्याप्यवत्तानिश्चयानन्तरमिव तादृशनिश्चयक्षणेपि नानुमितिर्जायते तादृशनिश्चयस्य बाधनि
श्चयवत् स्वोत्पत्तिविरोधित्वात् तत्रानुमितेः प्रामाण्यकत्वे तादृशानुमितिस्तत्याद्यक्षणे सत्प्रतिपक्षता यामपि न क्षतिः
नदग्निमत्त्वेणो विरोधिपरामर्शवशाद् द्वाभ्यामनुमितिप्रतिरोधादित्युभयत्रापि विवादप्रदर्शनार्थं तदभिधाने कार्यप्र
तिरोधोः वश्यमुपादेय इति ख्यातं ज्ञेयं प्रकृतसाध्यसिद्ध्यौपयिकपरामर्शस्वजन्यकार्याभावविशिष्टत्वरूपं प्रतिरु
द्धकार्यत्वं अगृहीताप्रामाण्यकत्वे नुमितिहेतुतामतेपि निष्टमित्यर्थः अज्ञानितविरोधिबोधत्वेन स्वजन्यविरो

गदा॰ ध्यनुमित्यभावविशिष्टत्वेनेत्यर्थः विशिष्टाधीयइतितेन तत्रैवविरोधिवह्निसाधकत्वेऽपिन व्याप्यसाभावासाधकहेतोर्न सत्प्र
सत्प्रतिपक्षः तिपक्षितत्वमितिशेषः अतएवउक्तस्थलेव्याप्यभावसाधकहेतोः सत्प्रतिपक्षत्ववारणाय विरोधोद्देश्वविरोधिबोधका
न्येतीतिनिरुक्तार्थकमितिशेषः यथाश्रुतशब्दहेतोगमकतोपयिकरूपेविरोधकान्यत्वंलभतेनतु ज्ञायमानपदोपस्थाप्य
69 ज्ञानेतथाविवक्षणेचतादृशव्याप्यासिद्धितया ज्ञानेन प्रकृतसाधकपरामर्शशून्यस्य पुरुषान्तरस्यविरोध्यनुमितिर्जनिका
प्रकृतसाधकपरामर्शसमवहिततादृशव्याप्यादिविषयकज्ञानान्तरस्यापिसत्प्रतिपक्षितत्वप्रयोजकतानुपपत्तिरतः
फलतोज्ञानविशेषणमितिउक्तानुमितेरप्रामाणिकत्वेपि तद्धानीसत्प्रतिपक्षतोपगमेपिवाग्रिमनिमलक्षणेविरोधिबो
धकान्यत्वस्यनोक्तव्याप्तिसंगतिरतस्तन्मतेव्याप्तत्वंतत्समाहृपकस्येतितद्वारणाय अनुमितिप्रधायकपरामर्शस्यसत्प्र
तिपक्षितत्वप्रयोजकतावारणायतत् विरोधिबोधकान्यत्वंत्वजन्यविरोधिबोधाव्यवहितप्राक्क्षणविशिष्टपरत्व
न्याचार्थकंस्वनिष्ठतादृशक्षणावैशिष्ट्यशून्यत्वार्थकंवानत्वेवमपियत्रप्रतिहेतुपरामर्शएवविद्यतेनतुप्रकृतहेतु
परामर्शः अन्यतएवकृतस्थितप्रतिबन्धात्तत्रद्वाग्निमलक्षणेविरोध्यनुमितिसत्त्वाद्वाग्निमलक्षणेऽतिप्रसंगोदुर्वारएवेवे
त्यतआह । प्रतिरुद्धेति । तथाचतत्रप्रकृतहेतौतद्विशेषणीभूतपरामर्शाविषयत्वाभावान्नातिप्रसंगइतिभावः
नचैवमपियत्रप्रकृतहेतुपरामर्शोगृहीताप्रामाण्यकः प्रतिहेतुपरामर्शश्चागृहीताप्रामाण्यकोविद्यते प्रतिबन्धकोन्तर ७०
वशाच्चाग्निमलक्षणेविरोध्यनुमित्यनुत्पादस्तत्रातिप्रसंगोदुर्वारएवप्रकृतहेतुपरामर्शविशेग्रहीताप्रामाण्यकत्वस्यतन्निय
तसाध्यसिद्धिगोचरतायावानिवेशेप्रतिहेतुपरामर्शेविरोधिबोधकान्यत्वस्यैवैयर्थ्यमितिवाच्यं एतन्निवेशत्वाभावेवविरो
धिबोधकान्येत्यस्योपादानात् वस्तुतस्तुविरोधिबोधकान्यत्वंप्रकृतहेतुपरामर्शप्रतिरुद्धकार्यकत्वरूपं प्रतिहेतुप
रामर्शविशेषणंगृहीताप्रामाण्यकप्रकृतहेतुपरामर्शाच्चनप्रतिहेतुपरामर्शकार्यप्रतिरोधइतितादृशपरामर्शस्या

यं नातिप्रसंगः मूले एकदेशस्योत्पन्नयोरिति शेषः अविरलक्रमेणोत्पन्नयोरित्यर्थः कं निरंतरयोर्वेति मूलमारि
पति न चेत्यादिना साधकमानेन साध्यनिश्चयः विरोधिपरामर्शानंतरमपि यदि साधकमानादेव शेनानुमितिर्न
जायते एतदा तदानुरोधेन सत्प्रतिपक्षस्य दोषतानापातेरित्यर्थः ज्ञानमिति ज्ञानैकमित्यर्थः मूले ज्ञानयोः ज्ञान
योः प्रतिपक्षत्वापरस्परकार्यप्रतिरोधकत्वात् युगपदिति यौगपद्यमेककालवृत्तित्वं न तत्र यत्किंचिदिति द्वितीय
पक्षासंग्रहकत्वात् परामर्शद्वयसंवलनस्य स्वपरसाधारणत्वेपि परास्थले व्याप्तिपक्षधर्मता भंगानुपेक्ष्य सत्प्र
तिपक्षोद्भावने अप्रतिविद्धत्वेन प्रकृतहेतोर्व्याप्तिपक्षधर्मतयोः प्रतिपादनमतत्त्वग्रहेण प्रमितत्वग्रहान्न द्वयोस्तु
ल्यबलत्वमित्याक्षेपानुद्धारेः तोभावं सूचयति तावतेति तावद्यं भाव इति आधिक्यप्रसंगादिति हेतुद्वयप्रयोगे द्वयो
र्द्वयोरुद्भावनेपि आधिक्यादिभावः यथाकाममित्यनेन उद्भावने विनिगमकानाविरहाशंका निराकृता व्याप्त्याद्युप
गमः व्याप्त्यादेः प्रतिपादनमतत्त्वासिद्धिः अप्रतिसिद्धत्वस्याभावानुद्भावनरूपस्यात्यथासिद्धतया अनुमत्यनादेः
एकत्वादिति भावः मूले स्वात्मवतेति साध्यतदभावयोरेकतरवत्वे परानपिकरणत्वनियमेनेत्यर्थः व्याप्तीति
एकत्र हेतोरन्यतरत्र स्वत्वस्साध्यातिरूपितव्याप्तिपक्षधर्मतयोरन्यतरभंगआपद्यते एकदेति सपक्षान्यतरतेनोभयत्राव
धारितेो विशिष्टसंदिग्धे दोषश्रान्तो किं प्रकारेण समस्य दोषतयेत्यर्थः साध्यतदभावव्याप्ययोरेकधर्मिणि सत्त्वमनुपप
न्नं धर्मिवृत्तेः एकतरव्याप्त्यभावं तत्र कल्पयति यदि व्याप्याभावं विनातन्नोपपद्यते तत्र तत्तदवधारयितुं शक्यते तदेव नोभ
यत्र व्याप्तिसत्त्वेपि साध्यतदभावौ यद्यविरुद्धौ स्यातां तदोभयत्रपक्षधर्मता निर्वहतीति प्रतिसंधानेन तद्विघटनादिसामा
न्यतेपि न व्याहत्यादि भंगावधारणमिति कथमज्ञायमानस्य दोषतेत्याशंकाते न च तयोरिति साध्यतदभावयोरविरोध
ग्रहदशायामनुमित्यप्रतिरोधान्न सत्प्रतिपक्षतानुपपत्तिः विरोधावधारणदशायामेव तथा चोक्तान्यथासिद्धिसंभवनाविर

गदा०

सत्प्र दि.
८
70

रुद्धादनुपपत्त्यवष्टंभेनैतदुक्तमित्याह अविरोध इति प्रतिरुद्धत्वस्य कार्यानुत्पादरूपादोषमया प्रतिरुद्धत्वस्य कार्यानुत्पा-
दस्य दोषतया प्रतिरुद्धत्वेन निश्चयसामग्रीदशायामिच्छावलम्बनेन ज्ञानानुत्पादस्याप्रामाणिकत्वाच्चेत्याशयः अत्राहुः सं-
शयनिश्चययोर्विरोधाभानाभानप्रकारैः लक्षणस्य दूषितत्वात् संशयत्वस्य विषयताविशेषरूपत्वमावश्यकं तादृशा- २
विषयताविशेषविभिन्नतत्तत्कोटिविषयताशालित्वं तत्तत्कोटिनिश्चयत्वं तथा च निश्चयत्वघटकविषयतायाः संशयसाधा-
रणत्वे तत्रापि निश्चिनोमीति प्रतीत्यापत्तिरिति तस्मात्तद्व्यावृत्तत्वमावश्यकं तन्निर्वाहश्च संशयसामग्र्यास्तादृशविषयि-
ताशालिज्ञानप्रतिबंधकतयैवेत्यज्ञानालाघवज्ञानघटितसामग्रीद्वयात्संशयस्वीकारेणामपि निश्चयत्वघटकानिरूप्य-
विषयितायास्तादृशसंशयव्यावृत्त्यर्थं लाघवज्ञानघटितविपरीतकोटिद्वयमिति समग्रास्तत्कोटिनिरूपिततादृशवि-
षयताशालिज्ञानप्रतिबंधकत्वमावश्यकं तथा च लाघवात्संशयत्वघटकविषयिताभेदमनिवेश्यैव तत्कोटिप्रका-
रित्वस्य तादृशसामग्रीप्रतिबध्यतावच्छेदकत्वोपगमात्प्रोक्तसामग्रीद्वयात्संशयानुमिति न च संशयत्वघटककोटिप्रका-
रिताकज्ञानत्वेन तत्कोटिनिश्चयत्वे अपि तादृशप्रकारिताशून्यतत्कोटिप्रकारकज्ञानत्वं तथा च संशयेन निश्चयवृत्ति-
विषयितास्वीकारेऽपि न क्षतिरिति वाच्यं एकधर्मावच्छिन्नतत्कोटिसंशयरूपस्यान्यधर्मावच्छिन्नांशे तत्कोटिनिश्चयस्य १०
स्यग्राह्यतत्तद्धर्मावच्छिन्नविशेषतानिरूपितविलक्षणविषयताशून्यत्वस्य तत्तद्धर्मावच्छिन्नविशेष्यकनिश्चयत्वश-
रीरे निवेशनीयतया धर्मितावच्छेदकनिष्ठप्रत्यासत्त्याकारणत्वप्रतिबंधकत्वमतीयच्चावयवस्यप्रलयप्रसंगात् अत्र याहेत्व-
भावे व्याप्यवृत्तित्वग्रहदशायां साध्याभावनिश्चयविशेषधर्मिणि ग्राह्यज्ञानोत्पत्त्या यथा तादृशाव्याप्यवृत्तित्वग्रहस्य त-
त्प्रतिबंधकतायामुत्तेजकत्वं तथा तद्धर्मिकाव्याप्यवृत्तित्वग्रहदशायां तद्व्याप्यवृत्तित्वग्रहदशावतां निश्चयस्यापि त-
द्विपरीतज्ञानाप्रतिबंधकतया तत्रापि तद्धर्मिकाव्याप्यवृत्तित्वग्रहस्योत्तेजकत्वमपेयं एवं च कपिसंयोगतदभावयोर्द-

ष्टिकाव्याप्यवृत्तित्वग्रहदशायांपक्षतावच्छेदकधर्मस्यैकोटिद्वयैकावच्छेदेनतदुभयकोटिद्वयावगाहमानायांप
तदभावः पक्षीकाव्याप्यवृत्तित्वग्रहदशायांपक्षतावच्छेदकान्तरेणावच्छेदेनतदुभयकोटिमत्त्वावगाहमानावसं
शयानुमितिर्ग्राह्याभावव्याप्यवत्ताज्ञानप्रतिबंधकतयानपाकृतेवायदितेनचाव्याप्यवृत्तित्वज्ञानस्यसंशयविरो
धितयाऽव्याप्यवृत्तित्वज्ञानकालेसंशयएवभवति नसंशयइतिवाच्यं यतोविरोधग्रहएवाव्याप्यवृत्तित्वग्रहस्य
विरोधितयाकोट्योर्विरोधावगाहिसंशयस्यएकदेशावच्छिन्नैककालावच्छेदेनवाकोटिद्वयमवगाहमानस्यसंश
यस्यतदानीमप्रत्यक्षोबाधकाभावः नहितादृशज्ञानेकोटिद्वयनिश्चयरूपसंभवति समानकालदेशावच्छेदेनतद
दभावनिश्चययोरव्याप्यवृत्तित्वग्रहकालीनयोरपिमिथोविरोधित्वात् अव्याप्यवृत्तित्वेपिभावाभावयोरेकावच्छेदेन
वृत्तेरसंभवात् अव्याप्यवृत्तितयातादृशानिश्चययोर्विषयविरोधापरिहारात् नचयदितादृशदेशावच्छेदेनतद
भावनिश्चयस्तदवच्छेदेनविशिष्टबुद्धिर्ग्राह्याभावधर्मिकाव्याप्यवृत्तित्वग्रहदशामपिप्रतिबध्नातितदातादृशाव्या
प्यवृत्तित्वग्रहदशायामेवावच्छेदेनग्राह्याभावव्याप्यवृत्तित्वग्रहदशायामेवावच्छेदकावच्छेदेनग्राह्याभावव्याप्यव
त्ताज्ञानमपितादृशानुमितिविरुद्धत्वात् तथावच्छेदकावच्छेदेनानुमितावनवच्छेदेनहेतुमत्तापरामर्शस्यैवहेतुतया
तादृशयोश्चपरामर्शस्यैवहेतुतायातादृशयोश्चपरामर्शयोरवच्छेदेनविपरीतसाध्यवत्ताज्ञानप्रतिबंधकतयानोक्त
संशयानुमितिसंभवइतिवाच्यं अवच्छेदकसामानाधिकरण्येनहेतुमत्ताज्ञानादपिदेशकालरूपपक्षतावच्छेदके
बाधाभावबलात् स्वरूपसंबंधरूपावच्छेदकत्वमवगाहमानायाअनुमितेर्मणिकारादिभिरुपगमात् वस्तुतोग्रा
ह्याभावस्याव्याप्यवृत्तित्वेपितदवच्छेदकावच्छेदेनग्राह्यवत्त्वासंभवाद्विषयविरोधेनावच्छेदेनविशिष्टबुद्धौतदवच्छे
देनग्राह्याभावज्ञानप्रतिबंधकतायामेवतद्धर्मिकाव्याप्यवृत्तित्वग्रहाभावोऽनपेक्षितः तादृशतद्व्याप्यवत्ताज्ञान

ग.दा. स्वताहशाविशिष्टबुद्धिंप्रत्यपिविरोधित्वेतत्ताहशाव्याप्यवृत्तित्वग्रहाभावोऽपेक्षित एव ग्राह्याभावस्याव्याप्यवृत्तित्वे-
स.व्या. ग्राह्यावच्छेदकावच्छेदेन ग्राह्याभाववतिवर्त्तमानस्यापि तज्ज्ञानस्याविषयविरोधविरहात् साध्यावच्छेदकावच्छेदेन
९ साध्यवतिवर्त्तमाने यद्देशकालावच्छेदेन तत्र साध्यमिति व्याप्तिर्न संभवतीति चेन्नालातिः नहि पक्षतावच्छेदकदेश-
कालावच्छेदेन तत्र साध्यमिति व्याप्तिरनुमितौ तदवच्छेदेन साध्यानुमितौ तदवच्छेदेन गृहीततादृशव्याप्तिकहेतुमत्तापर-
७१ रामर्श एव हेतुरित्यवच्छेदकावच्छेदेनानुमितिस्थलेऽसिद्धव्यभिचारासंकीर्णबाधस्य हेत्वाभासत्वं व्यवस्थापितव-
तो मणिकारस्यानुमतं तथा सति सल्लिंगपरामर्शादनुमानुमित्यसंभवेन बाधदोषानन्तसंकरस्य दुर्वारत्वात् तथा
चावच्छेदकदेशकालाघटिताप्रतियोगिव्यधिकरणाभावघटितव्याप्तिरेव तन्मतेऽवच्छेदकावच्छेदेनानुमितिप्रयो-
जिका तादृशव्याप्त्यवगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्तापरामर्शस्यापि विपरीतकोट्यनुमितिप्रतिबंधकत्वे ग्राह्याभावधर्मि-
कव्याप्यवृत्तित्वज्ञानाभावोऽपेक्षितः इत्यवच्छेदकावच्छेदेन हेतुमत्तापरामर्शस्य तदवच्छेदेन साध्यानुमितावपेक्षि-
तत्वेऽपि दर्शितरीत्या संशयानुमित्यनुपपत्तिरित्यादि यथाश्रुतमूलासंगतिरतो व्याचष्टे प्रतिरुद्धत्वेतीति पक्षतावच्छेदकधर्मि-
णि मिथो विरुद्धयोः साध्यतदभावव्याप्यत्वेन ज्ञानं यदि निश्चयरूपं स्यात्तदा परस्परप्रतिबंधेन नोत्पद्यत एव संशयो यं १०
तद्धर्मतांशे वा संशयरूपमेव तत्र च कारणीभूतनिश्चयाभावादेवानुमित्यनुत्पादो न तु सत्प्रतिपक्षभावात् इ-
त्याशयेनोभयोरेकत्र निश्चयानंतरमित्यादिना विरोधिद्वयस्य व्याप्यज्ञाननिश्चयस्य व्याप्यादिसंशयोपजीव्यत्वाभिधानं न सं-
गच्छते तादृशनिश्चयस्यैवानुपपादितत्वादतो भावमाह परस्परेति साध्यतदभावव्याप्यत्वं हि हेत्वोः साध्याभाव
साध्ययोरेव विरोधः न तु परस्परं तयोः परस्परविरुद्धत्वेन ज्ञाने तयोरेव नैकदा निश्चय इति तदग्रहे परस्परव्यापकविरुद्ध-
त्वेन ग्रहेऽपि हेत्वोरेकत्र निश्चयः संभवत्येवेत्यर्थः दूषकताबीजमित्यादिग्रंथस्य दूषकत्वनियतप्रयोजकत्वं दुष्टत्वमि

नियावदित्येतादृशार्थपर्यालोचनयाविरोधिपरामर्शप्रतिबंधेनानुमित्यजनकंसत्प्रतिपक्षस्थलेहेतोर्दुष्टता
प्रयोजकंनतन्निर्णीयाजनकत्वमात्रंविरोधिपरामर्शशून्यदशायामपिकारणविरहेणानुमित्यजनकतथास
द्धेतोर्दुष्टतापत्तेः नापिविरोधिपरामर्शज्ञाप्यमानोव्याप्तिपक्षधर्मताविरहः सद्धेतौतदसत्वेनविरोधिपरामर्श॰
संवलनदशायामपितस्यदुष्टतानुपपत्तेः विरोधिपरामर्शप्रयोज्यव्याप्तिभंगज्ञानंभ्रमप्रमासाधारणंवासद्धेत
साधारणदुष्टताप्रयोजकमित्यर्थोःनित्यदोषानभ्युपगंतमतेनसंभवतीतितन्मतत्वयाव्याचष्टे विरोधीत्यादि
नानस्यविरोधिपरामर्शस्यविरोधित्वंकल्पयतीति एवंचदूषकतापदंविरोधिपरामर्शनिष्ठप्रतिबंधकतापरं॰
वीजपदंविकल्पार्थकंबोध्यंव्याप्त्यादिविरहस्यस्वरूपसतोदोषत्वाप्रसक्तेःरन्यज्ञाप्यमानस्यतथात्वेचविरोधिप
रामर्शानुपयोगितयातदसंबलनदशायामपिसत्प्रतिपक्षतापत्तिरतोनत्वित्यनेनांतरंतेनज्ञाप्यमानमितिदूषणी
यमित्याशयेनव्याचष्टे नेनेति सद्धेतावपि व्याप्तिपक्षधर्मताविरहशून्येपिपक्षादृशामूलप्रतिकांतत्वंफरयति।
तस्मेतिविरोधिपरामर्शस्येत्यर्थः सत्प्रतिपक्षत्वादिति मूलस्यव्याख्या अनुमितिविरोधित्वादितिदूषकत्वे
विरोधिपरामर्शस्यानुमितिविरोधित्वेएतन्मतस्यदूषणत्वात्साकारमनिर्भरस्त्वचकतयाव्याचष्टे वाकारइति
अनुमितिप्रतिरोधेनअनुमित्यनुत्पादानुरोधेनविरोधिपरामर्शस्यनतत्वात् साक्षादेवप्रतिबंधकत्वात् अन्यथा
व्याप्तिभंमज्ञानेसेदोव्यतयासाक्षादनुमित्याविरोधितयाचविरोधिपरामर्शसंवलितपरामर्शसंवलितपरामर्शात्
प्रथमानुमितिर्जन्यतएववाधकाभावादितिभावः परंपरयाव्याप्तिज्ञानविरोधित्वेनहेत्वाभासतायामप्युपपद्यतइ
त्याह परेतिप्रथमपक्षेविरोध्यनुमितिसामग्र्याअनुमितिविरोधित्वेप्रत्यक्षप्रतिबंधकत्वमपितस्याःस्यात् विरोधि॰
ज्ञानसामग्रीत्वाविशेषादित्याशंकयचरत्न रोदेस्त्रेत्यादिइयंप्रथमवतार्थफलानुरोधेनप्रत्यक्षसामग्र्याःवलवत्वमि॰

गदा० र्थकतया व्याख्यानमयुक्तं भिन्नविषयेऽनुमितिसामग्र्याः प्रत्यक्षसामग्रीतो बलवत्त्वात् तत्प्रकारेत्यादिपदद्वयव्यासि
साधने प्रमाणप्रत्यक्षकता संभवतीति च वह्न्यादेरेतत्तथाभूतत्वात् तत्प्रतिबंधकत्वं विरोधिपरामर्शस्य न स्यादित्या
शंकया वह्न्यादेरभावेति पक्षकामवतार्य दृष्टान्तपरतया मिश्रा व्याख्यातवंतः तद्भावविरोधिपरामर्शस्य लौ
किकवाक्यस्थाय्य प्रतिबंधकत्वे प्रमाणोपनीतभाने जननीये वह्न्यादेः प्राहुस्तच्च प्रतिबंधकताघटकशंकापाठ्यनिर्वृत्तेः
स्वयं विशिष्टबुद्धौ तदभाववद्व्याप्यवत्ताबुद्धेः साक्षात्प्रतिबंधकतया दृष्टत्वे निर्भरस्य वर्णितत्वात् तादृशप्रतिबंधक
त्वानुपपत्तिशंकयैव तादृशग्रन्थस्थलमवतारयन्ति । नन्विति । विरोधिपरामर्शः । तद्विपरीतव्याप्यवत्तानिर्णयरूपः ।
विपरीतनिर्णयविरोधितद्दृशि ज्ञानविरोधी विशेषदर्शनेऽपीतत्त्वाभावव्याप्यवत्त्वादिनिश्चये सति चानुमितिप्रतिबंधा
दर्शने वह्न्यादेश्चेति चकारस्यानुमानशब्दस्य समुच्चायकत्वान संभवति तस्यानुमानप्रतिबंधकत्वादतस्त्राद वस्तुत्वं
इति नानुमानेन प्रतिबंधः इति मूलस्य दोषविशेषाधीनज्ञाने जननीये इत्यादि तदुपस्थिततावपीति विरोधिपरामर्शस्य
त्वेऽपीत्यर्थः तस्य दोषादिसमवहितवह्न्यादेरधिकबलत्वात् अधिकबलत्वोपगमात् अप्रतिबध्यफलकत्वोपगमा
दिति यावत् तथा च दोषविशेषाद्यजन्यत्वे साक्षात्कारित्वव्यंजकदोषविशेषजन्यज्ञानसाधारणविषयताविशे
षशून्यत्वं वा विरोधिपरामर्शप्रतिबध्यतावच्छेदककोटावधिकफलबलेन निवेशनीयमिति भावः एवं विरोधि
मनसामग्र्या निश्चयविरोधित्वे यद्यपि विरोधिपरामर्शस्य तदभावव्याप्यवत्ताज्ञानाविधयैव शिरोमणिमते प्रतिबंध १२
कत्वे तन्मते मूलस्य सामग्रीपदेनापि साध्याभावव्याप्यवत्तापरामर्शस्यैव विवक्षणीयत्वात् तथापि सामग्रीपदस्य यथा
श्रुतपरत्वाभिमानेनेयं शंका वादिवाक्यमात्रस्यैतत्पदेन साध्याभावबोधकानुमानापेक्षया व्यवच्छेदः प्रतिबंधत्वे
न प्रतिबंधकत्वप्रसंगेनानुमानमात्रोच्छेदः परार्थानुमानमात्रोच्छेदः न्यूनबलत्वेऽनाप्तोक्ततया निश्चितत्वे

गदा॰ लक्षणायोगः प्रतिरोधप्रयोजकसमानबलत्वायोगाः समानबलत्वेनाभिमतयोः निश्चितत्वे प्रतिरोध इत्येव॰
निरोधः अधिकबलत्वे ज्ञाततया निश्चयजनने पक्षार्थस्थले मध्यस्थस्य पक्षे साध्यमिव साध्यतदभावग्राहकमानयो
रुभयोः सत्त्वसदृशं न तत्र व्याप्तिनाभासत्वमाभासत्ववा निश्चितं प्रमाणान्तरेण तन्निश्चये साध्यस्यापि प्रमाणान्तरेण
निश्चये संशयस्यापि भवाद्विवादपर्यवसानायत्तेति समानबलतया प्रतिवादिनाह प्रतिरुध्यादेवानुमानमित्याह
अप्रमाणीति दीधितौ नहीत्यादि तर्हि कथं प्रतिरोधकतया कथायां प्रत्यक्षादेरुपन्यास इत्यन्वयः अनुमानस्यैवता॰
दृष्टबलसत्त्वादिति भावः मूले प्रतिरोधः अप्रतिरोधकतया कथायां प्रत्यक्षादेः उपन्यासः दीधितावन्येति व्या
प्तिपक्षधर्मताभ्यां व्याप्तमानत्वरूपलिङ्गाभावप्रयुक्तस्यापि प्रत्यक्षादेः प्राह्ययोः प्रतिरोधकतया अनुपन्यसनीयत्व इत्य
र्थः मूले तदुपन्यासानर्हत्वादिति लिङ्गाभावानायत्तप्रमाणस्यानुपपन्नक्रोपन्यासकत्वादित्यर्थः। हेत्वप्रयोगेन॰
तदुपन्यासानुपयोगित्वं व्यवस्थापयति दीधितौ प्रत्यक्षस्येति स्वरूपसतैव स्वज्ञानमनपेक्ष्यैव बोधकत्वादि
ति तथाचोपमानस्य परज्ञानमेव फलं प्रत्यक्षस्य प्रमाणस्य बोधकतया न उपन्यासस्य विरोधिज्ञानसामग्र॰
संपादकत्वेति शब्दादिपदग्राह्यशब्दस्य ज्ञानस्यैव बोधकतया तदुपन्यासस्य विरोधिज्ञानसामग्रीसंपादकतया उप॰
योगित्वं दुर्वारमेवेत्यत आह विरोधिवाक्यज्ञानमात्रस्येत्यर्थः मात्रपदेन कारणान्तरसाहित्यव्यवच्छेदः अविरो॰
धित्वादिति तन्मात्रस्य विरोधकेध समानीत्वविरहादिति भावः तथापि कारणान्तरसाहितज्ञानस्यैव प्रतिरोधप्र
योगितया उद्भावनसार्थकमित्यत आह बोध्येति तथाच व्याप्यवत्तापरामर्शदशायां विरोधिवाक्यज्ञानादिसत्त्वे
पि तदभावव्याप्यवत्तानिश्चयाभाववत्त्वादिति प्राह स्वराग्याः कथंचिदप्यसंभवेन लिङ्गाभावानायत्तप्राह प्रमाणोपा
न्यासेन विरोधिज्ञानसामग्रीसंपादयतीति न कश्चिदुपयोग इति भावः इदमुपलक्षणं पक्षे साध्यं नास्तीति वाक्यस्या

५५॰

गद॰ नुपूर्वीविशेषप्रक्षेपेणैववृत्तानं पक्षे साध्याभाववत्त्वावगाहिविरोधिबोधसामग्रीघटकं तादृशं वृत्तानं प्रत्यक्षात्मकं
तादृकवाक्यप्रयोगादेवसंपद्यते । नतु साध्याभावप्रमापकशब्दविषयः पक्षत्वाद्याकारकतदुपन्यासादिति नक शब्द विषयः
सत्प्रति थं चित् पि तादृशोपन्यासस्य प्रतिरोधकत्वेन्यपि बोध्यं । मूले एकैकमिति प्रत्येकहेतुनिष्ठलिंगतावच्छेदकावच्छि
२२ न्नेसत्प्रतिपक्षत्वप्रतिपक्षविधया दुष्टव्यवहारविषयः न तु विशिष्टहेतुप्रतिहेतुसाधारणरूपावच्छिन्नेतादृशं
७३ वचनसंशायकमिति संशायकतायाः दुष्टिबीजत्वे तादृशा दुष्टव्यवहारानुपपत्तिरित्यर्थः विरोधिमानसामग्र्याः संश
यविरोधित्वे संशयमानोच्छेदप्रसंग इति प्रकरणसमो विरोधिमानसामग्रीविधया संशयरूपानुमितिनिमाप्रतिरो
त्सीत् विरोधिविषयकत्वेन बाधवत्तदभावव्याप्यवत्तानिश्चयस्य प्रतिबंधकत्वे दुर्वारमिति शंकते मूलेनचसं
शयरूपानानुमितिरित्यादिना बाधवद्वेवि विरोधिविषयत्वमात्रेण प्रतिबंधकत्वं तत्र किंतु निश्चितप्रामाण्यकत्वेस
ति विरोधिविषयत्वं सत्प्रतिपक्षस्थले च उभयव्याप्यवत्ताज्ञानयोरेव प्रामाण्यानिश्चयात् अनुमितिनिप्रतिरोध इति स
माधत्ते अधिकबलेनेति मनुप्रत्यक्षे समानबलयोः साध्याभावग्रहसामग्रीसंशयानुपपत्त्याः विरोधिन्याः प्रत्य
नुमितौ नस्याः प्रतिबंधकत्वे का क्षतिरित्यत आह साध्याभावबोधस्येति साध्याभावनिश्चयस्यैवेत्यर्थः न
शानुमितौ नयनादेरित्यादिना विरोधिपरामर्षपरिग्रहः नयनग्रहणं हेतुर्नार्थेमानाभावदिति स्मरणीयं प्रत्ये ७३
कामिति एकैककोटिनिश्चयजनकत्वेनावधारितात्परामर्षादित्यर्थः कथं संशय इति संशयत्वावच्छिन्नं प्र
तिपरामर्षस्य हेतुतायाः काप्यक्लृप्तत्वात् इति भावः संशयत्वस्य जन्यतावच्छेदकत्वेपि तत्तत्प्रकारकज्ञानत्वाव
च्छिन्नोत्पत्तिनियामकसामग्रीत एव सर्वत्र संशयः प्रत्येककोटिमानसामग्र्याः संशयत्वावच्छिन्नजनकत्वे
प्रत्यक्षस्थलेपि नास्तीत्याह प्रत्येकादीति तथा च तत्प्रत्येकसाध्यकानुमितित्वस्य निश्चयसाधारणतन्मात्र

व्याप्यवत्तापरामर्शजन्यतावच्छेदकत्वेपितद्घटितसामग्रीसमाजात्संशयोत्पत्तिस्तत्वन्निर्निरुक्तलक्षणैवेतिभावः
अत्र हीनाप्रामाण्यकत्वेसतिविरोधिविषयत्वमेव बाधप्रतिबंधकत्वेप्रयोजकंनतुनिश्चयप्रामाण्यकत्वेस
तिविरोधिविषयत्वमेव बाधप्रतिबंधकत्वेप्रयोजकंनतुनिश्चयप्रामाण्यकत्वसहितमित्याशयेनदूषयति, नचे
ति सत्वकोषकारमतंपरिष्कर्तुमारभते दीधितौ सत्वकोषकृतामित्यादिना संशयत्वेयज्जन्यतावच्छेदकंतद्घटित
सामग्रीतएव संशयत्वावच्छिन्नोत्पत्तिरितिनियमेऽत्रभ्रमितेः संशयत्वंनसंभवति अत्रमतेसामग्रीघटकस्य
परामर्शादेः कस्यापिसंशयत्वावच्छिन्नाजनकत्वादतः संशयत्वस्यजन्यतावच्छेदकत्वाभावंमूलकारोक्तंप्रति
बंदित्वेनदूषयति एकधर्मिकेति अविरुद्धानेकप्रकारकेसत्यद्वयपरस्परयमाणज्ञानत्वेनसंबंधः प्रकारांशे
संशयत्वघटितविरुद्धत्वविपरीतविशेषणघटितधर्मस्यजन्यतावच्छेदकत्वप्रसक्तिं प्रदर्श्यधर्म्यंशेतद्घटकैकत्वविप
रीतविशेषणघटितस्यप्रकारांशेविशेषणैकत्वविरुद्धत्वभेदेनभिन्नस्यधर्मद्वयस्यतथात्वापत्तिमपिसूचय
ति नानाधर्मिकेति एकत्वस्यप्रकारांशेविरुद्धत्वयोर्नानापदार्थेप्रत्येकमन्वयः नजन्यतावच्छेदकंकस्यापीतिशे
षः नन्वेवंक्वाचिज्ज्ञानेसंशयत्वंक्वाचिन्नेत्यत्रकिंनियामकमित्यतआह धर्मिकेति पर्वतादिधर्मिकेत्यर्थः तत्प्रका
रकेति वह्नितदभावादिप्रकारकेत्यर्थः प्रयोजकसमाजेति तदवच्छिन्नोत्पत्तिनियामकसामग्रीसंवलनेत्यर्थः
समाजस्यपर्वतादिधर्मिकवह्न्यादिप्रकारकत्वतद्धर्मिकवह्न्यभावादिप्रकारकत्वयोर्वैशिष्ट्यस्यतथात्वेकमात्रको
टिभानप्रयोजकसामग्रीद्वयाद्यंयज्ज्ञानंजायतेतत्रतत्कोटिप्रकारकत्वेविरुद्धकोट्यंतरप्रकारकत्ववैशिष्ट्यप्रयो
जकस्यतत्कोटिप्रकारकत्वप्रयोजकसामग्र्याकोट्यंतरप्रकारकत्वप्रयोजकसामग्रीवैशिष्ट्यसत्त्वेनतादृशसंश
यत्वस्यजन्यतावच्छेदकत्वेनव्यभिचारनिर्वाहइतिभावः नन्वकोटिद्वयावगाहिज्ञानत्वमात्रेणसंशयत्वंकोटिद्वय

अ

ग.द. सत्ता १२ ७५

समच्चयसाधारणत्वात् किंत्वेककोट्यंशेऽपरकोटिविरोधावगाहित्वसहितं तादृशस्य कोटिद्वयभानप्रयोजकसंव
लनमात्रेण नियामकं तत्तत्तद्वेपि समुच्चये संशयत्वाभावादिति संशयत्वप्रयोजकमन्यदेवाकिं चिद्रूपं गन्तव्यं यतः क्वचि-
देवोभयावगाहिज्ञाने संशयत्वमिति नियम इति तस्यैव कार्यतावच्छेदकं संशयत्वमावश्यकमित्यत आह क्वचिदिति
उभयप्रकारक इति शेषः तथा च विरोधमानस्यासमग्रकोटिद्वयप्रकारकज्ञानवृत्तितायाः इत्यर्थः तत्प्रयोजकाधीन
त्वादिति श्रव्याप्यवृत्तित्वज्ञानाभावादिघटितविरोधमानप्रयोजकत्वसत्सामग्र्यंतरस्य काचित्कत्वप्रयोज्यत्वादित्यर्थः
तथा च तत्संवलनस्यापि विरोधभानकघटितसंशयत्वस्य कार्यतावच्छेदकत्वे इदं नवस्कगतिमत्त्वरूपमवस्तुतः सं
शयत्वस्य कार्यतावच्छेदकत्वे तस्य तत्तद्धर्मितावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकतायाएव स्वीकरणीय-
तया यथा प्रत्यक्षस्थले तद्रूपभावप्रकारकज्ञानसामग्रीद्वयसहितधर्मिज्ञानरूपा सामग्री संशयं जनयति तथानुमि
तिस्थलेपि तादृशधर्मिज्ञानात्मकसामग्र्याः संशयजननेन किंचिद्बाधकं न तु माभूत्संशयत्वं जन्यतावच्छेदकं
तथापि निश्चयत्वावच्छिन्नहेतुभूतान्यतमघटितः कथं संशयान्नमिति विलाशंकया निश्चयत्वस्यापि जन्यताव
च्छेदकत्वे तिरस्करोति नीलेतरेति यथा घटे नीलरूपवद्भेदात्मकनीलेतरत्वप्रयोजको घटे नीलोत्पादकसामग्री १२
जन्यत्वं तत्संवलनाधीनं नीलेतरत्वघटत्वयोः संवलनमिति तद्वेव नीलेतरत्वविशिष्टघटत्वनियामकमिति तत्र
स्य किंचिज्जन्यतावच्छेदकत्वेपि कस्यचिदेव घटस्य तथात्वमिति नियमः एवं पटादिज्ञाने घटत्वप्रकारकताविरह
स्तत्पूर्वकालीनघटत्वप्रकारकत्वावच्छिन्नजनकघटत्वज्ञानादिघटितसामग्रीरूपतच्छात्वप्रयोजकविरहप्रयो
ज्य इति ज्ञानत्वप्रयोजिततत्पूर्वकालीनसामान्यसामग्री घटत्वप्रकारकत्वावच्छिन्नोत्पादकसामग्रीविरहस्य द्व-
योः संवलनं घटत्वाप्रकारकत्वं ज्ञानत्वयोजकं तदेव जन्यतावच्छेदकस्यापि एकाविशिष्टपरस्य प्रयोजकमेवमे

कधर्मिकाविरुद्धानेकप्रकारकत्वं संवलिततनानासामग्रीप्रयोज्यं तद्विरहत्वेपि नानियमः तथा निरुक्तनिश्चय
त्वस्यापीत्यर्थः यद्यपि तत्प्रयोजकसमाजानियमस्य जन्यतावच्छेदकतत्संवलितज्ञानत्वप्रयोजकप्रयोज्यं त-
द्विशिष्टज्ञानत्वमिति यथा तस्य जन्यतावच्छेदकताया एकधर्मिकाविरुद्धनानाप्रकारकज्ञानत्वमेव पूर्वं हृष्टो-
तीकृतं तथापि तत्र सामग्रीद्वयप्रयोजकसमाजानियम्यत्वमेव न तु सामग्रीविरहसामग्रीसमाजानियम्यत्वं नि-
श्चयत्वे च ताहृशमेवेति प्रकृतसामग्र्ययहणं तात्पर्यं तत्र प्रथमे तज्जनकसामग्र्यभावसंवलनस्य तद्व्यन्यत्ववि-
शिष्टप्रयोजकतादि द्वितीये तदवच्छिन्नजनकसामग्रीविरहसंवलनस्य तृतीये तद्घटकनानाधर्मावच्छिन्नहेतुस-
तनानासामग्रीसंवलनविरहसंवलनविरहसंवलनस्येति उत्तरोत्तरं निश्चयत्वसाम्यात्क्रममिति बोध्यं एकं चेति सं-
शयनिश्चययोर्जन्यतावच्छेदकत्वे चेत्यर्थः तुल्यबलाभ्यां परस्परकार्यविरोधिनीभ्यां संशयरूपं भवतीति तथा च स-
त्वनिपतत्संवलनस्थले तुल्यबलकोटिद्वयानुमितिसामग्रीभ्यां संशयरूपानुमितिर्जन्यत एवेति भावः अथ ज्ञा-
नविरोधभासकविरोधावगाहिपरामर्शं च इति सामग्र्यभावादिरोधेन भासितत्वमीदृशेन तथा च कथं संशयइति चेन्न
सत्प्रतिपक्षतादृशायां कोटिद्वयनिश्चयानुत्पादस्योभयवादिसिद्धत्वात् तन्निर्वाहाय परस्परजन्यकार्ये विरोधग्र-
मिति सामग्र्याः प्रतिबंधकतापेक्षया विरोधभानप्रतिबंधकाभावसहकारेण विरोधाविषयकस्यापि परामर्श-
स्य विरोधभानप्रयोजकतया लाघवेन कल्पनात् उपस्थितस्य विरोधस्य प्रकारतया भानासंभवेपि विरोध-
संबंधेन एककोटौ अपरस्य तथा एककोटिसंबंधिनिष्ठसंसर्गतायां कोट्यन्तरविरोधस्यावच्छेदकतया भा-
नोपगमात् अन्यथा यत्र कोट्योर्नो विरोधग्रहः न वा विरोधस्योपस्थितिर्वर्तते तत्र सामग्रीसमाजात् प्रत्यक्षा-
त्मककोटिद्वयनिश्चयस्य दुर्वारत्वात् अथ यत्र कोट्योर्नो विरोधग्रहः अथ च धर्मिणि विरोधसंबंधेनैककोटि-

गदा.

सत्प्र.

९३

७५

विशिष्टापरकोटेर्विरोधविशिष्टसंयोगादिसंबंधेन च कोट्योर्बोधग्रहः तत्र कथंचिदपि विरोधभानासंभवेन एकदा
प्रतियोगितदभावनिश्चयरूपानुमितिर्जायतामिति चेत् प्रत्यक्षस्थलेऽप्येवं योगस्त्वल्पः अन्यधर्मिणि संशयानन्तरं द्व
त्राज्ञानं प्रतिश्चव्याप्यवृत्तित्वज्ञानाभावविशिष्टतद्विरोधिधर्मवत्ताज्ञानसामग्रीप्रतिबंधिकेति दर्शितस्थले परस्पर
विरोधेन न तत्तदभावयोः प्रत्यक्षनिश्चयोपि प्रत्यक्षानुमित्यादिसामग्रीणां चानुगतरूपेण प्रतिबंधकताकल्पना
संभवात् अनुमितिस्थले विरोधानुमिति सामग्र्याः प्रतिबंधकत्वे कल्पनीये संशयान्यत्वेन प्रतिबध्यतावच्छेदक
गर्भे निवेश्यत इति मूलसंशयानुमितिवर्नेति अत्रार्वाचीनाः संशयत्वं न विरोधावगाहित्वं नियतं तथाहि यथालौ
किकसंनिकर्षजन्ये साक्षात्करोमीति प्रतीतेर्विषयताविशेषः अनुमिनोमि शाब्दयाम्युपमीति प्रतीतेश्चानुमित्याप
त्योः साध्यापापयोर्विषयताविशेषोऽनुरूपस्तथा संदेहीत्यनुव्यवसायबलात्संशयेपि कोट्युपस्थो विलक्षणविषयता
ति पुरुषो वेति तत्प्रतियोगित्वमेव संशयत्वं तस्या विरोधानवगाहिज्ञानसाधारण्येन किंचिद्बाधकं न च तादृशप्र
तीतेर्विरोधावगाहिसमानधर्मिकतत्तदभावावगाहिज्ञानत्वावलंबनयैवोपपत्तेर्विषयताविशेषे किं मानमि
ति वाच्यं क्वचित्संशये विरोधस्य सांसर्गिकविषयतायाः प्रमाणांतररहितायाः उक्तातिप्रसंगवारणाय सामग्री
प्रतिबंधकतायां च कल्पनामपेक्ष्य लाघवेन कोटितावच्छेदकविलक्षणविषयताया एव कल्पयितुमुचितत्वात्तत्सा ७५
च प्रकारताभेदः तदन्यैव वा कोटिविशेष्यकसंशयसाधारण्येनानुरोधात् न च तादृशविषयतानिष्टं चैलक्षण्यं दृष्टं
टं अवच्छेदेनानुपसिद्धांतकवलितत्वादिति वाच्यं एवं सति विषयतात्वप्रकारतात्वादीनामपि विलयप्रसंगेन बहुत
र असामंजस्यात् तत्त्वा विरोधिकोटिद्वयविषयकत्वेन ज्ञाननिरूपितत्वमेव समुच्चयविषयताव्यावृत्तस्तद्विशेषः सं
शयपरावर्तत्वात् कोटिविषयकत्वयोगिंयोवच्छेदकाभावोपगमात् तादृशविषयताशालि बुद्धौ च मणिमंत्रादित्या

येनैव कोट्योर्व्याप्यवृत्तित्वज्ञाने प्रतिबंधकत्वमास्थीयते तेनातः समुच्चयदशायां संशयापत्तिः एवं कोट्यंशे शेष्योक्ताग्रह-
पं संभावनात्वमपि विषयताविशेष एवेति ध्येयं । न चैवमार्थसमाजरूपबाधकेन संशयत्वस्य कार्यतानवच्छेदकत्वव्य-
वस्थापनं दीधितिकृतो विरुध्येत सामग्रीद्वयसमाजस्य तत्तत्सामग्रीप्रयोज्यकार्यतावच्छेदकद्वयसामानाधिकरण्यमा-
त्रप्रयोजकत्वात् कार्यतावच्छेदकाभावाद्यत्र विषयताविशेषरूपसंशयत्वानिर्वाहात् तादृशविषयताविशेषस्य समुच्च-
यसाधारण्यविरहेण विरोधानवगाहिज्ञानसाधारण्येन च कोटिद्वयभानसामग्रीसंवलनस्याविरोधभासकसामग्री-
मनपेक्ष्यापेक्ष्य वा तत्प्रयोजकत्वस्यासंभवदुक्तिकत्वाच्चेति वाच्यं । विरोधावगाहित्वसहितकोटिद्वयावगाहित्वसंश-
यत्वमिति प्राचीनसिद्धांतमवलंब्यापाततस्तज्जन्यतानवच्छेदकत्वाभिधानात् अथैवमपि संशयानुमितिव्यवस्थापन-
मशक्यं विषयताविशेषरूपसंशयत्वे परामर्शादिघटितानुमितिसामग्र्याः प्रयोजकत्वकल्पकाभावादिति चेन्न सवि-
रोधज्ञानमनपेक्ष्य सामग्रीसमाजादेकदा एकधर्मिणि तदभावोभयनिश्चयानुमित्यनुदयात् संशयानुमितिसि-
द्धेश्च व्याप्यवृत्तित्वज्ञानाभावसमवहितयोः (प्रत्यक्षसामग्र्योरिवानुमितिसिद्धेश्च व्याप्यवृत्तित्वज्ञानाभावसमव-
हितयोः) प्रत्यक्षसामग्र्योरिवानुमितिसामग्र्योरपि संशयत्वावच्छिन्नोत्पत्तिप्रयोजकतायाश्च वर्जनीयत्वात् न च
संशयत्वाघटकीभूतायाः निश्चयीयविषयतानस्याः संशयव्याप्यत्वे संशयसामग्र्यास्तदवच्छिन्नं प्रति प्रतिबंधक-
त्वनीयं संशयसामग्रीत्वं च प्रत्यक्षानुमितिसामग्रीसाधारण्येनैकामितिश्च व्याप्यवृत्तित्वज्ञानाभावविशिष्टविरोधिको-
ट्यनुमितिसामग्र्याः प्रतिबंधकत्वे कल्पनीये ऽनुमितित्वस्यैव तन्निष्ठप्रतिबंधतावच्छेदकत्वमुपपन्ने लाघवाच्च तन्नि-
श्चयत्वस्येति न संशयानुमितिसंभव इति वाच्यं प्रत्यक्षसंशयस्य तादृशविषयताशालित्ववारणाय न तदवच्छिन्नं-
प्रति संशयोपधायकताविशिष्टत्वेनैव सामग्र्याः प्रतिबंधकताकल्पनात् तद्रूपस्य च संशयानुमितिसामग्रीसाधारण्य-

गदा॰ तथात्वप्रतिबंधकतां तत्र कल्पनादिति वदंति अत एव तुल्यबलसामग्रीसमाजात् प्रत्यक्षस्येव परोक्षस्यापि सं
शयोत्पत्तौ बाधकाभावादेवाहृत्येव सा तादृवविप्रतिपत्तिवाक्यजन्यज्ञानमिति विप्रतिवाक्यतो जन्यत्वस्य एवं भूतं ज्ञा
सत्प्र- नं बोधात्मकं संशयमपि वदंतीत्यर्थः ननु समानबलत्वं न्यूनाधिकबलत्वं वा सामग्र्याः कथमवधारणीयमित्यत आ
ह फलबलकल्पनीयमेवेति सामग्रीसंवलनस्थले एकस्याः फलानुत्पत्त्या न्यूनाधिकबलभावः उभयोः फलोत्प
२८ त्त्या समबलभावो वधारणीय इत्यर्थः एतदेव विशिष्योदाहरति सत्यामपीति पीतत्वशुक्लत्वरक्तत्वादिति सवि
धवर्तिनि शंखादौ त्वक्चक्षुर्भ्यां विशेषणज्ञानविशेष्येंद्रियसन्निकर्षघटितत उभयविशिष्टप्रत्यक्षसामग्रीसत्वे दर्शितं दोष
७६ विशेषे पित्तद्रव्यसमवधानरूपी तत्त्वस्यैव ग्रहणादित्यग्रिमेणान्वयः तथा च फलबलात् श्वेतत्वादिलौकिकप्रत्यक्षसा
मग्रीतो दोषविशेषोपहितयातत्वशुक्लत्वाभावादिग्राहकसामग्र्या बलवत्त्वमिति भावः दोषविशेषासत्वे उपनी
तभानसामग्र्यपेक्षया लौकिकसन्निकर्षघटितविरोधिग्राहकसामग्र्या बलवत्वमित्याह असतिचेति शुक्लत्वस्यैवेति
दोषविशेषासमवधानस्थले उपनयघटितसामग्रीद्वयस्य तुल्यबलत्वमाह द्वयस्येति धर्मिणो दूरस्थलेऽसति च विशेष
दर्शने विद्यमानकोटेरपि न लौकिकसामग्री दूरत्वदोषस्य विशेषादर्शनसहितस्य लौकिकसामग्रीविघटनात् दूर
स्थत्वविशेषादर्शनयोरत्रावधानेऽस्त्रनयोरित्युपनयसंपादनायकोटेः स्मरणं तत्र तद्भाववयोर्विशेषादर्शनघ ७८
टितसामग्र्या बलवत्त्वमाह सतिचेति सति च विशेषदर्शने एकस्य गृहीतविशेषायाः कोटेरेव नयने ग्रहणात् अ
न्यत्र ग्राह्यविपरीतविशेषदर्शनस्यैव प्रतिबंधकत्वेन तत्सामग्र्या दृत्यवधेयं ननु कोटिद्वयभासकसामग्रीसमाजादेव
चेत्संशयः तदा संस्कारं प्रति निर्णयत्वेन हेतुत्वेन तथापि न संशयाकारस्मरणसंभवः प्रत्यक्षतत्तद्भावगोचरनिश्चयजन्य
संस्कारद्वयसंवलनात् तदुत्पत्तौ बाधकाभावादित्याशंकते यद्येवमिति उद्बुद्धाभ्यामिति न चोद्बोधकस्य फले कोन्नेय

तथाप्येकत्र विरुद्धकोटिद्वयोद्बोधकाकल्पनान्नापत्तिरिति वाच्यं नियतोद्बोधकसंबंधिवस्तुविशेषवत्त्वाना
दीनां अनुगतरूपेणैव कारणतायाः क्लृप्तत्वात् तादृशोद्बोधकद्वयसमवधानं दैवाद्यत्र तत्रैवापत्तिसंभवात्
अनुभवविरोधविरहेऽपि इच्छाया उपपत्तिमाह किंचस्यादिति अनुभवविरोधस्यापि सविवादतया यदीत्यादिना अनुभ-
वविरोधेन भवतस्तन्मते न परस्परसामग्रीप्रतिबंधकताकल्पनमंतरेण तादृशापि संशयाकारस्मरणवारणं न संभवती
ति सूचितं बाधबुद्धेरन्यतान्योन्याभाववत्ताधीसाधारणविरोधिप्रकारकत्वेनैव प्रतिबंधकतानयमत्वे चाविरोधि
परामर्शस्यापीति मूलोक्तासिद्धांतं दूषयितुमाशंकते अथेति नहि विरोधित्वं तदभावव्याप्यत्वे सत्यव्यापकतदभा-
वकत्वरूपं सत्त्वघटितत्वेन न साधारणमित्यत उक्तं सहीनवच्याप्यपि स्वमिति विरोधस्य विषये उपलक्षणत्वे विशेष
णत्वे चेति विनकेंद्रूषयति यदीत्यादिना तथा प्रतिबंधकः पक्षतावच्छेदकादेरिति इदंत्वाद्यवच्छिन्नह्रदादिरूपप
क्षविशेषणस्य हेतुत्वेनाभिमतस्य वा तादृशस्य वह्नित्यावत्त्वादिविरोधित्वेन निर्णये भ्रमानुमितिनिर्णयाधी-
ना भ्रमानुमितिर्भवतीत्यर्थः तत्र जनकज्ञानस्यैव तत्र प्रतिबंधकतावच्छेदकाक्रांतत्वादिति भावः यद्यपि जल-
घत्वादेर्विरोधानवगाहिज्ञानदशायां तदवच्छिन्नपक्षावगाहिन्याः लिंगलिंगिकायाश्च वह्निमानित्याद्यनुमिते
रनुपपत्तिरस्ति तथापि जलमयोध्यं वह्निमानित्याद्यनुमितिस्थले प्रतिबंधकतानैयत्येन तथाविधानुमितिमा
त्रोच्छेद इत्यभिप्रायेणात्रावदुक्तानुसरणं अथवा विरोधित्वेनेति निर्णयस्य तथेत्यन्वयबध्यते नन्वयं हेतुवह्न्यभावादे
वह्न्यादेर्विरोधग्रहेऽनुमितिप्रसंग इति तथा च वह्न्यभाववत्त्वाद्यवच्छिन्नावगाहिनिश्चयत्वेनैव विशिष्य बाधबुद्धेः
प्रतिबंधकता वाच्या तत्र च न विरोधिपरामर्शसाधारणमिति भावः दूषणमुपलक्षणं अनुगतेन तद्बोधकरूपाभावादितिरूप
विरोधावच्छिन्नप्रकारकनिश्चयत्वेपि स्वव्यापकतत्सामानाधिकरण्यरूपव्याप्त्यवगाहिविरोधिपरामर्शस्य

गदा० तद्रूपानाक्रांततयातादृशपरामर्शाभ्यां संशयानुमितिजनने बाधकाभावः एवं तत्संबंधेन तद्धीकारणत्वनित्वावच्छि-
न्नस्य तत्संबंधावगाहिज्ञानमेव विरोधीति संबंधविशेषानिवेशस्यावश्यकतया विशेषणताविशेषादिसंसर्गकग्राह्याभा-
सत्प्र वादिज्ञानसंबंधांतरावगाहिविरोधिपरामर्शयोर्नानुगतरूपेण प्रतिबंधकतासंभव इत्यपि बोध्यं मा भूद्बाधबु-
२५ द्धिप्रतिबंधकतावच्छेदकरूपाक्रांतत्वं विरोधिपरामर्शस्य तथापि न संशयानुमित्यवसरः स्थाणुत्वाभावव्याप्यव-
दादिमानयमित्यादिनिश्चये स्थाणुत्वादिप्रत्यक्षभ्रमसंशयानुदयात् तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्य-
५१ ज्ञानिश्चयत्वेन प्रतिबंधकताया आवश्यकत्वादित्याशंकाते श्वेतेति शुक्लत्वादीति पीतत्वाभाववादीत्यर्थः दुष्टेन-
पित्तादिदूषितेन पीतत्वादीति शुक्लत्वादीत्यर्थः नन्वेवं संशयत्वं प्रतिबध्यविशेषणं देयं इत्याशंकामुपनीत-
भावनिश्चयविशेषासंग्रहं प्रदर्शयति सचेति विशेषदर्शने विरोधिव्याप्यदर्शनेन प्रथमस्थलानुरोधेन दोषवि-
शेषाजन्यत्वं द्वितीयानुरोधेन च लौकिकसंनिकर्षाजन्यत्वं द्वितीयानुरोधेन च लौकिकसंनिकर्षाजन्यत्वं प्रतिब-
ध्यविशेषणं देयमित्यत आह इत्यत इति प्रमितस्यकरादिभ्रमात्याक्प्रमापकलौकिकसंनिकर्षाश्रयस्य पतेन
करादिभ्रमदशायामपि हस्त्वादेव स्थाणुत्वाग्रह इति शंकया निराकृताग्रहादिति तथा च लौकिकसंनिक-
र्षाजन्यत्वनिवेशे तत्र स्थाणुत्वादिप्रत्यक्षापत्तेस्तन्निवेशो न संभवतीति भावः स्थलविशेष इति यद्यद्व्यक्तिसत्त्वे वि- १८
शिष्टबुद्धिर्न जायते तत्तद्व्यक्तिरेव विशिष्य विशिष्टबुद्धित्वावच्छिन्नं प्रतिबंधकत्वेन वाच्यमित्यर्थः तथा च कोट्यंत-
रविशेषदर्शनसहितविशेषदर्शनसाहित्यविशेषदर्शनव्यक्तीनो प्रतिबंधकत्वाकल्पनात्संशयानुमितिर्निष्प्रत्यूहैवे-
ति भावः क्वचित् लौकिकसंनिकर्षजन्यज्ञाने हरत्वादिसहकृतनतदभावव्याप्यभ्रमस्याविरोधित्वेपि लौकिकसंनि-
कर्षाद्यजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्तानिश्चयत्वेनानुगतप्रतिबंधकताकल्पनमुचित-

न तत्र ग्राह्यत्वेन प्रतिबंधकत्वे ऽनंतप्रतिबंधकताप्रसंगात् हृदत्वादिदोषसहकृतविशेषदर्शनस्य च प्रतिबध्यता
वच्छेदककोटौ लौकिकत्वमनिवेश्य प्रतिबंधकत्वांतरं कल्पनीयमिति समाधत्ते ऽनुगतेति दोषविशेषादीत्या
दिना लौकिकसन्निकर्षपरिग्रहः दोषविशेषजन्यज्ञानेपि साक्षात्कारित्वव्यंजकविषयताविशेषोपरागमात्रशून्यत्वं नि
वेश्यैव दोषविशेषजन्यलौकिकसंनिकर्षजन्यज्ञाने व्यावर्तनीये एवं च परमेश्वरबुद्धावपि तादृशविषयताया
अस्वीकारान्न नित्यसाधारण्यं न वानुगतधर्मस्य प्रतिबध्यतावच्छेदकत्वे चक्षुःसंनिकर्षादिजन्यभेदानां प्रकार
निवेशनीयतया मिथो विशेष्यविशेषणभावे विनिगमनाविरहः प्रसंगाच्चक्षुःसंयोगाद्यजन्यचाक्षुषत्वादीनां ज
न्यतावच्छेदकत्वापत्तिः वनिकाग्रेधकाले च घटचक्षुःसंयोगदशायां घटोपनीतभानस्य चक्षुःसन्निकर्षजन्यत्वेन प्र
तिबध्यतावच्छेदकानाक्रांततया विशेषदर्शनकालेपि तादृशोपनीतभानापत्तिश्चेति एवमनाहार्यत्वस्यापि नि
वेशो बोध्यः तेनाहार्यचाक्षुषादीनां विरोधिनिर्णयाप्रतिबध्यतोपपत्तिः आहार्यत्वं च स्वविषयकेच्छाव्यवहि
तोत्तरक्षणोत्पन्नप्रत्यक्षत्वं विषयत्वस्वाव्यवहितोत्तरत्वोभयसंबंधेन इच्छावच्छिन्नप्रत्यक्षत्वं वा आहार्यचाक्षुषा
दौ च चाक्षुषादीच्छाया हेतुत्वोपगमात् इच्छां विना विरोधिनिश्चयात् आपत्तिः कदाचिदिति यदि विशेषदर्शनप
रिभूय यज्ज्ञानं जन्यते तेन तद्धर्मस्मरणमपि विशेषदर्शनकाले ऽनुभूयते न त्वित्यर्थः वस्तुतस्तु विशेषदर्शनकालेपूर्व
ज्ञानविरोधिविशिष्टज्ञानमेव स्मर्यते न तु तद्विषयीभूतविशिष्टं यावद्विशेषदर्शनेनाप्रामाण्यग्रहस्तेन तथा च ज्ञान
त्वमेव प्रतिबध्यतावच्छेदकं न त्वनुभवत्वं अनुभवत्वजातेरप्रामाणिकत्वात् स्मृतिभिन्नज्ञानत्वस्य तथात्वे गौरवात् प्र
त्यक्षत्वस्य तथात्वमाशंकते नचेति समाधत्ते सामान्येति सामान्यधर्मस्य ज्ञानत्वस्य ज्ञानत्वस्य तथात्वे बाधकाभावा
दित्यर्थः न त्वसंशयात्मिते संदिग्धतया ज्ञानत्वस्य विरोधिपरामर्शाभावजन्यतावच्छेदकत्वकल्पनानसंभवतित्यभि

चारसंभवेपि शयस्य विरोधित्वादित्यत आह बाधाभावेति शाब्दादीत्यादिना उपमितिसत्तापरिग्रहः तथा च ज्ञा
नत्वतयात्वे शाब्दादिस्थले स्वतंत्रप्रतिबंधकत्वाकल्पनेन लाघवव्यभिचारसंदेहो किंवित्यादीति भावः नन्वेतद्व्या
प्यवज्ज्ञानस्य तदभाववद्व्याप्यवज्ज्ञाने उत्तेजकत्वमावश्यक अन्यथा कोटिद्वयव्याप्यदर्शनदशायां प्रत्यक्षात्म
कस्यापि संशयस्योत्पादासंभवेन तदानीं संशयानुमानापलापप्रसंगादिति सत्यपि पक्षसंबलनदशायामुत्ते
जकसत्वेन संशयानुमितिनिश्चितत्पहेत्वेत्याशंकते अथेति यावदप्रामाण्यं न गृह्यत इति तथा चानयोरेकतरमिति
रीत्या सामान्यतो ज्ञाने तज्ज्ञाप्रामाण्यग्रहे विशिष्य उभयस्यैवाप्रामाण्यसंशयेन प्रत्यक्षसंशयो भवतीति भावः एतदुपपादक
मेवाह गृहीताप्रामाण्यस्येवेति अप्रामाण्यसंशयानन्तरमनुमितिः संशयरूपा न संभवति अगृहीताप्रामाण्यकपराम
र्शरूपकसकारणविरहात्कारणांतरस्य कल्पकाभावात् मिश्रास्तु तद्व्याप्यदर्शनस्य तदभावव्याप्यदर्शनप्रति
बंधकतायामुत्तेजकत्वेपि प्रत्यक्षसंशयवदुभयव्याप्यदर्शनात् संशयानुमितिरुत्पद्यते यतो व्याप्यदर्शनमवधार
णात्मकज्ञानमेव हेतुः अवधारणत्वं चानुमितौ व्याप्यदर्शनजन्यप्रत्यक्षे च स्वीक्रियते अवधारणद्वयसामग्रीसमा
जाच्च संशयः तत्कोट्यवधारणेन हि विरोधिकोट्यवधारणजनकविशेषदर्शनस्य प्रतिबंधकतया विरोधिकोटिद्वयाव
धारणसामग्रीसंबलनस्यासंभवात् तादृशप्रतिवध्यप्रतिबंधकभावाकल्पने उभयकोट्यव्याप्यदर्शनकाले उभय ११
कोट्यवधारणापत्तेः न चेष्टापत्तिः तत्र संशयस्यैवोत्पत्त्या अवधारणामीत्यननुभवात् कोटिद्वयविशेषदर्शनका
लेपकाविशेषदर्शनस्याप्रविशेषदर्शनेनाप्रयोजकीकृतत्वाद्विशेषादर्शनदशायां विशेषणज्ञानादिवदितयादृश
सामग्रीसमाजात्प्रत्यक्षसंशयस्तादृशसामग्र्याः तत्राप्यसत्त्वान्न भवति संशयात्मकं प्रत्यक्षमनुमितिस्थले चाव
धारणसामग्र्यतिरिक्तसामग्री न कल्प्यते प्रयोजनाभावादित्याहुः तेषां चायमाशयः अवधारणत्वेन निर्णयत्वं

धी या

विपरीतकोट्युपस्थितिकालीनविशेषादर्शनानन्तरं निश्चयानन्तरमवधारयामीति प्रतीत्यनुदयात् किंतु कोटि
निश्चयत्वैककोट्यंशविषयताविशेष एवमन्यस्य इवं वक्तव्यत्वात् एवं च प्रत्यक्षानुमितिसाधारणो व्याप्यदर्शन
न्यतावच्छेदकः विरोधिव्याप्यदर्शनप्रतिबध्यतावच्छेदकोऽस्तीति अत्र च निश्चिनोमि अवधारयामीति प्रतीत्योः नु
मानविषयतया निश्चयत्वमेवावधारणत्वं अनभ्यासदशापन्नज्ञानाद्विशेषादर्शनकालीनज्ञानेः प्रामाण्यश
कानास्कंदनमेव विशेषः निश्चयत्वस्य वार्थसमाजग्रस्ततान्यवस्थापितेनेति नदीधितिकृतो निभाः इदं त्ववा
धेयं विरोधिज्ञानदशायामाहार्यज्ञानोपपत्तये यदिति तत्क्रमनाहार्यत्वप्रतिबध्यतावच्छेदककोटौ निवेश्यते न
दानस्याव्यवहितोत्तरत्वे घटितत्वया अव्यवहितोत्तरत्वस्य चात्रवानस्य इवं च तयाऽऽदश्याव्यक्तिसमसंख्यभेदानां निवेशा
नीयतया महागौरवं इच्छायाऽऽहार्यज्ञानसामग्रीघटकतानिर्वाहाय तस्यास्तद्धेतुताघटकत्वं चेति इच्छापात्रे जनक
त्वपक्षएव समुचितः तथा च नप्रत्यक्षाद्यादिसाधारणद्वौ प्रतिबंधकतैक्यसंभवः विरोधिज्ञानदशायां चा
लघुत्वादिप्रकारकेच्छाबलात् स्पर्शनादावन्यसानज्ञानीयप्रत्यक्षेच्छानां विशेष्ये तेजकतां स्वीकृत्य तत्तत्ज्ञानोप
प्रत्यक्षेष्वेकप्रतिबंधकतायाअवश्यकत्वात् तथा चानुमितिस्थले चक्षुरादिगोचरेच्छाविरहविशिष्टविरोधिनि
श्चयाभावत्वरूपगुरुधर्मावच्छेदेन कारणतायद्कस्य प्राह्योपमित्योः इच्छाविरहविशेषणविरोधिनिश्चयाभा
वकारणताद्वयस्य च कल्पनापेक्षया तद्भेदेन चाक्षुषेच्छात्वादिरूपलघुधर्मप्रवेशेनैव कारणतावच्छेदकस्य
इच्छाविशिष्टान्यबुद्धिसामान्ये विरोधिनिश्चयाभावस्यैव हेतुतायाः कल्पने लाघवमीत्यनेनदोः व्यवहितोत्तर
त्वसंबंधेन विरोधिनिश्चयानवच्छिन्नत्वमेव तत्प्रतिबध्यतावच्छेदकमंगीक्रियतां तथा सति दोषविशेषाजन्यत्वाद
प्यनिवेशनीयतया लाघवात् तथा चोभयव्याप्यवती निश्चयदशायां संशयानुमिते रूपगमेपि तादृशप्रतिबंध

गदा. काभावव्यभिचारानवकाशाद्विधिपरामर्शाभावाघटिताया एवानुमितिसामग्र्या अनुमित्युत्पादप्रयोजकत्वोपगमा
त् संशयानुमितिर्निष्प्रत्यूहैवेति एतेन वह्न्यभावव्याप्यवान्पर्वत इत्याकाअया अज्ञादिति निश्चयदशायां वह्निमान्
सत्प्र. वतो घटवानित्याद्यनुमितिवारणाय वह्न्यादिप्रकारकानुमितावपि तदभावव्याप्यवद्बुद्धेः प्रतिबन्धकत्वमावश्य
९८ कमिति न संशयानुमितिप्रसंगा इत्यपि निरस्तं तदभावव्याप्यवज्ज्ञाननिश्चयस्य तदभावव्याप्यवज्ज्ञाननिश्चयानव
च्छिन्नबुद्धिमात्रनिबन्धकत्वे फलानुरोधेन तद्विशिष्टपक्षकाद्यनुमितिसामग्र्यां तदभावव्याप्यवज्ज्ञाननिश्चयाभावा
७१ न्तर्भावेऽपि प्रयोजनविरहेण तद्विधेयकानुमितिसामग्र्यां तदन्तर्भावानुपगमात् मूले ऽन्वयाद्व्यतिरेकाद्वेति को
टिद्वयव्यावृत्तत्वज्ञानादित्यर्थः अव्यवस्थितविकल्पाय साधारण्यासाधारण्यभेदेन विरुद्धस्येत्यत्र सामानाधिकरण्यनू
पविरोधविवक्षणेऽवृत्तेऽपि विरुद्धरूपनयनस्य चापक्षधर्मस्य न साध्यविपरीतानुमितिः फलमित्यसंगतिरतो वि
रोधं दीधितिकृदाह साध्याभावव्याप्यस्येति अपक्षधर्मविरुद्धस्य प्रकृतपक्षे साध्यविपरीतानुमापकत्वासंभवे
पि न क्षतिः साध्यविपरीतानुमितौ प्रकृतपक्षकत्वाविवक्षणादित्याह मूले पक्षधर्मेपीति अन्यत्र प्रकृतप
क्षभिन्ने स्वाधिकरणे ह्रदो वह्निमान्धूमादित्यादौ ह्रदत्वादिहेतौ पक्षे साध्यविपरीतज्ञानसंभवेऽपि अविरुद्धप्र
मादेर्न तत्फलमिति नातिप्रसंगः यस्य तत्फलं स विरुद्ध एवेत्याह बाधकेति साध्याभावसाधकत्वाघटितहेतौ
लेऽप्यनयोक्तफलघटितविरुद्धलक्षणाभिप्रायकं निराकरोति नित्य इति ह्रदो नित्य इत्यभिधाने ऽकारप्रश्लेषे १३
ण नित्यत्वसाध्यकत्वभ्रमः स्यादिति प्रथमं साध्योत्कीर्तने असिद्ध इत्यादि व्यभिचारादिदोषचतुष्टयज्ञाना
स्यमात्राधीनं फलं न तज्ज्ञानानधीनं अलिङ्गवत्त्वज्ञाने असाधकत्वज्ञाने असिद्धिदोषस्य ज्ञानस्य फलमित्यर्थः
तथा च नाह्रदादोषवत्त्वमसिद्धहेत्वासलक्षणाकालितमिति भावः पक्षधर्महेतावित्यत्र हेतुपदस्य प्रकृत

प्रकारत्वत्तत्त्वावच्छिन्नविशेष्यकसाध्याभावसंशयस्याप्रसिद्धेः व्याप्तिं वित्थनिवेशो नानुगमाच्चेति अत्राहुः १
आधेयताविशेषणतापन्नस्याधिकरणस्यासंशयत्वनिरूपकविशेष्यतान्यविशेष्यतानिरूपितसाध्याभावप्र
कारताशालित्वं तन्निश्चयत्वे संशयत्वनिरूपिकाच विपरीतकोटिधर्मितावच्छेदकतापन्नधर्मावच्छिन्नायावि-
शेष्यताननुच्यत्वे च साध्याभाववद्वृत्तिर्धूम इत्यादिज्ञानीयधर्मितावच्छेदकानवच्छिन्नविशेष्यताभ्यामतिरिक्तैव
विशेष्यास्ततो निश्चयीयधर्मितावच्छेदकावच्छिन्नविशेष्यतायां तदन्यत्वमेव अधिकमन्यत्रानुसंधेयं शेषांशे
आधेयत्वांशे संशयसाधारणनिश्चयत्वविशेषणानवच्छिन्नं अन्यथा साध्याभावांशे निश्चयत्वानिवेशे संदिग्धाने
कांतिकतापत्तेः पक्षांशे साध्याभावसंशयात्मकपक्षवृत्तित्वावगाहि व्यभिचारज्ञानादनुमितिमात्रोच्छेदापत्तेः
साध्याभावसंशयाविषये हेतुमत्ताज्ञानस्याविरोधित्वे प्राचीनसंवादमाह यदाज्ञेति पक्षे संदिग्धसाध्यकप्रकृतध-
र्मिणि पक्षसमे संदिग्धसाध्यकधर्मिणि वे व्यभिचारो व्यभिचारग्रहः प्रतिबंधक इति शेषः व्याप्तिनिश्चये हेतुमति
पक्षादौ साध्याभावसंशयानवतारदशायां निश्चितायां व्याप्तेः स्मरणे व्यभिचारसंशयायोगादिति पक्षः साध्यवान्-
वा पक्षवृत्तिर्हेतुरिति विशृंखलविषयकज्ञानेन विरोधितावच्छेदकरूपाप्रकारकत्वात् किंतु साध्याभाववद्वृत्ति
त्वत्वावच्छिन्नप्रकारकज्ञानमेव तच्च व्याप्तिनिश्चयप्रतिबध्यमिति तस्योत्पत्त्यसंभवादित्यर्थः यत्र व्याप्तिग्रहकसहचार
दर्शनादिकाले याभेदज्ञानवचन हेतुमति साध्याभावसंशयआसीत्तत्र मन्मते पूर्वं व्याप्तेरनिश्चयेन पक्षे हेतुदर्शनदशायां
व्याप्तिस्मरणासंभवात् पक्षांते भावेन व्यभिचारसंशयसत्वात् प्रत्युतन्निश्चयस्यासंभवादनुमितिर्नस्यादित्यत्रे-
ष्टापत्तिमाह तदनिश्चयदशायां त्विति पूर्वं व्याप्त्यनिश्चयेपि पक्षे साध्यसंदेहदशायामनुकूलतर्कीचनाबेनं परिभूय
व्याप्तिनिश्चयः संभवति अनुकूलतर्कस्याविशेषदर्शनवत्संशयप्रतिबंधकतायामनुत्तेजकत्वादत आह अनुकूल-

गदा.

सत्प्र

१८

८०

तर्कोपस्थितोविति अस्फूर्तिरनवतारः अवगाहितयैवेत्येवकारेण निश्चयत्वस्य प्रतिबंधकतावच्छेदकघटत्वव्यवच्छे
दः तथाच साध्याभावांशे संशयात्मकमपि व्यभिचारज्ञानं प्रतिबंधकमिति भावः संशयायोगादित्युक्त्वादित्यनेन तु यस्मा
यन्नैव हेतुत्वं बोध्यं अत एव साध्याभावांशे संशयसाधारण्याव्यभिचारज्ञानस्य प्रतिबंधकत्वादेव पक्ष इत्यादि पा
ह्यो नित्यत्वातिरिक्तशब्दधर्मातिरिक्तशब्दधर्मातिरिक्तधर्मेवानित्यादय इत्यर्थः बाधप्रतिरोधयो
रनवतारेपि विप्रतिपत्तिदशायां शब्दे अनित्यत्वतद्व्याप्तिविशिष्टयोरनिश्चयेपि अप्रयोजकाः नित्यत्वाद्यसा
धकाः गीयंते तांत्रिकैरिति शेषः दाहानुकूलेत्यादयः वह्निर्दाहानुकूलादृष्टातीन्द्रियधर्मसमवायी दाहज
नकत्वादित्यादृष्टविशेषवदित्यादय इत्यर्थः भजनकपरात्र्यवह्निनिष्ठाद्भूततद्रूपमादायसिद्धसाधनवारणाय ॥
दाहानुकूलेतिग्रहष्टप्रयत्नवदात्मसंयोगमादायसिद्धसाधनवारणायातीन्द्रियेति अन्यथात्वादृशव्यभिचारज्ञा
नस्याप्रतिबंधकत्वे पक्षातिरिक्तसाध्यसंशयविषये सर्वत्र हेतुमति साध्यवत्तानिनिश्चयात् क्वापि हेतुमति सा
ध्याभावानिश्चयेन व्याप्तिग्रहस्य दुर्वारत्वात् एतेनाद्वितीयानुमानेव वह्निरूपपक्षातिरिक्ताकरतलानलसंयोगा
देर्दृष्टेर्दाहानुकूलातीन्द्रियधर्मानिश्चयेपि न दोषः पक्षविपक्षान्यतरत्वादिना एवं तत्र कृतान्यतरत्वेन उभय
विशेष्यकप्रमाविषयत्वादिना सर्वत्र पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ सत्प्रतिपक्षप्रसंगात् अनुमितिविरोधप्रसंगा
त् अनुमितिविरोधप्रसंगात् तादृशान्यतरत्वादेर्बाधकारणे क्वचिदपि वह्न्यादेर्वनिश्चये ग्राह्यसंशयस्याप्रतिबंध
कत्वमतेनाभिहितं अन्यथा उनयोर्ह्यांतरविशिष्टबुधो ग्राह्याभावज्ञानस्यैवाव्यभिचारबुद्धावपि व्यभिचारग्रहस्या
पि निश्चयत्वेनैव प्रतिबंधकतानिश्चयताया ग्राह्यवृषपकत्वापातात् संशयानंतरं संशयोदयात् ज्ञानत्वावच्छिन्नं प्र
तिज्ञानत्वेन प्रतिबंधकत्वासंभवात् निश्चयत्वं च तत्त्वप्रकारकसाध्याभावांशोपि निवेश्यं अधिकरणवृत्तित्वानिश्चया

७५

त्मकस्याधिकरणांशे साध्याभावद्रूपविशेषणसंशयस्यापि विशिष्टसंशयसामग्रीलतया विशिष्टाभावसंशयाविरोधि
त्वात् एवमप्यनुकूलतर्कविरहिणानुमानेनाप्रयोजकत्वमुपपद्यत एव व्यभिचारसंशयसामग्रीसत्वेन व्याप्ति-
निश्चयस्यासंभवात् निश्चयत्वघटकविपरीतकोट्यप्रकारकत्वं विपरीतकोटिभानप्रयोजकाभावस्य प्रयोजक
त्वात् अनुकूलतर्कस्य च विपरीतज्ञानविरोधितया तत्प्रयोजकसामग्रीविघटनेनैव व्याप्तिनिश्चयोपयोगितेत्यवधेयं ।
एकोपादाने एकमात्रवृत्तिसाध्यात्यन्ताभाववद्वृत्तित्वात्वादेः साधारण्यलक्षणत्वे अन्यतराव्याप्तिः साध्यवदन्यवृत्ति-
त्वादावव्याप्तिः एतद्ज्ञानान्योन्यात्यन्ताभावगर्भव्याप्तेरुपस्थितावनुमितिप्रयोजकत्वमतेनाकाभावघटितव्याप्तेरेव तथात्वे
अपराभावघटितव्यभिचारस्य व्यभिचारांतरेऽव्यापकतयैव विरोधितया हेत्वाभासत्वविरहात् साध्यवज्ज्ञानेतित-
द्धर्मितावच्छेदकावच्छिन्ने यद्रूपविशिष्टप्रकारकनिश्चयत्वं साध्यतावच्छेदकावच्छिन्नसाध्यवत्ताज्ञानप्रतिबंधक
तावच्छेदकं तद्रूपावच्छिन्नत्वेन साध्यतद्वदन्यतरान्योन्याभावावच्छिन्नमप्यतादृशविशिष्टवद्वृत्तित्वं साधारण्यमित्यत्रा-
व्यापीत्यर्थः तादृशाभाववत्त्वस्य साध्यसाध्यतद्वदन्योन्यात्यन्ताभावभाववत्त्वस्य एतत्सर्वसमानप्रकारकज्ञानस्यापि
प्रतिबंधकतायेन अन्यथा साध्याभाववद्वृत्तिहेतुरित्यादिज्ञाने हेतुमति साध्याभाव इत्यादिज्ञानस्य समानप्रकार-
कत्वेनाविरोधितया तद्विषयस्यानुमितौ तज्ज्ञानकज्ञाने वा साक्षादविरोधितया हेत्वाभासताभावेन साधारण्यरूपताऽनु-
पपत्तेः साध्यतद्वदादौ साध्यतावच्छेदकविशिष्टतदवच्छिन्नादौ आदिपदात् साध्यतावच्छेदकतदवच्छिन्नपरिग्रहः
प्रतियोगितादेरित्यादिना तदवच्छेदकत्वपरिग्रहः प्रकृते निर्विशिष्टसाध्यविशिष्टसाधनसामानाधिकरण्य-
ग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयिताशून्यनिश्चयनिष्ठविषयितायां निरूपितत्वसंबंधे-
न विशेषणीभूयात्वयव्याप्तिग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वेनेत्यर्थः तादृशप्रतिबंध

गदा०

सव्यभि०

२९

का

कतावच्छेदकीभूततथाविधनिरूप्यवृत्तित्वविशिष्टत्वनिरूपितविषयिताकत्वमितियावत् अन्वयव्याप्तिनिवेशान्न व्य-
तिरेकव्याप्तिग्रहविरोधिन्यनुपसंहारित्वेनातिव्याप्तिः अन्वयव्याप्तिश्च स्वव्यापकसाध्यसामानाधिकरण्यं तत्र प्रसिद्धावपि
तद्घटकपदार्थानां परस्परोपश्लेषावगाहिज्ञाननिवेशान्नानुपपत्तिः असमानप्रकारकत्वे हेत्वादिधर्मिकसाध्याभावसामा-
नाधिकरण्यादिज्ञानमपि तादृशव्याप्तिधीविरोध्येवेति न तत्संग्रहः तस्मात्तद्विरोधित्वे व्यापकसामानाधिकरण्यसाध्याभा-
वासामानाधिकरण्याद्यवगाहिसमूहालंबनात्मज्ञानविरोधित्वमेव विवेचनीयं तावद्व्याप्तिग्रहस्य व्यभिचारधीप्रतिबध्यता-
यां स्वरूपसंबंधरूपावच्छेदकत्वविरहेपि न क्षतिः अनतिरिक्तवृत्तित्वरूपावच्छेदकताया एव लक्षणीयत्वात् साध्यसामाना-
धिकरण्यग्रहत्वावच्छिन्नप्रतिबंधकत्वशरीरेपि तादृशयेवावच्छेदकत्वं निवेशनीयं अतः साध्याप्रसिद्ध्यादिग्रहस्य वि-
शिष्टसाध्यग्रहत्वावच्छिन्नं प्रत्येव प्रतिबंधकत्वेपि न तस्याविरोधित्वं तथात्वे तन्नानुपपत्तिः शेषं पूर्ववत् साध्याप्रसिध्या-
दीनां साध्यनिष्ठावृत्तित्वस्य व्याप्यत्वासिद्धिविशेषस्य साधनाप्रसिद्धेः साधननिष्ठावृत्तित्वस्य स्वरूपासिद्धिभेदस्य सा-
ध्यसाधनयोः परस्परसामानाधिकरण्यविरोधात्मकासाधारण्यरूपस्य वा परिग्रहः विशिष्टसाध्याद्युपादानस्य यथा-
यथं साध्याप्रसिध्यादिवारणप्रयोजकत्वं बोध्यं धूमवान्धूमाभाववद्वृत्तिवह्नेरित्यादौ धूमाभाववद्वृत्तित्वादिकमसिद्धे-
व न तु साधारणमनोन तत्संग्रहः सतिमात्रं वृत्तिसाध्याभाववद्वृत्तित्वाद्यवगाहिसमूहालंबनव्याप्तिग्रहनिवेशपक्षे सा-
ध्यादेरत्यंताभावाप्रतियोगित्वादिकमनुपसंहारित्वं साध्यादावत्यंताभावप्रतियोगित्वादिग्रहाविरोधित्वविशेषणं प्रति- ३०
प्रवारणीयं नान्यतरगर्भव्याप्तिग्रहविरोधित्वामिति ग्राह्याभावानवगाहित्वेन मणिमंत्रादिन्यायेन विरोधित्वे मानाभावा-
दिपवः सामानाधिकरण्यघटितत्वेन अनुमितिजनकतावच्छेदकीभूतहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसा-
नाधिकरण्यप्रकारतात्वरूपसाधारणधर्मेण अन्वयव्याप्तयः अन्वयव्याप्तिप्रकारतान्योन्यात्यंताभावकूटव्यापकता

वच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यतत्तदभावघटितव्यभिचाराभावविशिष्टसाध्यसामानाधिकरण्यप्र
करतारूपतियावत् अनुगमनीयाः प्रतिबध्यग्रहविशेषणतया निवेशनीयाः यत्तु नैकाभावघटितव्याप्त्यग्रहानेक
न्यघटितव्यभिचारासंग्रहस्यावकाश इति दोषः यथाश्रुतग्रंथलभ्यो विवयोऽनुगमो नोपादेयः गौरवात् व्यभिचाविशि
ष्टहेतुव्यापकसाध्यसामानाधिकरण्यरूपविशिष्टव्याप्यप्रसिद्धेश्चानेनउक्तरूपेणानानाविधव्याप्तिविषयतानामनु
गमेऽसंभवः एकाभावघटितव्यभिचारज्ञानप्रतिबध्यतायानिरुक्तप्रकारताशालिग्रहत्वव्यापकत्वासंभवात्
सामानाधिकरण्यानवगाहिव्यापकत्वादिज्ञानस्यापि व्यभिचारज्ञानप्रतिबध्यतया सामानाधिकरण्यविषय-
तायाः स्वरूपसंबंधरूपतदवच्छेदकतानाश्रयत्वेन ताद्दृशप्रकारताशालिग्रहत्वेऽनतिरिक्तवृत्तितारूपायाः
प्रतिबध्यतावच्छेदकतायाएवनिवेशनीयत्वात् यदि च स्वरूपसंबंधरूपप्रतिबध्यतावच्छेदकताघटितं साध्य
सामानाधिकरण्यविषयताघटितधर्मावच्छिन्नानुमितिकारणतावच्छेदकत्वोपलक्षितविषयतावच्छिन्नप्रति-
बध्यतानिरूपितप्रतिबंधकतावच्छेदकस्वविषयिताकत्वं विवक्ष्यते तदापि तद्धर्मत्वविषयत्वावच्छिन्नधीविरो
धिन्यांस्वरूपासिद्धावतिव्याप्तिः हेतुपक्षोभयवैशिष्ट्यविषयताबहिर्भूततत्त्वस्यजनकतावच्छेदकविषयतायांनिवे
शेप्रयासाधिक्यमित्यनतात्कल्पंपरित्यज्य समूहालंबनव्याप्तिधीविरोधित्वेन सकलव्यभिचारान्संगृह्णा
ति प्रातिस्विकरूपेणेति तत्तद्व्याप्तित्वेनेत्यर्थः तथा च समूहालंबनतावद्व्याप्तिबुद्धौ सकलव्यभिचारधीयो
विरोधित्वात् सर्वत्रलक्षणसमन्वय इति भावः ननु साध्याप्रसिद्धौ साधनाप्रसिद्धिवारणानुरोधेन विशिष्टसाध्यसा-
धनग्रहाविरोधित्वमेवास्तुविरो धानतिप्रसंगस्यसामानाधिकरण्याविषयकतावदव्यभिचारावगाहिज्ञानोपाद
१६५ नेनैवसंभवादित्यतआह साध्येति तथा चाव्यभिचारितसामानाधिकरण्याभावस्यसाधारण्यांतर्गतस्यसंग्रहः

गदा.

सत्ता

२०
४५

यत्सामानाधिकरण्यविषयकज्ञानमेवोपादेयं एवंच विरोधान्न व्याप्तिकारणयैव तावत्पर्यंतं सार्थकमिति भावः।
अव्यभिचारविशिष्टसामानाधिकरण्यरूपव्याप्तेः याभानविरोधितितद्विरहेप्यनतिव्याप्तिलक्षणोपगमेन परिहरति सा
ध्येति पाठांतरं व्याप्ये प्रसिद्धस्येत्यनेन वह्निव्यापकधूमसामानाधिकरण्यादिरूपव्याप्तेरप्रसिध्याव ह्न्यादिनिष्ठ
तदभावेऽप्रसिद्धतयानतिव्याप्ति प्रसक्तिरिति सूचितं एतद्विशेषः साधारण्यविशेषः व्याप्यत्वासिद्धिस्तु सा
ध्याप्रसिध्यादिरेवेति भावः अथव्याप्तिश्चेत् साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा तत्सा
ध्याभाववदवृत्तित्वे व्याप्तिज्ञानस्य हेतुतावच्छेदकावच्छिन्नांशेऽव्यभिचारप्रकारकत्वेन तदवच्छिन्नधर्मि
कव्यभिचारसाध्यसामानाधिकरण्यरूपदलद्वयस्य व्याप्तित्वे हेतौ तदुभयप्रकारकज्ञाने प्रकारतावच्छेदकप्रत्येक
धर्मावच्छिन्नाभावप्रकारज्ञानस्यैव प्रतिबंधकतया पक्षविशिष्टपराभावस्य दोषत्वानुपपत्तिरिति चेन्न यतोऽत्रोभ
याभावएव विशिष्टाभावपदेन विवक्षितः हेतुविशेषणतापन्नाव्यभिचारसामानाधिकरण्योभयमेव व्याप्तिः
उभयाभावज्ञानस्य च उभयत्वप्रकारकत्वमनिवेश्योभयप्रकारतानिरूपितैकविशेष्यताप्रतिबध्यतावच्छेदि
कोच्यते लाघवात्तथा चोभयत्वाप्रकारकेपि युगपत्ताद्दृशोभयविशेषितहेतुज्ञाने व्यभिचारादिरूपप्रत्ये
काभावज्ञानमिव तदुभयाभावज्ञानमपि प्रतिबंधकमिति प्रत्येकाभाववदुभयाभावस्यापि दोषत्वमुपपद्यत
इति विशिष्टव्याप्तेरुपादाने सामानाधिकरण्यांशनिवेशप्रयोजनविरहः व्यापकतांशमात्रोपादानेनैव सकल १७
साधारणसंग्रहसंभवात् तथा चाव्यभिचारितसामानाधिकरण्याभावस्तु व्याप्यत्वासिद्धिरेव साध्यसाधनसामा
नाधिकरण्यग्रहाविरोधित्व पर्यंततानिवेशेपि च न विरोधान्निव्याप्तिरित्याशयेनाह विशिष्टेति साध्यतावच्छेदकादिवि
शिष्टेत्यर्थः आदिपदग्राह्यसाधनतावच्छेदकावैशिष्ट्यं साधनविशेषणं बोध्यं वस्तुतः साधनपदमेव साधन

ज्ञानसंवलनदशायां पक्षे साध्यं साध्याभाववान्वेति कोटिविशेष्यकसंशयरूपानानुमितिप्रत्येकमेवेत्यनेनतावत्स-
मुदायत्वस्य सत्प्रतिपक्षत्वदोषविभाजकतासंभवोदर्शितः नन्वप्रत्येकरूपस्याव्याप्त्याविभाजकत्वासंभवात्सर्व
साधारणं किमेतद्दोषविभाजकमित्याकांक्षायां तादृशरूपमाह विभाजकं त्विति सर्वत्र प्रकृतेति पक्षसाध्ययोर्द्वयो
द्वयोरेवान्वेति प्रकृतपक्षतावच्छेदकावच्छिन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितित्वव्यापकप्रति
बध्यतानिरूपितप्रतिबंधकतावच्छेदिका सती विशिष्टपक्षविशिष्टसाध्यग्रहत्वव्यापकप्रतिवध्यतानिरूपितप्रति
बंधकतानवच्छेदकानिरुक्तपक्षसाध्यवैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकविषयतावच्छिन्नानुमितिजनकतावच्छेदिका
यादृशविशिष्टनिरूपितविषयिता तादृशत्वमित्यर्थः तादृशी च वह्न्यभावव्याप्यविशिष्टह्रदादिनिरूपिता विषयते-
ति तल्लक्षणसमन्वयः साध्याभावव्याप्यविशिष्टपक्षविषयतायाः साध्यानुमितिप्रतिबंधकतावच्छेदकतया तद्वद-
नुमितिजनकतावच्छेदकविषयताके साध्याभावव्याप्यवत्पक्षादावतिव्याप्तिवारकतया सत्यंतं सार्थकमिष्यते तत्र नि
रुक्तवैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकविषयताकत्वरूपविरोधित्वं तार्थ्यस्य उन्नायकविषयविशेषणत्वे विषयता
भागस्य द्विधानिवेशने गौरवात् उन्नायकतावटकविषयतायामेव प्रतिबंधकतावच्छेदकत्वविशेषणं दत्तं पक्षता-
यवच्छेदकवैशिष्ट्यानिवेशाव्यावृत्तिः पूर्ववत् उक्तप्रकारताशालिग्रहनिरूपितप्रतिबंधकतामात्रनिवेशे साध्याभा-
वव्याप्यव्याप्यवत्ताज्ञानस्यापि समूहालंबनसाध्यवत्ताग्रहरूपसाध्याभावव्याप्याभावादिमत्वग्रहप्रतिबंधकतया
नोपदर्शिते सत्प्रतिपक्षेऽन्नायकव्यावृत्तिरिति तादृशप्रकारताकानुमितित्वव्यापकप्रतिवध्यतानिरूपितप्रतिबंध-
कतानिवेशः तादृशप्रकारताशालिदोषविशेषजन्यमाहार्यज्ञानं ज्ञाप्रति साध्याभावव्याप्यवज्ज्ञानस्याप्रतिबंधक
तया सत्प्रतिपक्षस्यैवाथग्रहः इति ज्ञानत्वमपेह्यानुमितित्वनिवेशः ह्रदः कांचनमयवह्निमान् कांचनमयह्रदो वह्नि-

सत्र० २१ ४३

मानित्यादौ संग्राह्यस्य वह्न्यभावव्याप्यविशिष्टह्रदादेर्ज्ञाने प्रतिबध्यतावच्छेदककोटौ साध्यतावच्छेदकादिघटककाञ्
चनमयत्वादिविषयताया अनिवेशात्तद्घटितं पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यग्रहत्वं नोक्त
ज्ञाने प्रतिबध्यतावच्छेदकमित्यव्याप्तिः स्यादतः स्वरूपमवच्छिन्नत्वं परित्यज्य व्यापकत्वं प्रतिबध्यताविशेषणम् अत
एवोक्तस्थले आश्रयासिद्ध्याद्यव्यापको विशिष्टपक्षग्रहत्वादिमात्रावच्छिन्नविरोधिन्यविशिष्टपक्षसाध्यवैशिष्ट्या
विषयकानुमितित्वव्यापकप्रतिबध्यतान्याघटितविरोधिताशालिनि काञ्चनमयत्वाभावव्याप्यविशिष्टह्रदादौ सत्त्वं तद
लस्यानिरुक्तसाध्यपक्षवैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकानुमितिजनकतावच्छेदकविषयिताकत्वरूपतादृशविरोधित्वाय
कत्वस्य च सत्त्वेनातिव्याप्तिः स्यादिति अन्ये येऽविरोधित्वं तद्विशेषणं एतच्च संगृह्यत इत्यादिना स्वयमेव वक्ष्यते अन्ये यत्तया प्रवि
ष्टविषयेऽविरोधित्वविशेषणं यथाश्रुतपाठलभ्यं तदर्थस्तादृशप्रतिबंधकतावच्छेदकविषयिताकान्यत्वं तन्निवेश
दोषकविषयतानिवेशान्नोक्तकांचनमयो ह्रदो वह्निमानित्यादौ काञ्चनपदत्वाभाववद्ह्रदादिरूपाश्रयासिद्धिभेदस्य
सत्प्रतिपक्षदोषोन्नेयवह्न्यभावविशिष्टह्रदादिरूपबाधेः सत्त्वेनाव्याप्तिश्चेति उन्नायकताघटकबाधविषयितायां
विशिष्टपक्षादिग्रहप्रतिबंधकतानवच्छेदकत्वनिवेशः उक्तस्थले बाधग्रहस्यापि अनुमितिरूपविशिष्टपक्षादिरू
पग्रहाविरोधितया अव्याप्तिर्न वदव्याप्तिनि विशिष्टपक्षग्रहत्वव्यापकत्वनिवेशः विशिष्टपक्षग्रहत्वपर्याप्त्यवच्छे
दकताकत्वस्य प्रतिबध्यतायां निवेशो काञ्चनमयरजतमयह्रदो वह्निमानित्यादौ आश्रयासिद्ध्याद्युन्नायके काञ्चनम
यत्वाभावव्याप्यवद्ह्रदादावतिव्याप्ती रजतमयत्वघटितपक्षतावच्छेदकविशिष्टग्रहत्वस्य तज्ज्ञानप्रतिबध्यतानवच्छेद
कत्वादतस्तदुपेक्षया तादृशग्रहत्वव्यापकतायास्तत्र निवेशः अत एव ह्रदो वह्निमानित्यादौ ह्रदत्वादिरूपपक्षताव
च्छेदकविशिष्टविषयकग्रहत्वस्य केवलस्य कस्यापि प्रतिबध्यतानवच्छेदकत्वेऽपि नाप्रसिद्धिः न च तादृशग्रहत्वव्या ३१

पकप्रतिबध्यतानिवेशेकस्याश्रयविरोधिज्ञानप्रतिबध्यतायाह्रदइत्यादिनिर्धर्मितावच्छेदकज्ञानसाधारणता
दृशग्रहत्वव्यापकत्वासंभवात्तथाविधप्रतिबध्यत्वाप्रसिद्धेः विशिष्टविषयकानुमितित्वव्यापकता निवे-
शेतादृशानुमितित्वस्यनिर्धर्मितावच्छेदकज्ञानव्यावृत्तत्वेपि ह्रदोवह्निमान् ह्रदोघटवानित्यादिनानाप्रकारका
नुमितिष्वेव ह्रदत्वादिविशिष्टविषयकानुमितित्वसत्वात्तादृशसकलानुमितीनां कस्यचिज्ज्ञानप्रतिबध्यत्वासं
भवेन तादृशानुमितित्वव्यापकप्रतिबध्यतानसिध्यतीति वाच्यम् कामिनीजिज्ञासादिप्रतिबध्यतायाएवतथा
विधानुमितित्वादिव्यापिकायाः प्रसिद्धेः वस्तुतस्तु विरोधिताघटकप्रतिबध्यतायामेवपक्षतावच्छेदकादिविशि-
ष्टविषयकानुमितित्वाव्यापकत्वनिवेशान्नाप्रसिद्धिरिति पूर्वमेवावेदितं एतेन कामिनीत्वस्य यत्र पक्षतावच्छे
दकता तत्र तद्विशिष्टविषयकानुमितित्वादेः कामिनीजिज्ञासाप्रतिबध्यत्वाव्याप्यत्वेपि न क्षतिः अथोक्तेयेविशि-
ष्टपक्षादिग्रहाविरोधित्वनिवेशेपि वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्निमानित्यत्र वह्न्यभावव्याप्य-
विशिष्टह्रदे आश्रयासिद्ध्यात्मकेऽतिव्याप्तिर्दुर्वारैव तस्य वह्न्यभावव्याप्यविशिष्टह्रदात्मकसत्प्रतिपक्षस्य विशि
ष्टपक्षग्रहाविरोधित्वेऽप्यनुमापकत्वात् आश्रयासिद्धित्वेनानुमितिविरोधितया तावत्तद्दलाक्रान्तत्वाच्च न चोन्नाय
कपक्षाविरोधित्वं न विशेषणं विवक्षितं उक्ताश्रयासिद्धेश्च विशिष्टपक्षग्रहविरोधितया नातिव्याप्तिरिति वाच्यम् ।
तथा सति वह्निमान् ह्रदो वह्न्यभावव्याप्यव्याप्याभाववानित्यत्र वह्न्यभावव्याप्यविशिष्टह्रदात्मकबाधेऽनु
मितिविरोधिवह्न्यभावव्याप्यविशिष्टह्रदरूपाश्रयासिद्ध्युन्नायकेऽतिव्याप्तेः तस्य वह्निविशिष्टह्रदात्मकविशि-
ष्टपक्षग्रहाविरोधित्वेऽनुमापके चाविरोधित्वं तस्य विशेषणतोपगमे नातिप्रसंगस्य वारणीयत्वात् अथवोन्नाये-
विशेषणमेवाविरोधित्वं तद्धर्मावच्छिन्नप्रतिबध्यताघटितविरोधित्वं सत्यं तार्थः तद्धर्मावच्छिन्नप्रतिबध्यताघ

गदा० टितविरोधितायाउन्नेयविशेषणतयाविवक्षितत्वात् पूर्वोक्तस्थलेचवह्न्यभावव्याप्यव्याप्यविशिष्टह्रदात्मकाश्र-
यासिद्धेर्विशिष्टपक्षग्रहत्वावच्छिन्नविरोधित्वेनसत्वेतदाक्रांततायास्तद्रूपावच्छिन्नाविरोधिनः सत्प्रतिपक्षस्ये-
वोन्नायकत्वेनातिव्याप्तिः उन्नेयबाधस्यउन्नायकसत्प्रतिपक्षस्यापिविशिष्टपक्षसाध्यवैशिष्ट्यग्रहत्वरूपैकधर्मावच्छि-
न्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयताकत्वेनसत्वेतदाक्रांततायास्तद्रूपावच्छिन्नाविरोधिनः
सत्प्रतिपक्षस्येवोन्नायकत्वेननातिव्याप्तिः उन्नेयबाधस्यउन्नायकसत्प्रतिपक्षस्यचविशिष्टपक्षसाध्यवैशिष्ट्यग्रह-
त्वरूपैकधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकविषयताकत्वेनसत्प्रतिपक्षेलक्षणसमन्वयइतिचेपिविरो-
धंतविशेषणंवह्निव्याप्याभावसाध्यकेवह्निव्याप्याभावसाध्यकेवह्निव्याप्यवत्पक्षात्मकबाधस्यविशिष्टपक्षादि-
ग्रहाविरोधिवह्निमत्पक्षेन्नायकस्यवारकमितिवस्तुतस्तुतत्रयथाश्रुतंविरोध्युन्नायकत्वंप्रतिबंधकतावच्छेदक-
विषयितायास्तन्निरूपितविषयितात्वेननिवेशनेशिरोवेष्टनेननासिकास्पर्शमनुकरोतीतिप्रतिबंधकतावच्छेदकावि-
षयतावच्छिन्नानुमितिप्रयोजकत्वंनिवेशनीयं उक्तस्थलेवह्निव्याप्यवत्पर्वतरूपबाधस्यवह्निमत्पर्वतविषयकस-
मूहालंबनरूपवह्निव्याप्यवत्पर्वतरूपविशिष्टपक्षादिग्रहाविरोधिविषयकानुमितिप्रयोजकतयाऽतिप्रसंगः ३७
स्यादितिविरोधिविषयतावच्छिन्ननिरूपितप्रयोजकत्वंनिवेशितम् अनुमितिजनकत्वरूपमुन्नायकत्वंनविषयस्ये-
तिअनुमितिजनकतावच्छेदकविषयिताकत्वरूपमनुमितिप्रयोजकत्वमेवात्रतदित्याह उन्नायकत्वंचेतिपारपावि-
शिष्टविषयकत्वेनेति तृतीयार्थः नतिरिक्तवृत्तित्वमवच्छेदकत्वेनन्निवेशाद्वह्निव्याप्यवत्पर्वतरूपोस्थलेपबाधे-
सत्प्रतिपक्षविषयकसमूहालंबनविषयेनातिव्याप्तिः स्वरूपसंबंधरूपावच्छेदकत्वानिवेशेनसत्प्रतिपक्षैकदे-
शेकेवलपक्षादौचनातिव्याप्तिः स्वरूपसंबंधरूपावच्छेदकत्वानिवेशेनसत्प्रतिपक्षैकदेशेकेवलपक्षादौचना

सत्प्र
22
84

तिव्याप्तिः तच्चेति तादृशविशिष्टं चेत्यर्थः साध्यव्यापकाभावप्रतियोगिप्रकृतहेतुमत्पक्षादौ मतभेदेन विरोध
साधारण्यरूपेः तिव्याप्तिं वारयति असाधारणेति प्रतिपक्षविषयेति अनुमितिप्रतिबंधकसाध्याभावव्याप्यव
त्ताज्ञानविषयेत्यर्थः सपक्षविपक्षव्यावृत्तत्वमसाधारण्यं साध्यासामानाधिकरण्यं विरोध इति मतेः अनुमित्य
विरोधिनि तत्र नोक्तलक्षणानि व्याप्तिमुक्तैवतः पक्षरूपत्वं प्रतियोगित्वादस्यादिनापक्षधर्मतापरिग्रहः तथा च
प्रकृतपक्षतावच्छेदकविशिष्टव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाधनतावच्छेदकावच्छिन्नवैशिष्ट्यान
वगाहिपरामर्शनिष्ठानुमितिजनकतावच्छेदकविषयिताकत्वरूपमुन्नायकत्वविवक्षणीयमित्यतैमित्यर्थः
रूपांतरेणाय च प्रकृतहेतौ व्यतिरेकिप्रतिहेतुमानतस्थलीयप्रतिपक्षसंग्रहाय प्रकृतसाधनतावच्छेदकनिवेशात् रू
पांतरावच्छिन्नसाध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टप्रकृतहेतुमत्पक्षकालीनत्वस्यापन्नप्रकृतसाध्य
तावच्छेदकघटकात्वत तस्थलीयतादृशसाध्यवच्छेदकविशिष्टसाध्याभावव्याप्यवत्पक्षात्मकप्रतिपक्षसंग्रहाय
प्रकृतसाध्यतावच्छेदकानिवेशः यत्र प्रकृतसाध्यव्यापकीभूतभावप्रतियोगित्वविशिष्टप्रकृष्टसाधनवत्वेन रू
पांतरावच्छिन्नपक्षतावच्छेदकप्रवेशात्तत्रत्यप्रतिपक्षस्यतादृशपक्षतावच्छेदकविशिष्टेसाध्याभावव्याप्यवत्ता
रूपस्य संग्रहाय प्रकृतपक्षतावच्छेदकनिवेशः साध्याभावनिरूपितान्वयव्याप्तिविशिष्टप्रकृतहेतुमत्पक्ष
लत्वं पतोऽपगमान्नतत्रातिव्याप्तिः तस्या साधारण्यमात्रात्मकत्वेन तदनवगाहित्वमपि परामर्शे विशेषणं देयं तत्संग्रा
हकमप्यादिपदं सत्प्रतिपक्षोऽत्रापकसेति साध्याभावव्याप्यव्याप्यवत्पक्षादेरविरोधितया नानाभासरूपस्येत्यर्थः
आश्रयासिद्ध्याद्युत्थापकस्येति आश्रयासिद्ध्याद्यंतर्गतस्य पक्षविशेषणाद्यभावव्याप्यवत्पक्षादेरित्यर्थः आश्रय
सिद्ध्यादीत्यादिपदात् साध्याप्रसिद्ध्यादिपरिग्रहः वह्न्यादिसाधकबाधस्याकिंचिदनुन्नायकतया अन्वेपे विरोधे

गदा० तविशेषणस्यग्रहः वह्न्यादिसाध्यकबाधस्य किंचिदन्यत्वव्यापकतयाऽन्येपि विरोध्यंतविशेषणस्य तद्धारकतानसंभवती
सत्य तिबाधविशेषतस्याहृतिंदर्शप्रतिविरोध्यंतेनेति वह्निव्याप्यवत्त्वात्मकस्येत्यनेन वह्निमत्त्वलोन्यापकत्वं स्फुचि
तं अविरोध्यंतस्यार्थकयायप्रतिबध्यतायाः स्वरूपसंबंधरूपसाध्यवैशिष्ट्यावगाहित्वावच्छिन्नत्वनिवेशेण संभवंद
२३ र्शयति संशृस्यजाइतिअनेनलक्षणेन प्रतिस्थापनात्मकत्वापप्रयोगानोचित्यंदर्शयिष्यन्तस्येवसत्प्रदापिकता
माह सत्प्रतिपक्षेचेति यथासिद्धांतमितिनैयायिकादिप्रतिवादिनांस्वसिद्धांतानुसारेणेत्यर्थः पंचावयवादीति
हृदोनवह्निमान् कृदत्वादित्यादिरूपेत्यादिः आदिनामीमांसकतौगतसिद्धत्र्यवयवद्व्यवयवन्यायपरिग्रहः दृष्टे
तीति संप्रदापिकारइतिशेषः अवितंप्रतिभातीतिवादिनाप्रायेणयकेहेतुदोषमात्रस्यैवाकांक्षितत्वात्प्रथमतस्तमन्त्र
ज्ञाव्याविपरीतप्रतिज्ञादिप्रयोगेअर्थांतरस्यदुर्वारत्वादितिभावः इतिसत्प्रतिपक्षरहस्यं स्थलेऽधिकबलत्वाज्ज्ञानदृ
तिअधिकबलत्वस्यज्ञानेयस्मादितिव्युत् प्रत्याअधिकबलत्वाभावइत्यर्थः अधिकबलत्वंचप्रबंधोपष्टिकानि
श्चितप्रामाण्यकत्वरूपविशेषणावच्छिन्नत्वेबाधाभावात् बाधकत्वाभावात्प्रतिबंधकत्वाभावादितियावत्
तथाचनिरुक्तविषयकत्वस्याप्रतिबंधकसाधारणतयाननस्यदोषत्वमितिभावः साध्याभाववत्त्ववृत्तित्वमि
तिसाध्याभावप्रमेतिरत्नाहृषाबाधज्ञानस्यप्रमात्वविषयकतानियमेनप्रतिबंधकताध्रौव्यादितिभावः प्रमा रा
त्वंचनसाध्याभाववत् विशेष्यकत्वेपर्वतोकृदइत्यत्रनवह्निमानित्यादिज्ञानविषयसाध्याभावमादायपर्वतादि
पक्षकेबाधप्रसंगात् किंतुसाध्यवद्विशेष्यकत्वेपक्षतावच्छेदकावच्छिन्नांशेसाध्याभाववत्त्वानवगाहित्वेविरो
ध्यविषयकत्वेनप्रतिबंधकत्वेविवक्षितत्वादंशेसाध्याभाववत्त्वघटितंलक्षणमाह प्रमितेतिप्रमितत्वंस्वविशे
ष्यकप्रमाप्रकारत्वंस्वंपक्षः प्रमात्वंसर्वंवत्सिद्धांतेमनेविषयतायानस्यप्रकारकत्वंअपितुज्ञानस्यैवातःप

त्वनिष्ठप्रमाविषयत्वप्रकारत्वस्याभावविशेषणतया निवेशनं विरुद्धं न च विशेष्यतारूपविषयतायां प्रका
रतानिरूपकत्वसत्त्वात् द्विविषयतानिरूपितप्रकारतारूपस्य विषयताप्रकारत्वस्याभाववृत्तित्वान्न विरोध इ
ति वाच्यं कार्यत्वकारणत्वयोरिव विशेषणविषयत्वयोर्निरूप्यनिरूपकभावसंबन्धसत्त्वेऽपि कार्यतायाः
कारणमित्याद्यव्यवहारेण तादृशनिरूप्यनिरूपकभावस्य घटकसंबन्धतानिरूहात् षष्ठीतत्पुरुषप्रतिपन्नविष
यताप्रकारस्य एकत्वेनोक्तार्थाप्रतिपादनात् सविषयकत्वे नास्तीति विषयतारूपप्रकारताया यादृशः संबन्धस्ता
दृशस्यैव घटकसूत्रार्थत्वात् प्रकारताया यत्तादृशसंबन्धस्य विषयतायां सविषयकत्वव्यवहारविरोधसत्त्वात्तथा विव
क्षितत्वमप्यावश्यकत्वात् अतः प्रकारत्वं विषयताया एव न तु ज्ञानस्य प्रकारताया विषयतानात्मकप्रतियोगितावच्छेद
कतात्वस्यावच्छेदकताविशेषरूपत्वादित्यतिरिक्तविषयतावादैकदेशिमताभिप्रायकतया विषयताप्रकारत्वप
र्यन्तनिवेशनं संगमयन्ते दीधितौ अनतिरिक्तेति पक्षे साध्याभावः पक्षनिष्ठाभावप्रतियोगि साध्यमित्यादिप्रमा
यां साध्याभावप्रकारकविषयतायाः पक्षे सत्त्वाच्चादृशज्ञानमादाय लक्षणसंगमनं तद्दर्शयति पक्षवृत्तिज्ञाने
पक्षनिष्ठविषयत्वस्य प्रकार इति तादृशज्ञानीयाया एव निष्ठविषयतानात्तन्निरूपितप्रकारताश्रय इत्यर्थः
एतेन पक्षनिष्ठत्वादिकं नाभावादेर्विशेषणं किन्तु विषयत्वादेः प्रकाराभाव इति न षष्ठीतत्पुरुषः किंत्वकर्म
धारय इत्यादिकमपि प्रत्युक्तं साध्याभावप्रमेवेत्येवकारोऽस्य पक्षादेर्दोषघटकत्वव्यवच्छेदः तत्तानसंभवात्प
क्षादिविषयत्वस्य प्रतिबन्धकतापयोगित्वात्तो हेतुतत्त्वं बन्धमात्रव्यवच्छेदकतामाविष्कर्तुं तद्विषयकस्य प्रतिब
न्धकताकत्वाद्युपयोगित्वं तद्व्यवच्छेदहेतुमाह हेत्वादीति एवं च साध्याभावप्रमायां साध्याभावप्रमाविषयत्वा
दिरूपविशेषणविशिष्टपरमित्यवधेयं मूले साध्याभाववति पक्षे साध्याभाववत्त्वेन ज्ञायमाने पक्षे तेन साध्याभावप्र

गदा० माविषयपक्षकत्वादिरूपदर्शितबाधेपक्षांशे प्रमाविषयत्वमेव निविष्टं न तु साध्याभाववत्त्वमिति उक्तज्ञाने दर्‌
ष्टाया हेतुसाध्याभावयोः सामानाधिकरण्यरूपव्यभिचारधियो नावच्छेदकतेति कथमप्रमात्वेपक्षत्वादिशंकां नि
राकरोति दीधितौ साध्याभावेति साभाववत्त्वग्रहस्यावच्छेदकत्वाभिप्रायेणेति न त्विति तत्प्रकारकत्वरूपस्य तत्प्र
80 मात्वस्य धर्मिणि तद्वत्त्वघटितत्वादिति भावः न तु प्रमात्वघटकतया साध्याभाववत्त्वेन धर्मिणोभानेपि न व्यभिचारबुद्धे
एवच्छेदकता येन रूपेण हेतुमत्त्वज्ञानं तेन प्रकारेण हेतुमत्त्वप्रकारेण वा धर्मिणि साध्याभाववज्ज्ञानस्यैव व्यभिचार
ज्ञानत्वात् दर्शितसाध्यवद्वृत्तिविशेष्यकत्वरूपप्रमात्वप्रवेशे च साध्याभाववद्बुद्धेरेवजावच्छेदकत्वमित्यनुशयाद्
द्ध साध्याभावस्येति पक्षनिष्ठस्येत्यादिः मूलेऽसिद्धिः पक्षधर्मताज्ञानरूपकारणविरहः तथा च बाधबुद्धिदशा
यां अनुमितिविरोधिनो व्यभिचारज्ञानस्य पक्षधर्मताज्ञानारूपकारणविरहस्य वा अवश्यं सत्त्वात् तत एवानुमित्यनु
त्पादे कृतं बाधस्य हेत्वाभासत्वेनेति भावः संशययोगपसाधकबाधकप्रमाणाभावः तदभावेन तद्विघटकर
बाधकमानसत्त्वेन एतेन संशययोगपत्ताविरहपक्षताविरहयोरभेदाद्धेतुहेतुमद्भावेनाभिधानमसंगतमिति
निरस्तं आश्रयासिद्धिः पक्षधर्मताज्ञानविषयधर्मिविशेषणतया अनुमितिप्रयोजकस्य सत्त्वं सिद्ध्यभावपक्षताग
ते पक्षदोषस्य किंचित्कारतया एवं दोषसैवोद्धारमापाद्य निराकरोति न वेति सर्वोपसंहारप्रवृत्तव्याप्तेरिति १
सकलहेत्वधिकरणानां तदभावेन साध्यसत्त्वनिर्वाहव्याप्तेरित्यर्थः दृष्टान्ते पक्षाभिन्ने संदिग्धानैकान्तिकवत् व्य
भिचारसंशयवत् साध्याभावांशे संशयरूपत्वेपि प्रतिबंधकत्वादिति शेषः एतेन साध्याभावांशे निश्चयरूपमेव व्य
भिचारज्ञानं प्रतिबंधकमिति पक्षाभिन्नान्तर्भावेपि नानुमानोच्छेद इति शंका निराकृता पक्षस्य पक्षान्तर्भावेण सर्व
त्र व्यभिचारसंशयात् अनुमानोच्छेदः संदिग्धसाध्यकपक्षेऽनुमितेरनुपपत्तिः कथंचिदनुमितिसंभवेपि उक्तहेतुहे

जन्यत्वपक्षे संशयात्तत्राप्रामाण्यसंशयाज्ज्ञानकार्यानुपपत्तिप्रसक्तशंकायाः पक्ष इत्यादियथाश्रुतमूले नोध्या-
रोन संगच्छते पक्षे साध्यसंदेहस्यानुमानांगतयाप्युपेक्षायां व्यभिचारज्ञानसत्त्वे नानुमित्यनुपपत्तितादवस्थ्या-
त्परामर्शसत्त्वे व्यभिचारज्ञानस्य साक्षादनुमितिविरोधितया अकिंचित्करत्वेन तत्सत्त्वे बाधनिश्चयदशायामनु-
नुमितेर्वारणाय बाधस्य हेत्वाभासताया आवश्यकत्वादतस्तस्माच्चेह दीधितौ पक्ष इतीति व्याप्तेर्निश्चिताया-
मितिनिष्ठत्वाणां पक्षे साध्यसंदेहस्यादोषत्वे पक्षभिन्नेऽपि तस्यादोषत्वे स्यादिति प्रतिबंधे फक्काराय पक्ष इत्यत्र तत्समम-
ध्येतभावे इति फलं तत्समये निश्चितया च पक्षे तत्समये च व्यभिचारसंशयस्य पक्षदोषत्वं तदपि पूर्वं व्याप्तेर्निश्चये पू-
वेति भावः अविरोधिमात्रार्थकस्यांगपदस्य व्याख्यानदोषायेति एवं च पक्षे व्यभिचारग्रहस्यानुपकत्वेऽपि व्यभिचारसं-
शयस्य व्याप्तिनिश्चयविघटनेनैवानुमितिविरोधिता पूर्वं व्याप्तिनिश्चये व्यभिचारसंशयेऽपि व्याप्तिस्मरणाविशि-
ष्टपरामर्शसंभवादनुमितिर्निष्प्रत्यूहेव व्यभिचारनिश्चयस्य च साक्षादनुमितिविरोधितया साध्याभावव-
त्तयानिश्चीयमाने पक्षे हेतुमत्तानिश्चये व्यभिचारनिश्चयादेव नानुमितिरिति न बाधस्य हेत्वाभासतेति मू-
लकाराशयः अनुमित्सुत्वादिना संशयनिवृत्तिकथनेनैव शंकितायाश्च अप्रामाण्यशंकाया निरासाय केचित्तु पक्षे सा-
ध्यसंशयोऽनुमानांगम् अनुमितिपूर्वकाले विशेषादर्शनसाहित्येन प्रत्यलिकासिद्धिविघटकतया अनुमित्सुपयो-
गित्वकारणं तथा च पक्षे साध्याभावसंशयरूपव्यभिचारज्ञानस्य अनुमितिविरोधित्वेऽपि तादृशसंशये विनष्ट-
एव परामर्शादनुमितिर्भविष्यतीति नानुमानोच्छेद इति मूले व्याचक्षते व्याप्यवत्तापरामर्शस्यापि उत्तरकाले सं-
शयनिवर्तकत्वसंभवादनुमित्सुत्वादस्य संशयनिवर्तकत्वाभिधानासंगतिमाशंक्याह फलतोपीति यथा च फलद्वा-
रापि संशयनिवर्तकत्वमस्तीति तन्यदर्शितं तत्रापि कारणतो न च स्वतोऽपि निवर्तकत्वं लभ्यत इति नन्यूनतेति भावः अ

ग. र. नएव स्वातो विरोधित्वस्यापि तात्पर्यविषयत्वादेव फलद्वारा विरोधित्वमयेत्यत्र्याशयः परामर्शस्य विशेषदर्शनवि
धया स्वतः संशयविरोधित्वं प्राह तथापीति । ग्रन्थस्थेतीति एवं चान्यथेति मूलस्य परामर्शस्य स्वतः साध्यसंशयानि
वर्तकत्वम् इत्यर्थः साध्याभाववद्धर्मिवृत्तित्वरूपव्यभिचारज्ञाने धर्मिणि साध्याभावग्रहो विशेषणतावच्छेदकप्रका
87 रकज्ञानविधया पूर्वमपेक्षित इत्यभिप्रायेण शंकते मूले साध्याभावप्रतीत्येति ज्ञानद्वयरूपे साध्याभाववान् पक्षः प
क्षो हेतुमान् इत्याकारे हेतुमान् पक्षः साध्याभाववानित्याकारकैकज्ञानरूपे च व्यभिचारग्रहे साध्याभावग्रहस्य पूर्व
मनपेक्षात् इत्याशयेन पक्ष इत्यादिनोक्तार्थः साध्याभाववहेतोः संबंधो लेखिनीति हेतुसंबंधितया ज्ञायमाने साध्याभाववि
षयणीत्यर्थः एतेन क्वचिद्बाधपदपरामर्शयोर्भेदेपि न क्षतिः दीधितौ हेत्वाभासस्य दुष्टहेतुजन्यत्वस्याप्यनुमित्या
भासतानुमितिभ्रमत्वे मूलेन तत्र व्यभिचारज्ञानमिति धूमादिरूपहेतौ कांचनमयत्वावच्छिन्नवह्न्यभाववद्वृत्तित्व
ज्ञानमित्यर्थः एताहृशज्ञाननिराकरणं च अनुमितौ व्यापकतानवच्छेदकेनाप्युपनीतेन तद्रूपेण साध्यानु
मितौ तद्रूपावच्छिन्नसाध्याभाववद्वृत्तित्वे साक्षात् विरोधितयादोषत्वमभ्युपेत्य अनुमितेः पूर्वं तद्ज्ञाने एव तस्य न हे
त्वाभासत्वेत्यभिमानेन अनुमितिपूर्वमज्ञानं च बाधसाधारणतया अकिंचित्करमित्यभिसंधाये मनमभिमानेन निराकृ
त्वैतन्मते रूपवैशिष्ट्यविशिष्टस्य प्रसिद्धेति अनुमितावेव यत्र कांचनमयत्वेन वह्निमान् तत्र कांचनमयत्वविशि ५
ष्टवह्नेः पूर्वमज्ञानेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानभावेन व्यभिचारघटकाभावस्य प्राक्ज्ञाना
संभवात् इत्याशयः भ्रमात्मकप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानदेव व्यापकतावच्छेदकधर्मावच्छिन्नाभावबुद्धिः
सा च धार्मिविशेषदर्शिनामाहार्यैव एवेत्याशयः अत एव ताहृशाभावस्य पूर्वमज्ञानादेवापक्षतासिद्धिः एतेनानुप
पादकत्वाच्च बाधकमानाभावरूपपक्षताविरहप्रसंजकं स्वयति दीधितौ पक्षासिद्धि विनश्यतीति विशिष्टप्रतियोगप्र

सिद्धावपि नाभावांशप्रसिद्धिरित्याह मूले व्यधिकरणेति व्यभिचारस्य कांचनमयत्वावच्छिन्नवह्न्यभाववद्वृ
त्तित्वरूपस्य करादिरूपि ज्ञाने व्यभिचारस्य नवांशत्वमत ग्रहात् ज्ञानं च तस्येति अनुमितेः पूर्वमज्ञाने यद्यपि हे
त्वाभासता न तथा तत्र हृदबाधस्यापि साधनस्यादिति प्रतिबंदिग्रहवनाय बाधस्येवेति कांचनमत्वावच्छिन्नवह्न्यभा
ववद्रूपभवत्वं नतसिद्ध अनुमितिभ्रमत्वप्रयोजकबाधस्येवेत्यर्थः अनुमित्यनंतरमेव तन्निविशिष्टप्रतियोगिज्ञाना
त्मकानुमित्या तत्सकलकारणादिना बाध्यमाशयग्रह सामग्री संयतेरिति भावः अनुमितावेव भानसूति पूर्वं यत्र
तज्ज्ञानं तत्र व्यभिचारग्रहस्यापि संभावेनानुमितेरेवानुद्भयादिति भावः विशिष्टस्य पूर्वमज्ञानादिति विशेषणांत
रविशेष्यता यत्र विशेषणकज्ञाने हेतुरित्यभिप्रायेण कांचनमत्वादिना विशिष्टस्य वह्न्यादेर्ज्ञानेपि तद्रूपावच्छिन्न
तदभावाज्ञानान्नियमान्न व्यभिचारग्रहनियतत्वात्त्वांशज्ञानानुमितेप्रमाणताप्रयोजकमत्याह वह्न्यादिति लिंग
स्य कांचनमयत्वव्याप्यस्य वह्न्यावसिद्धेर्व्यभिचारांश्चेत्स्य वह्निवृत्तौ कांचनमयत्वस्येत्यादिः यद्यपि वह्नौ कांच
नमयत्वभानस्य तत्र तद्व्याप्तिविशिष्टवत्ताज्ञानानधीनतया न चेतद्वत्वांशे अनुमितेराभासत्वे अंशासिद्धिव्यभिचारयोः
प्रयोजकत्वमसंभवदुक्तिकं तथाप्यनुमितौ विधेयतावच्छेदकतोद्देश्यतावच्छेदकत्वविलक्षणप्रकारतानतद्व्या
प्यवत्ताज्ञानप्रयोज्येति नियमानरोधेन यदि कांचनमयत्वावगाहितायास्तद्व्याप्यवत्ताज्ञानाधीनत्वमंगीकरोति तदे
तद्दूषणं अनुमित्युपनीतभानवादिनाना हृष्टानियमोंगीकार्येऽनुमित्युपनीतभानमशेषसैवोच्छेदः सर्वैरेव तद्व्याप्य
वत्ताज्ञानानतदनुमितिस्वीकारान्नाहृष्टानियमो नाम्ययेपतपवेसमिसंधाय दीधितिकारस्नाह लिंगस्येत्यमुमुच्चयमात्र
मिति अंशस्य लेपत्तनिष्टस्य कांचनमयत्वावच्छिन्नवह्न्यभावस्यानुमित्याभासता प्रयोजकत्वेपि अनुमित्याभास
तायाहेत्वाभासाधीनत्वनियमो न सिद्ध्यतीति नोक्तः प्रकृत्याबाधस्य हेत्वाभासतास्तिद्धिरित्याह मूले न चेति भ्रमात्वे

भवतोव्यमतइतिचोद्यः नचसाध्याभावइत्यनंतरं प्रकृतइतिसरणीयं प्रतिबंधकइत्यनंतरं भवितमर्हतीतिवाच्य
त्वज्ञातइत्याकांक्षायामाह दीधितौ अनुमितेः पूर्वमितिपश्चादनुमितेः पूर्वं साध्यज्ञानासंभवेपि ग्रन्थदावविशिष्टसा
ध्यज्ञानेनाभावज्ञानसंभवान्नस्यादनुमितिविरोधितयोपदर्शितबाधस्यहेत्वाभासत्वसंभवः तथाप्यनुमितेः पू
र्वं व्यभिचारज्ञानासंभवेन प्रकृते व्यभिचारस्य हेत्वाभासत्वासंभव इतिबाधस्यहेत्वाभासत्वं व्यवस्थापयता इत्थे
त्यादिवाहिनीभिहितमज्ञस्तदनुसारेणेतदभिहितमतएवोक्तंभवतैवोक्तत्वादितिवहत्त्वतोयदाबाधग्रहसंभवस्त
दाहेतुमन्मात्रज्ञानसत्वेव्यभिचारज्ञानस्यावश्यकत्वेन बाधबुद्धेः पृथक् प्रतिबंधकत्वमेवनास्तीतिअनुमि
तेराभासत्वं हेत्वाभासाधीनमितिनियमबलेनातस्य हेत्वाभासत्वं दुरुपपादमित्याह मूलेनचेत्यादि अनुमित्यात्म
कविशिष्टसाध्यज्ञानोत्तरं तदभावज्ञानसंभवेपि तज्ज्ञानस्य पूर्वोक्तन्यायामनुमितावप्रतिबंधकत्वादनुमित्यंत
रानुपादस्यचपक्षे हेतुमत्ताज्ञानसत्वेतदात्मव्यभिचारज्ञानादेवविरोधान्न तदभावस्य हेत्वाभासतेतिभावः एतेना
नुमत्न्यायामप्यनुमितौ विशिष्टविषयकमानसादिज्ञानसंभवेन विशिष्टसाध्याभावज्ञानोत्पत्तावपि नक्षतिः
व्यभिचारयोः सत्वादेवानुमित्यनुत्पादनिर्वाहे बाधस्य विरोधित्वांतरकल्पनायाएव निर्युक्तिकत्वादितितत्क्षयाव
छिन्नबाधकताग्रहाधीनानुमितावेवविरोधि तदाउपनीततद्धर्मा विशिष्टसाध्यानुमितौ कांचनमयत्वावच्छि
न्नवह्न्याद्यभाववद् इतिवदूपव्यभिचारोः किंचित्करइतिकार्थंचित् विशिष्टसाध्यज्ञानाधीनबाधग्रहदशायामनुका 31
नुमितेर्वारणाय बाधस्यहेत्वाभासत्वमावश्यकं … स्यनुपायादनुमितावुपनीतध्येयमानेदूषयति मूलेवस्तुत
स्त्विति अनुमितावुपनीतमाने बाधकमप्याह ग्रन्थघेतिपथायोथानुमित्युच्छेदइतिध … भिन्नानुमित्युच्छेदइत्यर्थः
नन्नूपनीतस्यसकलपदार्थंबाधानिश्चयाभावस्यसहक … तदृशसहकारित्वेभ्रमत्वमिष्टमेवतद

सत्येव तादृशकारणविरहादेव भ्रमत्वामित्यत आह अपिचेति दृष्टभावनाक्षिति मध्यस्थस्येत्यादिरन्यथावा
दिप्रतिवादिने ~ परस्परोपन्यस्तसाध्यानुमित्यवननात्तद्धेतोः ननत्र बाधो दोष इति यत्र यस्तिडिरन्द्रेदूषणानवत
ज्ञानविरोधी प्रकृतेन दोष इति तदुद्भावना · · · दिविजय इत्यर्थः ~ · · · ~ न ~ नैयोति प्रकृतहेत्व
धीनेयं चयद्वगाहित्वं तत्र तादृग्वगाहनाविरोधियः कांचनमयत्वादिनावह्न्यभाव · नह्यतहेतुदोषत्वमिति।
प्रकृतहेतोरदृष्टतयानुमितेरप्रमात्वात्तदुपप्रतिर्भवतामपीत्यर्थः इतरबाधसहाय इतरबाधग्रहसहितं विशे
षानुमापकमगृहीतबाधस्यविशेषस्यानुमापकं बाधकाशं इतरबाधग्राहकाणामाभासत्वे अप्रमाजनकत्वेयस्य
बाधो गृहीतस्तत्साधवत्तुनोः बाधितत्वइतियावत् तत्पक्षेऽमितिपरिशिष्टः माणविशेषबाधप्रयुक्तमित्यर्थः
आभासत्वं अप्रमाजनकत्वंअप्रवमित्यप्रतिबंधेनेतिस्वरूपसतो बाधस्याप्रतिबंधकत्वात् तज्ज्ञानेव विशेषानुमापक
तायापवानुपपत्तेरितिभावः बाधस्यविशेषबाधस्याप्रदोषत्वादिति तथाचनततः घामान्यतो दृष्टानुमानस्याप्र
माजनकत्वनिर्वाहः इतिभावः यद्यपितादृशबाधवतास्मकदाचिद्विशेषानुमित्यनुत्पादप्रयोजकतयातस्य।
हेतुदोषत्वं यत्रतदनवतारस्तत्रन्यायाविशेषानुमितेराभात्यतायप्रयोजकत्वंवानयवादमेवतथापिकदाचिदनुमि
त्यनुत्पादप्रयोजकज्ञानविषयस्यसंभवेनतत्पवस्वतंत्रहेत्वाभासतायप्रयोजकत्वाभियानमनपयक्तंविशेषानुमिति
विरोधितयाव्यभिचारायसंकीर्णहेत्वाभासतावपदधर्मतावलेनेत्यादिनासिद्धांतापिष्यतवावेत्याशयेदूषकः अत्र
मितिप्रतिबंधकः विरोधित्वाविशेषादिति साध्यभावस्यैवतद्व्याप्यस्यापिसाध्यविरोधित्वादित्यर्थः साध्याभाव।
संबंध इतिहेतुमत्तयाज्ञायमानेपक्षेसाध्यभाववत्वमित्यर्थः व्यभिचारः व्यभिचारविधयादूषणंभवतीतिशेषः साध्या।
भाव व्याप्यवत्वमित्यर्थः बाधः बाधविधयेवदूषणंतस्यव्यभिचारानात्मकत्वादितिभावः वह्नित्वादिकमेनिरनुस्य

ग.दी. इत्यादौ बाधस्थल इति शेषः व्यभिचार एव व्यभिचारग्रह एव अनुमितिग्रहविरोधीति शेषः तत्स्थले नेति उभयत्र स्थल
यदं वलज्ञानपदं तथा च यत्र उष्णत्वादिसाधकवह्नित्वादेरपि केवलज्ञानं तत्र सत्यपि तत्ताविरहेण बाधस्य असाधकत्वं प्र-
८९ तिभावः तच्च व्याप्तिपक्षधर्मतात्मकगमकतौपयिकरूपं च हेतोस्तात्पर्यमिति साध्याभावसाधकत्वाज्ञात्वादेरिव प्रकृत-
हेतोरपि ज्ञाने अन्यथाकारणविरहादिवानुमित्यनुत्पादनिर्वाहेण बाधस्य हेत्वाभासत्वासिद्धेरित्यर्थः गमकतावच्छेदकत्वं ग-
मकतानौपयिकं साध्यव्याप्यवत्ताबुद्धेः प्रमात्वं गमकतानौपयिकमपि सत्प्रतिपक्षविघटकं बलं विरोधिव्याप्यवत्ता-
बुद्धौ तद्व्याप्यवत्ताबुद्धिप्रमात्वनिश्चयस्योत्तेजकत्वोपगमादिति साध्याभावव्याप्यवत्ताज्ञाने प्रमात्वनिश्चयदशायां
सत्प्रतिपक्षताविरहेण बाधस्यैव दोषत्वं बाधस्य प्रमितसाध्याभावव्याप्यवत्पक्षकत्वेन चोभयत्र प्रामाण्यग्रहदशायाम-
नुमितिप्रतिबंधकं तत एव तादृशबाधग्रहदशायामनुमित्यनुत्पादनिर्वाहे तादृशबाधबुद्धेः प्रतिबंधकत्वान्तरस्य प्रामा-
ण्यकामिति वाच्यं तादृशप्रतिबंधके प्रकृततापरामर्शप्रमात्वग्रहस्योत्तेजकतया उभयत्र प्रामाण्यग्रहदशायामनुमिते-
र्वारणाय प्रतिबंधकत्वान्तरकल्पनाया आवश्यकत्वादिति शंकते यद्यपीति अन्यथासिद्धत्वे प्रमात्वनिश्चयः ततः साध्याभा-
वव्याप्यबुद्धिवत् साध्याभावानुमितावितिबाधकाविरहेणेति शेषः अनैकान्तिकत्वमेव व्यभिचारज्ञानमेवानुमितिविर-
ध्यादिति शेषः इदमापाततः तादृशसाध्याभावानुमितेर्व्यभिचारज्ञानेनावारणात् किं तु एकत्र प्रामाण्यग्रहस्थले ३३
अन्यत्राप्रामाण्यग्रहोत्पत्त्यैवानुमित्युपगमेनोक्तप्रामाण्यग्रहे उत्तेजकताया अनुपगमात् उभयत्र प्रामाण्यग्रहतदंग्र-
हस्थलयोरप्रामाण्यग्रहानास्कंदितविरोधिव्याप्यवत्ताज्ञानप्रतिबंधकतयैवोपपत्तेः प्रतिबंधकत्वांतरानिरुक्तिकामित्येव
दूषणं बोध्यं इति परकाममिति इत्यनेन दृष्टांतविधया पतत्साध्याभावज्ञानस्य स्वातंत्र्येण दूषकत्वमुक्तमित्यर्थः हेत्वाभासां-
तरतापत्तेरिति पक्षनिष्ठसाध्याभावमात्रस्य व्यभिचारानात्मकतया बाधत्वस्यापि तत्रानुपगमेन ह्रासेः नंतर्भावादिति भा

वः हेतुतः साध्यसिद्धिसंभावनायामिति हेतोः साध्यसाधकप्रमाविषयत्वसंभावनायामित्यर्थः व्यभिचारासिद्धेः ता
दृशप्रमाविषयत्वस्याव्यभिचारनियतत्वादिति भावः व्यभिचारासिद्ध्युपगमे दोषमाह ज्ञानस्येति बाधसिद्धिरेव व्यभिचा
रासिद्धिरिति नोपजीव्योपजीवकभाव इति दूषयति नेति सैव दोष इति सानत्वे नैव लाघवात् प्रतिबंधिकान्तु व्यभिचारज्ञा
नेतया व्यभिचारसंग्रहस्वरूपीरत्वादित्यर्थः पक्षातिरिक्ते हेतुसाध्याभाववत्त्वग्रहदशायामनुमितिवारणाय व्यभिचारधियः
प्रतिबंधकतायाः आवश्यकत्वात्तद्वृत्तमकिंचित्करं साध्याभावप्रमायाः प्रतिबंधकत्वांतरकल्पनपवच्छेदगौरवमिति दूष
यति सत्यमिति साध्याभावप्रमाप्रतिबंधकेत्यादिः स्वरूपत इति सामान्यत इत्यर्थः अन्यत्र दूषकत्वाकल्पनादिति प्रत्यक्षा
दौ साध्याभाववत्पक्षकत्वपर्यंतज्ञानस्य प्रतिबंधकत्वाकल्पनादित्यर्थः तथा चानुमितौ तज्ज्ञानप्रतिबंधकतायाः क्लृप्त
त्वेनानवकाशात् हेत्वहृतित्वेपि न सद्धेत्वाभासत्वं नास्तीति भावः बाधपूर्वपक्षः पक्षे साध्याभावनिश्चय इति साध्याभावज्ञा
ने प्रामाण्यसंशयोत्तरं तत्र प्रामाण्यनिश्चयं विना न साध्याभावनिश्चयः तत्र संशयस्यानयनिवृत्तेरिति तत्प्रमात्वनिश्चया १
योनः एवं प्रमात्वनिश्चयं विना अप्रामाण्यसंशयोपनतया कथं विरुद्धत्वज्ञोपि निश्चयो न निश्चयकार्यकारी अतस्तस्य निश्च
यस्य निश्चयकार्यकारित्वमपि प्रमात्वनिश्चयाधीनमित्यर्थः ज्ञानमात्रादर्थनिश्चय इति प्रमात्वनिश्चयनिरपेक्षत्वेन हेतोः १
प्रमाण्यसंशयस्थलेऽर्थनिश्चयेनाहृशाज्ञानाच्च निश्चयकार्याभ्युपगमे प्रामाण्यग्रहवैयर्थ्यं तदुपायविचारवैयर्थ्यं अर्थनिश्च
यप्रसंगः अर्थनिश्चयकार्यं यत्किंचित्प्रवृत्त्यादि तत्प्रसंगः द्वितीयाभ्युपगमे दूषणमिदं उपजीव्यत्वेनेति किंचित्साध्याभावनि
श्चयात्मकव्यभिचारज्ञानस्वरूपे उपजीव्यत्वेनेत्यर्थः अधिकबलत्वेनेत्यत्र बलशब्दो हि भ्रमनिराकरणे दीधितिकृद्याचष्टे १
अधिकत्वरूपत्वेनेति निश्चयमिति प्रतिबंधरूपनिश्चयकार्यकारिताप्रयोजकत्वेनेत्यर्थः एतदुभयस्याप्रमात्वनिश्चया
येदशायामेव हेतुत्वात्तल्लाभाय प्रमात्वनिश्चयविशेषणं सूचयति निरपेक्षणीय इति निश्चयकार्यार्थमवश्यं स्वीकरणीय इत्य

गदा॰ त्यर्थः प्रमात्वनिश्चयस्य स्वरूपसद्व्यभिचारानिर्वाहकतया व्यभिचारपदं तन्निश्चयपरतया व्याचष्टे व्यभिचर इति व्यभि
चारनिश्चयः साध्याभावांशे निश्चयकार्यकारिताप्रयोजकरूपविशिष्टव्यभिचारज्ञाननिर्वाहः तच्चानिश्चयत्वमिवनि
९० श्चितप्रामाण्यकत्वमपीति एतद्रूपसंगतिः व्यभिचारज्ञानस्य साध्याभावनिश्चयात्मकतया तदधीनत्वकथनासंगतेः सा
ध्याभावानिश्चयपरं करणं श्रुतत्वात्तत्प्रमात्वनिश्चयपरतया वर्णितपनि साध्याभाव इति व्यधिकरणबहुव्रीहावपि तद्विध्यन
यासाध्याभावस्य निश्चयो यस्मादिति न व्याख्यातं तदधीनत्वे च तन्निर्वाहश्च निश्चयकार्यकारिताप्रयोजकरूपवत्त्वं एतच्चेद
नीज्ञानयोः क्रमिकत्वे हेतुत्वेनाभिहितं सर्वं ज्ञानमिति चहूलतज्ज्ञानभिन्नज्ञानाविषयीभूतमित्यर्थकं उपजीव्यत्वादिति स्व
रूपे प्रतिबंधकत्वे चेत्यादिः एतच्चेदानीं दोषत्वे हेतुस्तयोः क्रमं न तु व्याप्तिरनुष्ठ इत्यादौ साध्याभावज्ञानादेवानुमित्यनुत्पादनिर्वा
हात्तत्प्रयोगात्वधिपः स्वतोऽविरोधित्वेन तत्प्रमात्वस्य हेतुत्वासत्तानोपपद्यत इत्याशंक्य प्रमाणत्वज्ञानस्यानुमितौ स्वतः प्र
तिबंधकत्वं व्यवस्थापयति पादिचेति साध्याभाववत्ताबुद्धेरनुमितिसाधारणतद्विशिष्टधीयप्रतिबंधकतया तस्याः परामर्शेन
विशेषदर्शनात्मकेनापि परिभवसंभवः प्रतिबंधकसत्त्वे कस्यापि हेतोः कार्यजनकत्वायोगादित्याशंकां निराकरोति
नचेत्यादिना अगृह्यमाणविशेषा अगृहीताप्रामाण्यजनेनेदं जनमिति अप्रामाण्यज्ञानं विनैवेत्यादिः विशेषदर्शनेनेति ३७
परामर्शरूपेणेत्यादिः अनुमेनादितिनयाच विशेषादर्शने विशिष्टत्वेनैव ग्राह्याभावबुद्धेः प्रतिबंधकत्वमुपगन्तव्यमित्य
नुमितिमात्र एव प्रमात्वेनानिश्चितसाध्याभावधियोः विरोधित्वमिति भावः प्रमात्मकग्राह्याभावज्ञानमेवानुमितिप्रति
बंधकं अतो न पीतत्वादिभ्रमदशायामपि पीतत्वाभावयत्नमित्यनुपपत्तिः तत्प्रतिबंधकतायां व्यभिचारज्ञानविधयैव न तु हा
तं चोणेति न तद्विषयस्य बाधहेत्वाभासेनेति निशंकते अथ्येति न ही तु वस्तुगत्या प्रमापाराव प्रतिबंधकत्व इत्यर्थः मा भूत्सा
ध्याभावज्ञानमनुमितौ स्वतः प्रतिबंधकं तथापि प्रमात्वबुद्धेः प्रतिबंधकत्वमफलं व्याप्तिरनुष्ठ इत्यादौ व्याप्त्यादावुपस्थत्वा

दिनिश्चयासत्त्वे तत्प्रमात्वनिश्चयेऽप्यनुमित्युपगमात् तन्निश्चयदशायां व्यभिचारज्ञानादेरनुमित्यनुत्पादनिर्वाहात्
श्रोत्वः पीनद्रव्यत्वादावपीतत्वाद्यनुमितेः व्यभिचारधीसत्त्वेपि नानुपपत्तिः साध्याभावांशे गृहीतप्रामाण्यकत्वस्य
व्यभिचारधीप्रतिबंधकतायां निवेश्यत्वादिति प्रांचः तेन दितिसाध्याभावनिश्चयं कुर्वीयतिमनुमितिप्रतिबंधरूप
निश्चयकार्ये कादित्ता प्रयोजकविशेषणं वैशिष्ट्यं निर्वाहयतीत्यर्थः साध्याभावज्ञानासत्त्वेपि तद्विषयकप्रमात्वनिश्च
यकाले न साध्यज्ञानमित्यत्र भवमालेव्य समाधत्ते नेति तस्यैव तत्तत्स्यापीत्यर्थः प्रतिबंधकत्वादिति ताहृशज्ञानकाले
व्यभिचारज्ञानानियमोऽग्रे वर्णनीयः शाब्दादिसाधारणबुद्धौ ग्राह्याभावप्रमात्वज्ञानस्य प्रतिबंधकत्वेपि वाधस्यासा
धारहेतुदोषत्वमुपपादयति हेतुवृत्तित्वादसाधारणत्वेनेति हेतुव्यतित्वयाविरोधित्वस्यानुमितिमात्रनिरूपितत्वेने
र्थः हेतुनिष्ठसाध्याभावप्रमाविषयवृत्तित्वपर्यंतस्य न दोषते त्वभिसाधायाहसाधारणेपीतिपक्षे साध्याभावप्रमायाश्रित
ज्ञानेप्रमात्वघटकत्वापक्षे साध्याभाव .. ज्ञानेपतेदपि ज्ञानव्यभिचारज्ञानरूपमेवेति दोषांतरज्ञानात्मकं
यज्ञानमत्रापि प्रतिबंधकं स्यादेवेति नियमात् साध्याभावज्ञानस्य शाब्दादिसाधारणविशिष्टज्ञानप्रतिबंधकत्वेपि
तद्विषयस्य हेत्वाभावप्रमेनिहेतुमत्त्वग्रहविषयतावच्छेदकपक्षतावच्छेदकावच्छिन्ने साध्याभावप्रमेतिनिश्चयस्य
पक्षतावच्छेदकविशिष्टे साध्याभावनिश्चयोपजीव्यत्वसंभवान्नोक्तवाधज्ञानस्य व्यभिचारज्ञानरूपतेति समाधत्ते
प्रमात्वेतिपक्षनिष्ठग्राह्याभावस्य वाधत्वमभ्युपेत्यापि वाधस्य पार्थक्यं व्यवस्थापयति पक्षधर्मतावलेनेत्यादिना
साध्याभावबुद्धेः प्रमात्वज्ञानस्य प्रतिबंधकतानिसकृत्यतत्प्रमात्वस्य दोषतायाग्रेस्वयं दूषणीयत्वात् दीधिकारो
वस्तुत्वे वाधस्य रूपाणाहअत्रेदमित्यादिना साध्याभाववानितिअत्र साध्याभाववत्त्वप्रवच्छिन्नं ग्राह्यं अत्रेन कापि
संयोगवानयं हृद इत्यादावतिप्रसंगः न चानवच्छिन्नत्वानवग्राहिनोपि तदभाववत्ताज्ञानस्याव्याप्यवृत्तित्वग्रह

गदा॰ दृष्टायांतद्वत्ताग्रहप्रतिबंधकतयानवच्छिन्नत्वाविशेषितसाध्याभाववत्वस्यापिदोषत्वंदुर्वारमितिवाच्यंप्रतिबं-
धकीभूताभाववत्ताज्ञानेनियमतोधिकरणत्वाद्यंशेसंबंधघटकतयानवच्छिन्नत्वभानोपगमात् अन्यथा-
९१ व्याप्यवृत्तिज्ञानकालीनज्ञानस्याविरोधित्वायोक्तज्ञानाभावविशिष्टत्वेनप्रतिबंधकत्वस्योपगंतव्यतयागौरवा
त् तदंशेतुयानवच्छिन्नत्वावगाहितयात्वेलाघवात् पूर्वोपदर्शिताव्याप्यवृत्तित्वज्ञानवशादनवच्छिन्नवृत्तिक-
त्वानवगाहिनोऽभाववत्ताज्ञानस्याव्याप्यवृत्तित्वधीनाश्यप्रतिबंधकत्वमिष्टमेवदेशकालद्रूपधर्मितावच्छे
दकावच्छेदेनतदभाववत्ताज्ञानस्यतदवच्छेदेनतद्वत्ताज्ञानप्रतिप्रतिबंधकत्वांतरकल्पनमव्याप्यवृत्तित्वज्ञाना
तेजकतापत्तेस्यावश्यकत्वं अव्याप्यवृत्तित्वज्ञानोत्तेजकतापत्तेश्यावश्यकं अव्याप्यवृत्तित्वेनज्ञातयोरपिभावाभावयो-
रेकावच्छेदेनप्रकाशःनिश्चयात् नचानवच्छिन्नवृत्तिकत्वावगाहित्वेनाभावज्ञानस्यप्रतिबंधकत्वेअयंसंयोगवान्त
दभाववांश्चेतिसमुच्चयस्यायंसंयोगवान्नवेतिसंशयाविरोधित्वप्रसंगः तस्याव्याप्यवृत्तित्वानवगाहित्वादितिवाच्यं -
समुच्चयस्यकोटिद्वयसामानाधिकरण्यविषयकतयाविरोधवाननिवर्तकतयैवसंशयाविरोधित्वात्भवद्भवा अ-
व्याप्यवृत्तित्वज्ञानाभावविशिष्टस्याव्याप्यवृत्तित्वानवगाहिनोपिज्ञानस्यप्रतिबंधकत्वेतथापिवृत्तानिष्टसंयोगाभाव
द्दोनातिप्रसंगः नहिविषयकनिश्चयत्वस्यत्वमितिप्रतिबंधकताशून्याव्याप्यवृत्तित्वज्ञानकालीनज्ञानसाधारणत्वे- ७
नतदतिरिक्तवृत्तित्वादितिव्याप्यवृत्तिसाध्यकस्थलेपक्षतिष्ठानवच्छिन्नसाध्याभाववत्वमेववाधः अनवच्छिन्नसा
ध्याभाववत्त्ववद्देशकालद्रूपपक्षतावच्छेदकावच्छेदेवसाधनेवाधः एवंपक्षतावच्छेदकधर्मोनतिरिक्तवृत्तित्वरूपसा-
ध्यावच्छेदकताभानेयत्रोद्रूपंतत्रपक्षतावच्छेदकसामानाधिकरण्येनसाध्याभाववत्वेपक्षवतादृशधर्मसामा-
नाधिकरण्यमात्रेणसाध्यसिद्धिरुद्देश्यतत्रतादृशधर्मावच्छिन्नसाध्याभाववत्वंवाधइतिविशेषोबोध्यः एतेदिना

साध्यस्य यादृशसंबंधेनानुमितिविषयत्वं तत्संबंधपर्याप्तप्रतियोगितावच्छेदकताकोऽभावो विवक्षणीयः यत्र संयोगा
दिना साध्यानुमितिस्तद्दूषणात्तत्र संफत्रसंयोगादिसंबंधावच्छिन्नाभावस्याविरोधितया बाधानात्मकत्वात् पर्याप्तिमि
निवेशः यत्र संफत्रसंयोगादिरूपपरंपरासंबंधेनानुमितिविषयत्वं तत्र तत्संयोगादिसंबंधावच्छिन्नाभावो न बा
धः पक्षविषयतानिरूपितसंयोगादिविषयताया साक्षात्साध्यविषयत्वानिरूपिततया पक्षे संयोगादेः साध्यसंबंध
ताविरहात् धर्मितावच्छेदकव्यापकतादिविशिष्टसंयोगादिना साक्षात्संबंधेनानुमाने च तादृशाभावो बाध एव
उक्तज्ञानरीतिरप्येवमनुसर्तव्या साध्यवदन्यो वेति तन्निष्ठाबुद्धौ तदंशताभासेव तन्निष्ठबुद्धेः सार्पाधियो विरोधित्वादिति भा
वः एवं च वृत्तिनियामकसंबंधेनानुमितिस्वीकारे तत्संबंधस्य प्रतियोगितानवच्छेदकत्वेऽवच्छेदकत्वे च न तत्र साध्यव
द्भेदस्यैव बाधत्वं बोध्यं वाकारः साध्याभावसाध्यवद्भेदयोः पृथक्पक्षविशेषणतया दोषघटकता न तु मिलितयोरि
तिलाभावपक्षः पक्षतावच्छेदकविशिष्टपक्षावृत्ति साध्यमिति पक्षावृत्तित्वविशिष्टसाध्यतावच्छेदकावच्छिन्नः
मित्यर्थः यद्यपि पक्षः साध्यवानित्यनुमितौ पक्षे साध्यस्याधिकरणत्वमेव संसर्गतया भासते न तु साध्ये पक्षवृत्तित्वं तथा
सति पक्षे साध्यस्येव साध्येऽपि पक्षस्य प्रकारतापत्तेरिति तादृशानुमितौ साध्यं पक्षावृत्तीति ज्ञानस्यानयाप्याभावज्ञा
नविषयाविरोधित्वं तथापि पक्षः साध्यवान् पक्षे साध्यमिति ज्ञानयोः समशीलयोरेकस्यापरं प्रति बध्यत्वमन्यस्यापि
तत्प्रति बध्यत्वमनुभवसिद्धमित्याशयेनैफक्किः पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेनानुमितौ प
क्षतावच्छेदकानवच्छिन्नत्वविशिष्टसाध्यस्यापि तल्लघुत्सावधताबोध्यापत्तेश्च प्राचीनमतानुसारेणावक्तत्वदीयनत
संसर्गावगाहिबुद्धौ तत्संबंधावच्छिन्नतदभावबुद्धेः प्रतिबंधकत्वमिति संसर्गविषयापद्मासनेन तत्संसर्गस्य विशिष्टबु
द्धिविषयतया धाराधेयभावस्य - कबुद्धौ आधाराधेयभावाभावज्ञानप्रतिबंधकतायाः प्रामाणिकतया पक्षवृत्तित्वाद्यभा

गदा॰ वच्छेदिनस्तन्दोषता अत एवाग्रे यथाश्रुतमित्यभिधास्यते एतन्मते अवृत्तित्वविशिष्टसाध्यस्यासिद्धिविशेषात्मक॰
स्यापि बाधरूपता बोध्या वक्ष्यमाणलक्षणाक्रान्तत्वात् विशेषणविशेष्ययोर्वैपरीत्येपि प्रतिबंधकत्वमक्षतमित्याश
९२ येनाह साध्याभाव इति अथ एवं यत्र यापक्षेण पक्षवृत्तित्वेन वाविशिष्टः साध्याभाव इत्यर्थः तादृशसाध्यवद्भेदोपि बो
ध्यः पक्षावृत्तित्वादिकसाध्याभाववत्त्वादिकमिति साध्याभावाधिकरणत्वं साध्यवद्भेदाधिकरणत्वं चेत्यर्थः अधि
करणतादृश्या सर्वस्मादेव पक्षत्वप्राचीनतेन साध्याद्वैतित्यादिना साध्यसंबंधपरिग्रहः पक्षावृत्तित्वादिकमित्या॰
दिना अवृत्तित्वपरिग्रहः आदिपदाभ्यां साध्यतावच्छेदकस्य पक्षनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वादिपरिग्र॰
होवा एतदपि सर्वं प्राचीनमतेन भेदप्रतियोगित्वयोः समनियतयोरेकतरज्ञानं अपरविरोध्यपरज्ञानमपि तत्र तथेत्या॰
शयेनाह साध्यवदिति साध्यवत्त्वव्यापकानुयोगिताकत्वादिविशिष्टं पक्षभेदादिकमित्यर्थः आदिपदाभ्यां पक्षता
वच्छेदकावच्छिन्नस्य साध्यवत्सामान्यनिष्ठभेदप्रतियोगित्वपरिग्रहः वक्ष्यमाणरीत्या विशिष्टपक्षे विशिष्टसाध्य
वैशिष्ट्यग्रहत्वे स्वरूपसंबंधरूपस्य प्रतिबध्यतावच्छेदकत्वस्य निवेश्य विशिष्टपक्षसाध्यग्रहाविरोधित्वनिवेशनसा
मर्थ्यकामिनि सूचयितुमाह विशिष्टे इति आदिपदाभ्यां विशेष्यस्य वृत्तावृत्तित्वादिपरिग्रहः विशिष्टपक्षे विशेष्यताव
च्छेदकावच्छेदेन साध्याभाववत्त्वादिकमपि बोध्यं मूलकृता यत्र भावबुद्धेः प्रमात्वग्रहस्य प्रतिबंधकमन्यत्र कृत्यमि॰ ७०
ति प्रागुक्तदोषेण यथा दर्पणादिष्वनेनाभिहितं अतश्च ज्ञानप्रतिबंधकत्वस्यैव तथात्वमित्या तन्निश्चयस्यैवाविरोधि
निश्चयत्वेनेति विधो न्यत्र हेतुः धर्मिणि ग्राह्याभावविषयकत्वेनेत्यर्थः तथात्वे सति विरोधिताया सर्वानुभवसिद्धत्वादिति
भावः मात्र एवेति मात्रपदेन तत्त्वार्थकं ग्राह्याभावनिश्चयस्य शाब्दबोधं प्रति बंधकत्वे आचार्यसंवादमाह अत एवेति
मणिकृता एकपदार्थे संसर्गे अपरपदार्थे निष्ठाभावप्रतियोगित्वप्रमाविषयत्वज्ञानस्य शाब्दधीविरोधित्वाशयेन

तत्त्वात् पक्षप्रमाविषयत्वाभावरूपयोग्यतायाज्ञानीययोग्यतायाः रूपपरिच्छेदे स्वोक्तं विघटते प्रकृतपक्षे
तिसत्यतिपक्षत्ववारणाय प्रथमसत्यन्तं पक्षताप्रसिद्धिसाध्यप्रसिद्ध्योर्वारणाय द्वितीयं उदासीनवारणाय विशे-
ष्यं यद्यपि साध्याभावविशिष्टपक्षादिरूपे बाधविरोधव्याप्यकसाध्याभावव्याप्यविशिष्टपक्षाद्यन्यत्वे
विशिष्टपक्षादिग्रहविरोधी पक्ष ॰ वच्छेदकाभाववत्पक्षतायन्यत्वं चासिद्धं तथापि याद्दृशविशिष्टनिरूपित
विषयिताविरोधज्ञानमिनिजनकतावच्छेदकत्वे सति विशिष्टपक्षग्रहत्वस्य विशिष्टसाध्यग्रहत्वस्य वन्नूनवृत्ति
र्या विशिष्टपक्षे विशिष्टसाध्यग्रहत्वसामान्यनवृत्तिः प्रतिबध्यता ॰ निरूपितप्रतिबंधकतावच्छेदिकाता ॰
शत्वमित्यत्र तात्पर्यं ग्रथाचलत्वे एव वह्निमान् हृदो ॰ हमानित्यादौ वह्न्यभाववद्धृदादिरूपबाधेः व्याप्तिः तद्वि-
षयकत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायाविशिष्टपक्षग्रहत्वव्यापकत्वात् नच पक्षतावच्छेद
कभेदेन बाधत्वसभिन्नतयात्र साध्यमेव पक्षतावच्छेदकं तत्र विशिष्टपक्षग्रहाविरोधित्वस्यानिवेशनोपनयाना
श्रयासिद्ध्यात्मकबाधासंग्रह इति वाच्यं वह्निमान् ॰ कांचनमयहृदो वह्निमानित्यादौ कांचनमयपक्षत्वाभावविशि-
शिष्टज्ञानादिरूपाश्रयासिद्धावतिव्याप्तिवारणाय तादृशपक्षकसाध्यलक्षणे अविरोधित्वान्तस्यावश्यं निवेशनी-
यतया तत्रात्याश्रयासिद्धिरूपबाधेः व्याप्ते तत्राश्रयासिद्ध्यात्मकस्य तस्य लक्षणत्वात् लक्ष्यत्वेत
द्रूपावच्छेदकताविधेयतावच्छेदकतानिरूप्यविशिष्टपक्षविशिष्टसाध्यवैशिष्ट्यबोधीयविषयतांतःपातिप्रका-
रतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयिताकत्वस्याविरोधित्वांतस्याहितविरोधित्वांतेन विव-
क्षणात्कांचनमयहृदो वह्निमानित्यादावाश्रयासिद्ध्यादिज्ञानस्य प्रतिबध्यतावच्छेदिकानउदृशपक्षतावच्छेदकता
भिन्नाविशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यधीविषयतांतःपातिनी प्रकारतेति तद्व्युदासः उक्तपक्षताप्रसिद्धिरूपबाधस्तु

गदा. इत्युक्तताद्दशप्रकारताभिन्नत्वाज्ञाविशिष्टविषयतांतः यातिनीत्वाप्रकारतातस्याज्ञादत्वावच्छिन्नविशेष्यतानि-
रूपितवह्न्यादिप्रकारतात्वेन प्रतिबध्यमावच्छेदकत्वात् न तादृशावधारणग्रहः प्रकारतायाञ्जविशिष्टवैशिष्ट्या-
विषयतापूर्णलिङ्गज्ञानवृत्तित्वरूपेत्यतादृशविषयतांतःपातित्वनिवेशात् न कांचनमयोज्ञदोवह्निमान् ज्ञदस्य-
कांचनमयहृत्येताद्दशज्ञानीयायाविधेयत्वरूपाप्रकारतातस्याहृदत्वावच्छिन्नविषयतानिरूपिताकांचन-
मयत्वादिप्रकारतात्वेनाश्रयासिद्धिज्ञानप्रतिबध्यतावच्छेदकत्वेप्यतिप्रसंगः न तु तथापि पर्वतो वह्निव्या-
प्याभाववद्व्यभावोभयवान् नित्यदोवह्निव्याप्यवत्पर्वतादिरूपेद्व्याभिः तस्य वह्निमत्पर्वतरूपबोध्नाबाधकत्वा-
दिति चेन्न विरोधघंतघटकप्रतिबंधकतावच्छेदक ` ` यतायां विरोधत्वात्मक `` वच्छेदकत्वमनिवेशाप्रतिबं-
धकतायांत्वाकिंरूपप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयितावच्छिन्नत्वमितिनिष्ठजन्यतानिरूपितज-
नकतावच्छेदकविषयिमानवच्छिन्नत्वस्यनिवेशनीयत्वात् प्रकृते च वह्निव्याप्याभाववत्ताज्ञानत्वावच्छिन्नप्र-
तिबध्यतायिरूपितप्रतिबंधकतात्वपदेनोपादायोज्ञवाधेलक्षणसमन्वयसंभवात् तथाहि तादृशप्रतिबंध-
कतानिरूपितप्रतिबध्यतावच्छेदकं तद्व्यभाववत्पर्वतज्ञानत्वं किंत्ववत्निव्याप्याभाववत्पर्वतज्ञानत्वमेवा- ७६
तस्ता दृशप्रतिबंधकतायां वह्न्यभाववत्पर्वतज्ञानविरोधिवह्निमत्पर्वतत्वेन ` कात्वावच्छेदकवह्निव्याप्यवत्प-
र्वतविषयितावच्छिन्नत्वेपि वह्निव्याप्याभाववत्पर्वतज्ञानविरोधिवह्निमत्पर्वत ` ` ` त्वात्मकभावच्छेदकवह्निव्याप्या-
भावत्वपर्वतेतानविरोधिवह्नि येनविषयितानवच्छिन्नत्वमक्षतमेव तथा चोद्देश्यतावच्छेदकताविधेयतावच्छेदकत्वाविशि-
विशिष्टपक्षताविशिष्टताध्यवैशिष्ट्यबोधीयविषयतांतः पातिप्रकारत्वावच्छिन्नप्रतिबध्यताविघ्न ` ` सतीस्वनिरू-
पितप्रतिबध्यतावच्छेदकविषयितावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबं(ध)कतावच्छेदकविषयत्वावच्छिन्नत्वमितिज

नकतावच्छेदकविषयत्वानवच्छिन्नायाप्रतिबंधकतातदवच्छेदकत्वनिरूपितविषयिताकत्वमिति निकर्षः न
न्नुपपत्तावितिसाध्यसामानाधिकरण्यधर्मवत्त्वादिज्ञानस्यानुमितिविरोधितयासाध्याभाववदभावत्वेनसाध्यानवगाहि
नस्तस्यसाध्याभावव्याप्यानवगाहिनस्तस्यसाध्याभावव्याप्यानवगाहित्वेनसाध्याभावानुमापकतयाचतद्वि
षयैः तिव्याप्तिरित्याशंकाभिप्रायतयापरिहरतिपक्षतादेरिति मूलोक्तसिद्धान्तरूपपक्षतासाध्याद्यभाववदिति पक्षता
वच्छेदकावच्छिन्नेत्यर्थः अनवगाहित्वमितितद्वत्तामनवगाह्यापिभ्रमभिन्नत्वस्यतद्वितत्प्रकारकत्वेसत्यव
गाहनसंभवादितिभावः ननुसाध्याभाववतिपक्षेसाध्याभावप्रकारकंज्ञानमित्याकारकस्याविरोधिविषयकप्र
मात्वज्ञानस्यप्रतिबंधकतायानिर्विवादत्वात्तद्विषयस्यसाध्याभावाप्यत्वघटितप्रमात्वस्यहेत्वाभासतानिष्प्रत्यूहैवेत्य
नग्राह्यावगाहित्वेत्वितितद्विषयकत्वेनैवेतिपक्षतावच्छेदकविशिष्टेसाध्याभावाद्यवगाहित्वेनैवेत्यर्थः एवकार
रेणप्रतिबंधकतावच्छेदकेप्रमात्वघटकेनतदंशनिवेशव्यवच्छेदः तन्निवेशेगौरवात्तद्विषयकज्ञानस्यापिप्र
तिबंधकताप्रयोजकाविरोधिविषयिताश्रयत्वेनप्रतिबंधकतयानतरस्यग्रहणाच्चेतिभावः साध्याभाववत्त्वघटित
प्रमात्वविषयकत्वेऽनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वसत्त्वेऽपिमेयत्वविशिष्टव्यभिचारादेरिवविशिष्टांतरघटि
तत्वेननदोषतासंभवइतिबोध्यं ननुविरोध्यविषयकस्यापिधर्मिविशिष्टाद्याभावप्रमाविषयताज्ञानस्यग्राह्यादेःप्र
तिबंधकतादर्शनादनुमितावपितत्प्रतिबंधकत्वमव्याहतमेवतदुक्तंमूलकृताग्राह्यादौतथात्वादर्शनादितीत्यतआ
ह प्रमात्वनिश्चयस्येति प्रतिबंधकत्वाकल्पनादिति ग्राह्यव्याप्यादावपितत्प्रतिबंधकत्वस्यतुल्यन्यायेनासिद्धत्वा
दितिभावः ननुसाध्याभावज्ञानसत्त्वेपितत्राप्रामाण्यग्रहेऽनुमितिर्भवत्यतेऽनुमितौसाध्याभावज्ञानेनप्रतिबंधक
मपितत्रप्रमात्वग्रहएवेत्यतआह सर्वत्रेति भ्रमत्वाग्रहः संशयसाधारणभ्रमत्वज्ञानत्वावच्छिन्नाभावः प्रयोजक

इत्यन्वयः प्रयोजकत्वं चावच्छेदकत्वं अत्र हेतुत्वोपादानं दृष्टांतत्वेन च अत्र ज्ञानसामान्यमनुपादाय निश्चयरूप-
विशेषोपादानव्यवच्छेद्यं स्वरूपतिसंशयसाधारणेति तेन तु साध्याभावज्ञानप्रमात्वग्रहस्यैव प्रतिबंधकत्वमुचितमिति-
शंकां निराकर्तुं प्रतिबंधे माहात्म्यस्येति प्रयोजकीभवेदिति यथायोग्यं कार्यजनने कार्यप्रतिबंधे चेति निरूपणीयं तथा च य-
त्राकांक्षाज्ञानादावप्रमात्वेन तस्य प्रमात्वग्रहेऽपि न शाब्दबोधो मानसादिरिति अगृहीताप्रामाण्यस्यैवाकांक्षादिज्ञानस्य
कारणत्वादिकं तथा साध्याभावनिश्चयाप्रमत्वेन तस्य प्रमात्वग्रहेऽपि न साध्यज्ञानप्रतिबंधः इत्यप्रामाण्यग्रहाभावविशि-
ष्टस्य साध्याभावनिश्चयस्यैव तज्ज्ञानप्रतिबंधकत्वमिति भावः ननु शाब्दादौ ऐक्याभावादिभ्रमे प्रमात्वज्ञानं विनाऽप्यै-
क्याभावादिभ्रमे प्रमात्वज्ञानं विनाऽप्यैक्याद्यनुमितेर्न साध्याभावज्ञानस्य साध्यानुमितिप्रतिबंधकतेत्यत आह शाब्दा-
दाविति विना तदप्रामाण्यग्रहमिति फलानुरोधेन तत्र प्रमात्वग्रहस्यैव कल्पनादिति भावः प्रमात्वेनानिश्चीयमानापि
अप्रमात्वेनागृह्यमाणा ग्राह्याभावधीः शाब्दबोधादिप्रतिबंधिकेति भवतामप्यनुमतं विशेषदर्शनत्वेन लिंगपरामर्श-
स्यैव साध्याभावज्ञानपरिभावकताया भवदभिमतत्वात् तथा च शाब्दबोधादौ न तत्प्रतिबंधकताप्रयोजकमनुमितिसा-
धारणानुगतधर्मस्याघटनात् प्रतिबध्यतावच्छेदकतायाः ननु तत्तद्विपरीतज्ञाने अप्रमात्वज्ञानकल्पनयाऽनुमित्युपपा-
दनमेवोचितं अन्यथा शाब्दादिसाधारणविपरीतज्ञानप्रतिबंध्यतावच्छेदकगर्भेऽनुमितित्वान्यतमस्य निवेशनीयत-
यानुमितौ साध्याभावज्ञानप्रमात्वबुद्धेः प्रतिबंधकत्वांतरस्य कल्पनया च गौरवात् अनुमितित्वान्यत्वविपरीतज्ञान
प्रतिबध्यतावच्छेदकत्वे आश्रयासिद्ध्यादिज्ञानकालेऽनुमित्यापत्तेश्च पक्षतावच्छेदकादिव्याप्यवत्ताज्ञानस्यानुमिति-
जनकतया तद्विपरीतज्ञानदशायां तच्छाब्दबुध्यादेरिव तदवच्छिन्नपक्षादिविषयकानुमितेर्भवतोऽप्यनिष्टत्वादि-
त्याहुः नदीति अथ शाब्दबोधे विपरीतनिश्चयाभावो न हेतुः योग्यताज्ञानहेतुतयैवोपपत्तेः एवं चानुमितावपि न तस्य-

हेतुताप्राह्यानुमितिसाधारण्यरोधानुभवतस्यजातिविशेषस्यवाविशेषोक्तेविशेषणवत्त्वरूपयोग्यताज्ञानेन
जन्यतावच्छेदकत्वोपगमात्तादृशाकारणविरहेणैववाधितार्थानुमित्यनुदयादितितिवाधस्यसाक्षादनुमितिविरोधि
तयाहेत्वाभासत्वाभिधानमसंगतमित्याशंकते अथेतिलाघवेनेतितदभावग्रहाभाववत्त्वापेक्षयातद्ज्ञानत्वरू
पजनकतावच्छेदकलाघवेनतद्बुद्धेःतदभावव्याप्यादिनिश्चयाभावानामपिहेतुत्वावाल्पनयाचलाघवेने
त्यर्थः वाक्यार्थस्यपक्षेसाध्यस्यचनिश्चयपरामर्शोनुमित्योःपूर्वनियमतोनसंभवतीत्यउक्तंसंशयसाधारणमितिप्र
वकारेणविपरीतनिश्चयाभावस्यव्यवच्छेदः प्रत्यक्षस्थलेऽलौकिकप्रत्यक्षत्वमेववाधादिधीप्रतिबंधतावच्छेदका
मितिबंधतावच्छेदकमितिभावः नचप्रत्यक्षस्थलेऽलौकिकज्ञानत्वस्यविपरीतज्ञानप्रतिबंधतावच्छेदकत्वेऽपि प्र
पत्तेः संसृष्टत्वज्ञानहेतुत्वांतरकल्पनायामेवगौरवमितिवाच्यं इच्छापादितेजनकत्वेप्रत्यक्षस्थलेनतपरोक्षस्थल
इतिपृथक्तत्प्रतिबंधकतावाः भवतोप्यावश्यकत्वात्वाधाभावस्यशाब्दबोधादिहेतुतामतेशाब्दादिसाधारण्यात् प्र
मत्वादिप्रतिबंधकतायांयोग्यताज्ञानापेक्षयाग्रेर्वाधाभावस्यतदभाववाव्यवत्ताज्ञानाद्यभावस्यचनिवेशनीयत
यागौरवाच्चनचशाब्दबोधादौवाधादिधियोःप्रतिबंधकत्वेनहेतुतासंशयद्वितीयपक्षेऽस्ववाणादिरूपतदभावनिश्चयेत
दनंतरंशाब्दबोधाद्यापत्तिरितिवाच्यं यत्रविषयेसंशयद्वितीयक्षणेकथंचिद्विपरीतनिश्चयःशाब्दादिज्ञानकारणानांतत्रस
मवधानंचतत्रापत्तिवारणायवाधादिनिश्चयप्रतिबंधकतायाआवश्यकत्वेपिविषयविशेषेलाघवेनयोग्यताज्ञा
नहेतुतायानिष्फलत्वेहेतुतयाप्राप्तत्वात्नन्वेवंबाधप्रकरणसमयोर्हेत्वाभासत्वेवनस्यादित्यतआह अत्रसत्तावेतितत्से
वकारणीभूतस्यसृष्टत्वंज्ञानस्यैवअस्तिद्विविधस्वरूपासिद्ध्यादिविपरामर्शस्यानुमितिजनकस्यविरोधितयाहेत्वाभा
सत्वात्तद्वगेणान्वयः नन्वेवमप्रसिद्धसाध्यकानुमितिर्विलोपेतकोट्यप्रसिद्ध्यासाध्यसंशयासंभवादित्यतएवप्रत्यायति

गदा० माह । विलीयतां चेति ताद्रूप्यानुमितेरेकदेशिनामेवानुत्पत्तत्वादिति भावः अथ पक्षसाध्ययोः संसर्गज्ञानस्यानुमितिहेतुत्वे
पि अप्रसिद्धसाध्यविशेष्यकानुमितौ न तस्य हेतुत्वमपेयं न वा बाधज्ञानस्य साक्षादनुमितिप्रतिबंधकत्वं साध्यविशेष्य
९५ कानुमितौ साध्याप्रसिद्धेः प्रतिबंधकतयैव पक्षे बाधग्रहदशायां ताद्रूप्यानुमित्यापत्तेरनवकाशात् इति कथमप्रसिद्ध॰
साध्यकानुमानानुपपत्तिरिति चेन्न अभावसाध्यकस्थलपर्यंते साध्यप्रसिद्धिमनपेक्ष्यानुमित्युत्पत्त्या तत्र प्रतियोगिम
त्ताज्ञानरूपबाधग्रहस्य साध्यप्रसिद्धिं विनापि संभवात् साध्यसिद्धिप्रतिबंधकतया ताद्रूप्यबाधग्रहकालेऽनुमि॰
त्यापत्तेर्वारयितुमशक्यत्वात् ताद्रूप्यानुमितिस्वीकारेऽनुमितौ बाधज्ञानस्य साक्षात्प्रतिबंधकत्वस्यावश्यकत्वात्
एवमत्र पृथिवीतरभेदद्वित्यादिशाब्दबोधे पृथिवीतरभेदप्रकारकधर्मिसाध्यकानुमितौ च साक्षाद्बाधज्ञानस्य प्रतिबंधक
त्वमलमपि त्वाबाधज्ञानकाले तादृशशाब्दबोधताद्रूप्यानुमित्योर्वारणाय धर्मिणि पृथिवीतरभेदसंसर्गज्ञानस्य तद्भ
यसंसर्गावगाहिपरो ज्ञानकारणतायाश्चावश्यकत्वादितरभेदादिरूपाप्रसिद्धसाध्यकानुमितेरुपगमासंभवः अ
थ पृथिव्यां पृथिवीतरभेद इति साध्यविशेष्यकानुमितौ पक्षसाध्यसंसर्गज्ञानस्य हेतुत्वासंभवेपि न बाधज्ञानस्य पृ॰
थिवीतरप्रकारकज्ञान साक्षात्प्रतिबंधकताप्रसक्तिः पृथिवीत्वावच्छिन्ने तादात्म्यसंबंधेन पृथिवीतरप्र॰ ७२
कारकज्ञानस्य ताद्रूप्यस्याप्रसिद्धोदेऽधितताद्रूप्यसाध्यविशेष्यकानुमितेरव्याहतैव न च शुद्धभेदत्वावच्छिन्नेऽताद्रू
प्ये पृथिव्यवृत्तित्वज्ञानरूपबाधज्ञानसंभवात्तदानीं पृथिव्यामितरभेद इत्यनुमित्यादिवारणाय पृथिवीतरभेद
संसर्गज्ञानस्य ताद्रूप्यापरोक्षज्ञानहेतुत्वमावश्यकमन्यथा तादृशप्रवृत्त्यादिबुद्धेरनुमित्यादौ साक्षात्प्रतिबंधकत्व॰
तेऽगौरवप्रसंगात् तथा च कथं ताद्रूप्ये साध्यविशेष्यकानुमितिर्वाच्या ताद्रूप्यबाधादिग्रहदशायामुपदर्शितानु
मित्यादिवारणाय भेदत्वावच्छिन्ने पृथिवीसंसर्गज्ञाने त्वैनैव ताद्रूप्यापरोक्षज्ञानहेतुत्वोपगमात् पृथिवीतरभेदत्वरूपस्य॰

ध्यतावच्छेदकावच्छिन्नाप्रसिद्धिदशायामपि केवलभेदत्वरूपेण पृथिवीसंसर्गज्ञानात्तादृशानुमितेः संभवात्
न चैतन्मते साध्यसंशयाद्वेवानुमित्युपगंतव्यतया संशयस्यैव पक्षतात्वमिति साध्याप्रसिद्धिदशायां पक्षताविर
हेणानुमित्यभव इति वाच्यं संसंशयं विनापि साध्यनिश्चयकाले सिषाधयिषाबलेनानुमित्युपगतेः सिषाधयिषा
बलेनानुमित्युपगतेः सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वस्यायेयत्वात् साध्यविशेष्यकानुमितौ
साध्यप्रसिद्धेः प्रतिबंधकतयैव साध्याप्रसिद्धिदशायामनुमितेर्वारणासंभवात् तादृशानुमितौ संशयादिरूपपक्षता
हेतुत्वस्यानियामिकात्वाच्चेति चेन्न यत्र प्रतिबंधकबाधादिविरहे संभवः तत्र साध्यविशेष्यकानुमितौ संसृष्टत्व
ज्ञानहेतुताया नियामिकत्वानास्वीकारेऽपि पृथिव्यां जलभेदः ह्रदे धूमाभाववद्वृत्यादिज्ञाने संसृष्टत्वज्ञानहेतुता
यावश्यवर्जनीयतया तादृशानुमितेरसंभवेन तदभिप्रायेणैव विलीयतां चेत्यादिग्रन्थसंगतेः न च पृथिव्यां जलभेद इ
त्याद्यनुमितेः प्रामाणिकत्वे पृथिव्यां जलभेद इत्यादिशाब्दबुद्धौ संसृष्टत्वरूपयोग्यताज्ञानस्य हेतुत्वे शाब्दत्वमेव
जन्यतावच्छेदकं वाच्यं तादृशानुमितौ बाधबुद्धेरेव साक्षात्प्रतिबंधकत्वमुपेयं विषयभेदेन कार्यकारणभावभे
दस्यावश्यकत्वादिति कथं तादृशानुमिति विलय इति वाच्यं साध्यविशेष्यकानुमितेः सिद्धान्तिभिरनभ्युपगमा
त्तदनुरोधेनानुमितिविशेषे संसृष्टत्वज्ञानहेतुतामनभ्युपगम्य बाधादिबुद्धेः साक्षादनुमितिप्रतिबंधकत्वकल्प
नस्यायुक्तत्वमित्याशयेन तादृशानुमितिविलयस्योपगतत्वात् न च साध्यविशेष्यकानुमितेरनभ्युपगमे पृथिव्यां
जलादिभेदसाध्यकानुमानस्य पक्षैकदेशे साध्यप्रसिद्ध्यासंभवेऽपि पक्षव्यक्तिघटकेतदितरभेदानुमानस्यागतिरिति
साध्यविशेष्यकानुमितिस्वीकारश्चावश्यक इति कथं तदनभ्युपगम इति वाच्यं तादृशानुमित्यनभ्युपगमेऽपि साध्याविष
यकव्यतिरेकव्याप्यवगाहिपरामर्शाद्विशेषदर्शनरूपात्तादृशालौकिकप्रत्यक्षस्यैव प्रथमं स्वीकारसोपपत्तयातदात्मक

गदा. विशेषणतावच्छेदकप्रकारकज्ञानात्तदनंतरक्षणे साध्यविशेषणकानुमितिसंभवेन सामंजस्यात् विशिष्टसाध्यप्र
सिद्धावपि अभावत्वादिसामान्यलक्षणया तेन रूपेण साध्यज्ञानस्य पूर्वं संभवेन साध्योपनायकज्ञाननिर्वाहात्तत्प्रथ
९८ मं साध्यविशेषणकालौकिकप्रत्यक्षसंभवात् इदं तु बोध्यं उक्तरीत्या साध्यविशेष्यकानुमितेरनभ्युपगमेपि निर्वा
हे तादृशानुमितिसामग्र्यंतराकल्पनप्रयुक्तलाघवानुरोधेनैव तदभ्युपगम उचितः किंतु संसृष्टत्वज्ञानहेतुत्वोपरो
धः न च साध्यविशेष्यकानुमित्यभ्युपगमेपि तदुत्तरकालीनसाध्यविशेषणकानुमित्यनुरोधेन ज्ञानत्वहेतुताका
व्यतिरेकपरामर्शादेर्हेतुसामग्रीकारणताधिक्याविरहान्न गौरवमिति वाच्यं तदभ्युपगमे तत्र साध्यप्रसिद्धेः
प्रतिबंधकताकल्पनाधिक्येन गौरवात् एवं भेदादिधर्मिकेतरावच्छिन्नप्रतियोगिसंसर्गात्मकसाध्यसंसर्गसंबंधे ज्ञानत्वसं
सृष्टत्वज्ञानहेतुतानतेपि साध्यविशेष्यकानुमितिनिर्वाहः विशेषणतावच्छेदकप्रकारकनिश्चयविरहेण साध्यतावच्छे
दकविशिष्टप्रकारकानुमित्यसंभवादिति एतेन संसृष्टत्वज्ञानस्यानुमितिहेतुत्वे महानसीयेतरवह्न्यभाववा
न्पर्वत इत्याकारिकायां विशेष्ये विशेषणमिति रीत्या जायमानायामनुमितेरनुपपत्तिः तत्र महानसीयत्वविशिष्टवह्न्या
देः प्रागसिद्धत्वात्तत्संसर्गज्ञानाभावात् तादृशानुमितिर्भविष्यतीति वाच्यम् तथा सति विशिष्टविशेषणकानुमितौ विशिष्ट
संसर्गज्ञानाहेतुत्वे महानसीयवह्निर्नास्तीति बाधग्रहदशायां विशिष्टविशेषणकानुमितिवारणाय बाधग्रहस्य साक्षा ७५
त्प्रतिबंधकत्वस्वीकारापत्तिरिति परास्तं महानसीयवह्निमान् पर्वत इति वाक्यवशाद्विशेष्ये विशेषणमिति रीत्या जाय
मानः शाब्दबोधो यथावांतरवाक्यार्थभूतमहानसीयवह्न्यादिबोधं विनापि वह्नौ महानसीयत्वसंसर्गात्मकात्प
र्वते महानसीयवह्न्यादिबोधं विनापि वह्नौ महानसीयत्वसंसर्गात्मकात्पर्वते महानसीयत्वविशिष्टतापन्नक
वह्निकोटिकसंशयरूपयोग्यताज्ञानान्निर्वहति तथा तादृशसंशयादेवोक्तस्थले महानसीयवह्निमान्पर्वत इत्यनु

मितिनिर्वाहात् महानसीयत्वविशिष्टवह्निनिर्णयं विनापि प्रतियोगिनिश्चयरूपकारणाभावान्महानसीयवह्न्या-
द्यभावभानासंभवेन नोक्तसंशयः संभवतीति चेन्न प्रागुक्तस्थले विशेषानुयोगित्वस्य स्यात् साध्यसंशयादिनिपक्षतायां-
गमकत्वाद् तत्र द्वितीयक्षणे विनश्यदवस्थसंशयादनुमितेरेतन्मतेऽपि निर्वाहात् संशयानन्तरसमये इति सिषाधयिषा-
परामर्शाद्द्वितीयक्षणे यत्रानुमितिस्तत्र सिषाधयिषासंवलितज्ञानं सिषाधयिषाविरहसहकृतं प्रतिबन्धकमिति तदुपगमानि-
हाय सिषाधयिषोपादानं परामर्शानन्तरोत्पन्नसंशयादेव तत्रैतन्मतेऽनुमितिर्भविष्यतीति शङ्कां निराकरोति सती-
ति ननु भ्रमत्वाग्रहविशिष्टबाधनिश्चयत्वेन प्रतिबन्धकत्वापेक्षया प्रमात्वनिश्चयविशिष्टबाधज्ञानत्वेन प्रतिबन्धक-
त्वमेव युक्तं तदभाववतीति तत्प्रकारकत्वरूपभ्रमत्वाग्रहापेक्षया तद्वति तत्प्रकारकत्वरूपप्रमात्वग्रहस्य लघुत्वात्
तन्मते प्रमात्वज्ञाने निश्चयत्वस्य संभवन्मते बाधज्ञाने निश्चयत्वस्य निवेशनीयतया लाघवात् अभावांशे प्रमात्वेन निर-
श्चीयमानबाधसंशयोऽपि व्याधनिश्चयकार्यकारी एवं च बाधग्रहप्रमात्वेन तत्प्रमात्वनिश्चयसत्त्वेऽप्यनुमीयमानानु-
मितिरप्युपपद्यते बाधधीप्रमात्वस्य हेतुत्वाभासतापि विशेष्यविशेषणभावे विनिगमनाविरहेण प्रमात्वनिश्चयस्या-
पि प्रतिबन्धकत्वात् यदि बाधज्ञानाविशिष्टतत्प्रमात्वग्रहेऽनुमितिप्रतिबन्धकेन तत्प्रमात्वविषयकत्वसत्त्वेनातिप्रस-
क्ततया तस्यन्दोषता तदापत्तानिष्टसाध्याभावादिविषयकत्वस्यापि प्रतिबन्धकतातिप्रसक्ततया तस्यापि दोषत्वा-
संभवः तत्संभवस्तु भ्रमितसाध्याभाववत् पक्षादेरेवेति शङ्कां निराकरोति एतेप्रमात्वेनाज्ञायमानेऽपि बाधग्रहो-
प्राहूमनसादिज्ञानानुत्पादानुभवेनाऽऽलोचनमपि नास्तीत्याह विपरीतमेव चेति तदभावनिश्चयत्वघटकतद-
प्रकारकत्वापेक्षया प्रमात्वनिश्चयत्वघटकस्य तद्वति तत्प्रकारकत्वाभावप्रकारकत्वस्यातिगुरुतया भ्रमत्वज्ञानभा-
वस्यावच्छेदकतामतेऽभावद्वयनिवेशाधिकस्याकिंचित्करत्वादिति भावः भावसाध्यकस्थले बाधग्रहभ्रमत्वघटक

गद॰ साध्याभावाभावस्य साध्यात्मकस्य तद्रूपेणैव निवेशात् तादृशस्य भ्रमत्वस्य साध्याभाववति साध्याभावप्रकारकत्वरूपप्रमा
त्वापेक्षया लघुत्वेनातिस्फुटतरलाघवमित्याह स्फुटतरं चेति गोत्वादिप्रकारकमिति एतेन वक्ष्यमाणं प्रमात्वज्ञानी
९७ यनिश्चयत्वापेक्षया वाच्यग्रहनिश्चयत्वस्य विशेषोपि दर्शितः नच प्रमेयत्वादिना गोत्वप्रकारकनिश्चयसंग्रहाय गोत्ववा
वच्छिन्नाप्रकारकत्वं निवेश्यं तथा च सति गोत्वाभाववान्नवेति संशयस्य धर्मिणि गोत्वाभावाभावत्वेनैव गोत्वप्र
कारकस्याव्यावृत्तिरिति वाच्यं तादृशसंशये धर्मिणि गोत्वत्वेन गोत्वस्य नियमतो भानोपगमात् तेन रूपेण तदुप॰
स्थितिसत्त्वे तेन रूपेण तद्वत्त्वभाने बाधकाभावात् गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वाद्यप्रकारकेति
श्चादिपदाद्गोत्वाद्यभाववद्विशेष्यकगोत्वाद्यभावप्रकारकत्वरूपप्रमात्वाभावपरिग्रहः भ्रमत्वाप्रकारकत्वाभिधाने तु भा
वद्द्वयकोटिकसंशयाभ्युपगमेन ननु भावरूपं साध्याभावज्ञानस्य प्रतिबंधकतायां तदभाववति तत्प्रकारकत्वरूपभ्र
मत्वतद्वति तत्प्रकारकत्वरूपप्रमात्वाभावयोः समशरीरतया विनिगमनाविरहेण द्वयोरेवाग्रहो निवेशनीयो यत
दपेक्षया च भ्रमत्वाभावरूपप्रामाण्यतो लघुशरीरतद्वति तत्प्रकारकत्वरूपप्रमात्वग्रहस्यावच्छेदकत्वे लाघवं भा
भद्वयकोटिकसंशयानभ्युपगमाज्ज्ञाननिश्चयत्वशरीरे प्रमात्वाभावाप्रकारकत्वमेव निवेश्यं नेन तु भ्रमत्वाप्रकारक॰
त्वमिति नतदुभयवेशनिबंधनगौरवमिति शेषः कार्यां प्रतिबंदिमाह उक्तप्रायं चेति उक्तप्रायं उक्तकल्पं पूर्वं साकांक्षा
ज्ञानहेतुप्रमात्वनिश्चयविशिष्टानां तेषामिति प्राक्पदं प्रतिबंधकानां प्रतिहेतुपरामर्शादीनां कारणानां आकांक्षाज्ञान॰ ७१
परामर्शादीनां तथात्वापत्तिरिति यथायोगं प्रतिबंधकत्वस्य कारणत्वस्य चापत्तिरित्यर्थः तत्स्वग्रहाप्रामाण्यग्रहेधा
रायाः निश्चयेपि निश्चितप्रामाण्यकत्वस्य तत्रापि वक्तव्यत्वापेक्षया अनवच्छिन्नप्रामाण्यग्रहधारायाः कार्ये प्रतिबंधादाव
पेक्षितश्चयोपादिनापेक्ष्यते तत्त्वं तदा प्रकृतेपीति भावः अगृहीताप्रामाण्यकत्वेन प्रतिबंधकतामते येन तदुपटकाप्रामा

ण्यग्रहे निश्चिताप्रामाण्यकत्वं विशेषणं तच्चागृहीतप्रामाण्यकत्वं विशेषणमित्येवं क्रमेण विशेषणपरंप
रायाश्चानवस्थितिरितित्वं नाशंकनीयं प्रतिबंधकीभूतनिश्चयविशेषणागृहीतप्रामाण्यकत्वघटकाप्रामाण्य
ग्रहनिश्चिताप्रामाण्यकत्वानिवेशनात् तत्राप्रामाण्यनिश्चयदशायां कार्यवारणाय तदप्रामाण्यनिश्चयविशि
ष्टविपरीतनिश्चयादीनां च गृहीताप्रामाण्यकत्वानिवेशनात् तत्राप्रामाण्यनिश्चयदशायां कार्यवारणाय तदप्रा
माण्यनिश्चयविशिष्टविपरीतनिश्चयादीनां च गृहीताप्रामाण्यकत्वानवच्छिन्नानां प्रतिबंधकत्वं तस्यैव कल्प
नीयत्वात् तादृशाप्रामाण्यनिश्चये चानिश्चिताप्रामाण्यकत्वविशेषिताप्रामाण्यग्रहाभावस्यैव विशेषणत्वो
पगमात् तद्वैशिष्ट्यनिवेशफलस्य प्रतिबंधकतान्तरकल्पनयोपपादनात् ह्रदोयं धर्मिणि अयं स्थाणुरित्यादि
निश्चयानंतरं करादिरूपविशेषदर्शने सति नायं स्थाणुरित्यादिप्रत्यक्षोत्पत्या विशेषादर्शनविशिष्टस्यैव विपरीतनि
श्चयस्य प्रतिबंधकतावाच्यतया च परामर्शसत्वे विपरीतनिश्चयेनानुमित्यप्रतिबंधादृष्टसत्वे च कारणाभावा
देवानुमित्यनुत्पत्या बाधस्य न हेत्वाभासतेति शंकानिरस्यति नचेत्यादिना विशेषदर्शनेन तत्वज्ञानानंतरमेवेति
विपरीतनिश्चयानंतरोत्पन्नविशेषदर्शनाधीनविपरीतनिश्चयनाशे सत्येवेत्यर्थः क्षणमात्रस्यातिरिक्तकालत
यात द्विलंबेन फलोपगमेऽनुभवविरोधविरहात् येपूर्वं तत्त्वतोऽभ्रमसत्वेपि विशेषदर्शनबलात् प्रत्यक्षमंगी
कुर्वंति तेषामपि परोक्षज्ञानप्रतिबंधकतायां विशेषादर्शनवैशिष्ट्यनिवेशो नानुमतः विपरीतनिश्चयसत्वे
सति विशेषदर्शने शाब्दादिबोधानुपगमादिति बाधस्यानुमितिविरोधित्वं ध्रुवमित्याह परैरिति प्रत्यक्षविशेषपदेन
रिंद्रियजन्यप्रत्यक्षविशेषपदेन तदिंद्रियजन्यप्रत्यक्षपदे वा विपरीतनिश्चयविशेषस्यैव तदिंद्रियजन्यदोषविशेषजि
न्यविपरीतनिश्चयस्यैव तत्त्वात्तोपगमाविशेषादर्शनविशिष्टत्वेन प्रतिबंधकत्वोपगमात् विशेषपदोपादानप्रयोज

गदा॰ नमाह नचेति दोषविशेषजन्यविपरीतज्ञानसत्वेतन्निवर्तकत्वेन विशेषदर्शनस्य किंचित्करतया तत्सत्वेपि
समानेंद्रियजन्यप्रत्यक्षानुत्पत्त्या विशेषादर्शनविशिष्टत्वमपहाय दोषस्यैव तस्य प्रतिबंधकत्वमिति दोषविशेषविशेष
विशेषाजन्यत्वं विशेषपदार्थं तन्मते भावितं उक्तस्थलेपि अयं स्थाणुर्वेति विभ्रमोत्पत्तिकालेऽयं न स्थाणुरिति प्रत्य
९४ त्वावारणाय विशेषादर्शनविशिष्टदोषप्रतिबंधकतायाः आवश्यकत्वेन द्विविध एव विपरीतज्ञानप्रतिबंधकत्वम
फलमिति बोध्यं ननु यत्र विपरीतनिश्चयानंतरं तन्निवर्तकविशेषदर्शनं तत्र विशेषदर्शनस्योत्पन्नविपरीतज्ञा
ननाशकतया विपरीतज्ञानं तदोत्पादविरोधितया च प्रत्यक्षनिश्चयोपयोगित्वेपि यत्र शंखत्वादिदर्शनकाले
दोषविशेषजन्यः पीतत्वादिभ्रमस्तत्राप्यनुभवसिद्धे मानसादौ वपि पीतत्वादिनिश्चये शंखत्वादिदर्शनस्योपयोगित्वं वि
शेषदर्शनस्योत्पत्तिजनकत्वं विना न निर्वहतीत्यत आह उपयुज्यते चेति अप्रामाण्यग्राहकत्वेनेति विशेषदर्शनकालो
न विपरीतज्ञानानुव्यवसायेन तज्ज्ञानस्य व नितद्विपरीतावगाहित्वभानान्नेन हेतुना तत्राप्रामाण्यानुमितिसंभवादिति
भावः यद्यपि यत्रोक्तक्रमेणाप्रामाण्यानुमितिस्तत्रानुव्यवसायादिनाविनष्टत्वादेव विरोधितानसंभवति तथा
पि तत्समानविषयकज्ञानांतरस्याविरोधितया प्रामाण्याग्रहोपयोग इत्यवधेयं साध्याभावविशिष्टपक्षादेर्बोध
त्वे अयं साध्याभाववति पक्ष इत्यादि पूर्वपक्षग्रंथेन दर्शितानुपपत्तिमाशंक्य निराकरोति नचैवमित्यादिना अज्ञा ७३
नलक्षणाजनकज्ञानभावरूपाग्रहे चेति पक्षे हेतोरित्यनुषज्यते व्यभिचारधीरेवेति उभयथापि अनुमित्यनु
त्पादेवाधीः किंचित्कर इति शेषः व्याप्तिग्रहपरामर्शयोर्भेदादिति तथा च पक्षे हेतुग्रहेपि तस्य साध्याभाववत्त्वज्ञा
नाभिन्नतया व्यभिचारावगाहिता साध्याभाववद्वृत्तित्वविशिष्टस्य व्यभिचारत्वात् साध्याभावविषयकज्ञानस्य
विशिष्टाविषयकत्वात् एवं साध्याभावज्ञानस्यापि हेतौ तदधिकरणावृत्तित्वानवगाहितया न तत्र व्यभिचार

वगाहित्वाद्विरुद्धोदोषघटकपदार्थावगाहिनानाज्ञानस्य च न विरोधितेति बाधादेव तत्रानुमित्यनुत्पाद इति भावः
यत्र परामर्शे लौकिकसंनिकर्षाद्दोषविशेषाद्वा पक्षे साध्याभाववत्त्वभानं तत्रापि न व्यभिचारग्रह अभेदेपीति।
तयोरित्यादिः इति ग्रहस्येति इत्याकारकस्यैव तत्रत्यबाधग्रहस्येत्यर्थः परस्परोपरागानवगाहिन इति हेतौ साध्या
भावविशिष्टधर्मिवृत्तित्वस्य साध्याभावविशिष्टधर्मिणि हेतुमत्त्वस्य चानवगाहिन इत्यर्थः एतच्च व्यभिचारवि
षयकत्वे हेतुगर्भविशेषणं विशिष्टव्यभिचारभाने चैवंदृष्टत्वदूषकनानापदार्थावगाहिनानाज्ञानस्यैव विषयीका
लितसमूहालम्बनस्यानुमित्यविरोधितया बाधप्रकानुमितिविरोधीति भावः ननु तत्र विशिष्टव्यभिचारभा
नेकिं बाधकमित्यत आह एकत्रेति एकनिष्ठयागोचरत्वादिति तदुभयभाने निश्चयाभावेनैवानुमित्यनुत्पादादि
भावः ननु विशिष्टस्य साध्याभाववद्वृत्तित्वादेरिव तद्धर्मिणः साध्याभाववत्त्वादेरनासहितं तद्धर्मिणो हेतुमत्त्वादे
कमपि व्यभिचारः विषयीकालीनं तदुभयज्ञानादप्यनुमितिप्रतिबन्धस्यानुभविकत्वादिति उक्तस्थले व्यभिचारः
विषयीकालीनं तदुभयज्ञानादप्यनुमितिप्रतिबन्धस्यानुभविकत्वादिति उक्तस्थले व्यभिचारनिबन्धन एवानुमित्यनु
त्पाद इत्याशंक्याह पूर्वं चेति तृतीयलिङ्गपरामर्शसमवधाने सति परामर्शाविघटकतयैवानुमितिविरोधितो व्यभि
चारस्य दूषणत्वे व्याप्त्यादिग्रहस्यानुमित्यनुत्पादानिर्वाहकत्वादित्यर्थः तथा च लिङ्गपरामर्शसमवधाने सति पक्षे
साध्याभावग्रहे बाधादेवानुमितिप्रतिबन्ध इति तस्य हेत्वाभासतेति भावः यादृशबाधग्रहकाले व्यभिचारज्ञाने
न निष्क्रम्येति न च न हि तदृहेतादृशबाधग्रहे व्यभिचारबुद्धिरावश्यकीति धर्मिणि साध्याभाववत्त्वस्यैव साध्ये
धर्मवृत्तित्वस्य व्यभिचाराबुद्धिरावश्यकीति धर्मिणि साध्याभाववत्त्वस्यैव साध्येधर्म्येवृत्तित्वस्य व्यभिचाराग्र
कत्वादिति भावः साध्याभावबुद्धेः प्रमात्वस्य व्यभिचारज्ञानोपजीवज्ञानविषयतया हेत्वाभासत्वमिति।

ग.दा. यत्तल्लोकं तद्दूषयितुमुपन्यस्यति यत्त्विति निश्चयत्वरूपत्वे तत्कार्यकारित्वेऽतिप्रसंगः गृहीताप्रामाण्यकज्ञानस्यापि
स्य तथात्वप्रसंगः प्रमात्वनिश्चय एवेति विरोधिविषयकोपीति शेषः प्रतिबंधक इति अनुमितावित्यादिः प्राथमिकत्वं
९९ ज्ञानविकल्पामात्यमित्युपजीव्यत्वादिति नचेत्यादिना व्यभिचारज्ञानस्य साक्षादनुमितिप्रतिबंधकत्वमेव व्याघातित्वं व्याप्तिज्ञान
प्रतिबंधकतायाश्च विवादात् अन्यथा व्यभिचारस्य हेत्वाभासतानुपपत्तेः तस्यापि साध्याभावबुद्धिप्रमात्वनिश्चयस्या
ल्पत्वादिति व्यभिचारज्ञानस्य एवेति विशेषसाध्याभाववद्धेतुमत्ज्ञानविषयावगाहिज्ञानाय त्रानुमित्यनुत्पाद इत्यत्र प्रतिबंधक
ताकृत्येति भावः उपजीव्यत्वमपि दूषयति अगृहीतेति अन्यथा निश्चितप्रामाण्यकत्वेन तथात्वे अप्रामाण्यग्रहवैयर्थ्य
मुद्रयति अप्रामाण्यशंकेति क्वचिदिति अत्र कोटकपरिस्थितिरूपकरणसमवधानं तत्रेत्यर्थः क्वचिदित्यनेन ईदृशेपर
योगितायामनवस्थानास्तीति सूचितं व्यभिचारज्ञानस्य साध्याभावांशे निश्चयत्वापेक्षायां प्रमात्वनिश्चयापेक्षासेव
नास्तीत्यतोपि न प्रमात्वनिश्चयोपजीव्यतेत्याह संशयेति मूलोक्तानि कतिपयदूषणान्युद्धृत्य स्वोद्भावितं [illegible]कन्या
पन्यस्यति यत्त्विति बाध इति असंकीर्णरत्यादिः किंचेत्यादिः किंचित्यादिमूलोक्तदूषणमुद्रयति नचेत्यादिना विशि
ष्टसाध्याप्रसिद्ध्या अनुमितेः सर्वं कांचनमयत्वरूपविशेषणतावच्छेदकविशिष्टसाध्यविशेषणकानुमितिप्रसक्तिः ९९
तथा च काकारणबाधादेव तत्र विशिष्टानुमित्यनुत्पादसंभवान्न बाधोऽकिंचित्कर इति भावः विशेष्ये विशेषणमिती
त्या अयं भावः विशिष्टविशेषणज्ञानं द्विविधं तदुपलक्षितप्रतियोगिकवैशिष्ट्यावगाहि तद्विशिष्टप्रतियोगिक
वैशिष्ट्यावगाहि तद्विशिष्टप्रतियोगिकवैशिष्ट्यावगाहि च आद्ये विशेषणज्ञानासंसर्गाग्रहयोरेवापेक्षा न तु विशे
षणतावच्छेदकप्रकारकधियोपि अतएवावांतरवाक्यार्थज्ञानं विनैव महावाक्यार्थज्ञानं संगच्छते इति नचैव
मपि सर्वं विशिष्टाप्रसिद्धेव विशिष्टप्रतियोगिज्ञानाभावाद्बाधग्रहो न संभवतीति स्वरूपतो बाधस्याकिंचित्करत्वेनेति

वाच्यं प्रतियोगिज्ञानस्य विशिष्टविशेषणज्ञानविधयैव विशिष्टयोगिविशेषिताभावबुद्धौ हेतुत्वात् कांचनमयत्वे
न वह्निर्नास्तीत्याकारिकायां स्यात्तेनैव प्रतियोगितावच्छेदकतया कांचनमयत्वाद्यवगाहित्वाभावबुद्धौ तद्रूप-
ताविरहात् प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वभानमिति नियमस्य व्यधिकरणधर्मावच्छिन्नाभा-
ववादिनो नञ्मतत्वात् एवं कथं विशिष्टसाध्यज्ञाने नापि बाधग्रहो विशिष्टविषयकानुमितिकारणं तत्समवधाने च
संभवतीत्यपि बोध्यं ननु विशिष्टज्ञानानपेक्षया कथं विशिष्टज्ञानसंशयत्वाद्वा बाधग्रहसंभवे व्यभिचारोपि गृहीत इति
तत्प्रवाऽनुमितिर्न भविष्यति किं बाधेनेति दूषणान्तरं तत्र कांचनमयत्वावच्छिन्नवह्निभावरूपबाधतादृशाभावबहुत्रित्व-
रूपव्यभिचारयोः कांचनमयत्वविशिष्टवह्न्यनुमितिविरोधित्वे दर्शयति शुद्धसाध्येति शुद्धसिद्धविशिष्टसाध्यानु-
मितौ तेन सर्वोज्ञातकांचनमयत्वादिविशेषितवह्न्याद्यनुमितिसंभवादित्यर्थः तदभावः कांचनमयत्वाद्यवच्छिन्नव-
ह्न्यभावः बाधोस्तु विशिष्टसाध्ये साधनीये बाधरूपप्रकृतहेतुदोषोस्तु विशिष्टसाध्ये साधनीयबाधरूपप्रकृतहेतु-
दोषोस्तु विशिष्टसाध्यव्याप्तिग्रहविषयतयैव दृष्टनयादि सहकृतशुद्धसाध्यव्याप्तिग्रहविषयतयापि प्रकृतहेतो विशि-
ष्टसाध्यवत्वभानप्रयोजकतया बाधग्रहदशायां तस्य तदनुत्पादकतया बाधग्रहप्रयुक्तत्वात् तादृशबाधग्रहस्य शुद्धसा-
ध्यानुमित्यविरोधित्वेति शुद्धसाध्ये साधनीये तस्य दोषत्वानुपगमेन न तन्निविरहमिति भावः तेन रूपेण कांचनमयत्वा-
दिसहितवह्नित्वादिना तथा व्यभिचारः कांचनमयत्वाद्यवच्छिन्नवह्न्यादिव्यभावव्यवहृत्तित्वं न दोषायेति पक्षानि-
विष्टहेत्वधिकरणमात्रे कांचनमयत्वाद्यवच्छिन्नवह्न्याद्यभाववत्ताग्रहेपि पक्षे कांचनमयत्वाद्यवच्छिन्नवह्न्याद्यनुमि-
त्यनुपगमेन शुद्धानुमितौ सामान्यव्यभिचारज्ञानस्य विरोधित्वेपि कांचनमयत्वादिसहितवह्नित्वाद्यवच्छिन्नविधेयताकानु-
मितावेव तथा व्यभिचारधियो विरोधित्वात् कांचनमयत्वाद्यवच्छिन्ननिरूपितव्याप्तिज्ञानाजन्यानुमितौ कांचनमय-

त्ववह्नित्वयोः प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहिबाधग्रहस्यैव प्रतिबंधकतया नोक्तज्ञानबाधस्य विरोधि-
तेति कात्वे सद्धेत्वाभासः न चोभयधर्मप्रकारेण साध्यानुमित्युपकधर्मावच्छेदकत्वमवगाह्यान्यत्र च प्रतियोगि-
तायाः सामानाधिकरण्यावगाहित्वेनैव प्रतिबंधकतेति वाच्यं तथा सति कांचनमयत्वेन महानसीयवह्निर्नास्ती-
ति धियोपि कांचनवह्निमानित्यनुमितिविरोधितापत्तेः अधिकेत्वित्यादिना येन रूपेण समानाधिकरण्यभानस्य प्रति-
बंधकता मायते तत्त्वात् तेन च पक्षांशे स्वरूपसंबंधरूपस्यापरांशे चानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्यावगाह-
ने प्रतिबंधकत्वेन वैरूप्येण प्रतिबंधकतायाः क्लृप्तत्वात् तावतापि कांचनमयत्वेन वह्नित्वेनोभयसामान्यं।
नास्तीति ज्ञानस्य कांचनमयवह्निमानित्यनुमितिविरोधितायास्तु वारत्वाच्चैवं प्रतियोगिविशेषणतया भासमाना-
धिकरणतयाप्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वावगमने कांचनमयवह्निर्नास्तीत्यादिभ्रम-
स्य कांचनमयत्वेन वह्निर्नास्तीत्यादिभ्रमस्यापि कांचनमयत्ववह्नित्वयोः प्रतियोगितावच्छेदकतापर्याप्त्यभिमानो-
गीकारात् न च मिलित्वाऽभासमानयोः प्रतियोगिविशेषणतयावच्छेदकत्वेन भासमानयोरुभयोर्मिलितयोः
प्रतियोगितावच्छेदकतापर्याप्त्यभिमानं कांचनमयो नास्ति वह्निर्नास्तीत्यादावेव विशिष्टमिति वाच्यं पक्षस्य प्रति-
योविषयतामात्रमवच्छेदकतया भासमानयोरविवक्षोभयधर्मावच्छिन्नप्रतियोगिताकत्वविषयतयोरभावनिवेशे कवि-
षयतानिरूपितत्वं तयोरपि मिलितयोः प्रतियोगितावच्छेदकतापर्याप्त्यभिमानोपगमादित्यलं पल्लवितेनाथान्यप्र-
त्यावृत्तीय स्थितेन सकलभानेत्यादि मूलोक्तमनुमितेरुपनीतभानत्वग्रहणाद्य इति उपनीतसकलभाने वेति प्रत्य-
क्षेपि तत्त्वमितितया च प्रत्यक्षमात्रस्यैवानुमितिमात्रस्यापि किंचिदंशे उपमानानमिष्टमेवेति भावः तावता च वादि-
नोन निग्रह इत्याहानुपरंसो वा इति वादिनो पक्षिपासिद्धिरनुहेपयनदंशोऽश्रयः अनुमितेः प्रामाण्यमिति वादिनोऽपि हि

सेधादिज्ञानानुमितेश्च प्रमात्वमित्यर्थः नवादिविजयप्रयोजकमिति नवादिकर्मकप्रतिवादिजयप्रयोजकमित्यर्थः प॰
त्सिद्धिर्वादिनोऽदृष्टान्ततत्साधनपरिपाटीदृष्टत्वाभासस्यैव निग्रहस्थानत्वादुद्देश्यपोषोऽनुमितेरप्रामाण्यएवतादृ॰
शदोषसंभववादिति भावः एतत्समाधानमपि मूले शंकाक्रमेणाभिहितमित्यवधेयं मूलस्थाया अनुमितानुपनी
तभानस्याप्रामाणिकत्वाशंकायाः विवरणेन वैधकोत्तरप्रदर्शनेन च मतमेतन्निराकरोतीति तन्त्रेत्यादिना प्रसक्तेऽपि ज्ञा॰
नेयदिविशेषणज्ञानादिसह्रयाह्रत्वविषयभासकं तदानुमितावपि तस्य तथात्वं दुर्वारमेवविशिष्टानुभावत्वाद्यव॰
वच्छिन्नं प्रत्येव विशेषणज्ञानादेर्हेतुतया अनुभवसामान्य एव तस्य विषयभासकतासंभवात् अतएव ज्ञानस्य सं॰
निकर्षविधया तथात्वं व्यवस्थाय पतिप्रत्यक्षेऽपि भासत्वविशेषादिति किं ज्ञानस्य सन्निकर्षत्वेनेति प्रतिबंधुद्धारायाह उ
पनीतभानस्येति उपनीततत्तादिविषयकत्वस्येत्यर्थः प्रतिभिज्ञानोदाविन्यादिना च घटो नास्ति स एवभिन्नं वदनामित्या॰
दिप्रत्यक्षस्य परिग्रहः उपनयोगीति ज्ञानमयोत्यर्थः सन्निकर्षः विषये मनसः सन्निकर्षः कल्पनदृत्यस्य विषयभास॰
कत्वेनेत्यादिः तद्धि लाघवेनोपनीतस्यानुमितौ भानं प्रत्यक्षत्वस्य सन्निकर्षजन्यतावच्छेदकत्वादिति भावः ननु एतूपना
पकज्ञानस्य प्रत्यक्षत्वे कार्यतावच्छेदकं तथापि विशेषणज्ञानबाधाद्यभावबलादनुमितावुपनीतभासनमित्य
तआह अनुमितावितिनसामग्र्यंतरकालानेति अयं भावः विशेष्यभाकसामग्रीतिरपेक्षं केवलबाधाद्यभावसहितं
विशेषणज्ञानविधया देहभूतं ज्ञानं न स्वविषयभासकं अप्रतिसंधानात् विशेष्यभासकसामग्रीव प्रत्यक्षानुमित्योरन
नुगतेति प्रत्यक्षसामग्रीसहितमेव तत्तथा न तु अनुमितिसामग्रीसहितं तादृशस्य तत्त्वे कल्पकाभावात् चकाच॰
नमयत्वव्याप्यवान्वह्निः कांचनमयवह्निव्याप्यवानयं तद्रूपादिपरामर्शघटितवह्न्यादिभासकानुमितिसामग्रीतो
पि वह्न्यादौ कांचनमयत्वादिविशिष्टबुद्धिर्नत्वयं नहीति विशेष्यभासकानुमितिसामग्रीसहितमपि कांचनमयत्वरूपवि

ग.टी. षेण ज्ञानादिकं स्वविषयभासकमिति चेत् भवतु तादृशमपि तत्तद्विशेषणज्ञानादिकं तथावक्तिव्याप वान् एवं
त इत्यादि कांचनमयत्वादिविषयकत्वावच्छिन्नाजनकपरामर्शसहितकांचनमयत्वादिज्ञानस्याविषयभासकत्वं
तावतापि न सिद्ध्यति सर्वसाधारणं वह्न्यादिभासकसामग्रीत्वतः सामकानुमितिसामग्रीत्वं चैकं तुच्छं च तत्त्वं च त्वेपि न
101 नेन रूपेण हेतुत्वेनेति तेन रूपेण न सहकारिता संभवति फलासिद्धिमेव विवृणोति न खलिति न तु कांचनमयवह्नि
भान्यथैव तदित्यादि मानसे तद्विषयोपस्थितिबाधविशेषाभावादिघटितापासामग्रीविशिष्टविषयकत्वप्रयोज-
कासाकांचनमयत्वाद्युपस्थितिबाधविशेषाभावसहितावह्न्यादिव्याप्यवत्तापरामर्शसमवधानकालेप्यप्र-
तैव तादृशज्ञाने मानसत्वप्रयोजिकायामेव सामग्र्यामनुमितिसामग्रीरूपप्रतिबंधकाभावनिवेशात्तद्विशिष्ट
विषयावगाहिता प्रयोजकरूपे प्रयोजनविरहेणानंतर्भावात् न च तादृशसामग्रीप्रविष्टविशेष्यज्ञानस्य मा
नसानुमित्योरेकरूपेण हेतुत्वेनेति कथं तादृशसामग्र्या अनुगतरूपेणोभयत्र विशिष्टविषयकत्वप्रयोजकतेति
वाच्यं प्रत्यक्षनिष्ठोपनायकज्ञानजन्यतातायामपि अनुमितिसाधारणलौकिकज्ञानत्वस्यैवावच्छेदकत्वोप
गमेन मानसानुमित्योरेकरूपेण विशिष्टज्ञानहेतुत्वानपायात् न च प्रत्यक्षत्वापेक्षयाश्रलघ्वोर्ज्ञानत्वस्योपनायक-
ज्ञानजन्यतावच्छेदकत्वे नियामकाभावाल्लघुशरीरत्वेपि विनिगमनाविरहेणोभयोस्तथात्वस्यावश्यकत्वादित्याशंक्यानु-
मितानुपनीतभाने बाधकमाह अभिधेयत्वादिनेति इदमापाततः प्रमेयत्वाद्यनुमितिः सर्वैव स्यात् तदुपस्थितिसत्त्वे
अनुमित्यनुव्यवसायदशायां पर्वतादेः मानसत्वमनुपनीतभानस्य सर्वमतप्रसिद्धत्वात् तथा वह्न्याद्यंशेपि प्रवृत्तेः लौकिकवि-
लंबेनावश्यकत्वात् यदा च तदभावस्याप्युपस्थितिः तदा तस्यापि प्रत्यक्षे तत्तद्धर्मिगततया भानसंभवेन यथावत्तत्र
अयथार्थप्रत्यक्षं तथानुमितावपि तदभावस्य तथाभानेन न तत्राप्ययथार्थानुमितिरिति प्रसज्यतेति प्रसंगो समाधानं तल्ल-

एवंतद्व्याप्यवज्ज्ञानाजन्योपस्थितिबाधाभावमात्राधीनेतत्रविशेष्येऽप्रामाण्यशंकासंभवेननतदर्थंप्रवृत्तिरि
त्यपिसमाधानंसममेवपक्षेऽसत्यपिबाधाद्यवतारेउपस्थितानांसर्वेषांधर्माणांनसकलोपस्थितधर्मिभानमि
तिपद्यत ज्ञानव्यक्तिनोपनयधर्मिणांयद्यद्धर्मस्यउपनीतभानंप्रामाणिकंतत्तत्ज्ञानव्यक्तेरनन्तर्गतरूपेणानन्तरउ
पनायकतानास्तीकार्य्यान्तरस्याचफलाभावात्कस्यापिज्ञानस्यानुमितौसाध्यांशेवाविषयधर्मान्तरभासकत्वस्योप
तद्व्यनुमितावुपनीतभानांविरुद्धेनतदपिनसम्यक् एवंसत्युपनीतप्रत्यक्षेऽपिबाधादिबुद्धेःप्रतिबंधकताविलक्षणसं
गतबाधादिकालीनज्ञानस्योपनायकत्वाकल्पनेनैवतत्तानोमुपनीतभानवारणसंभवात् गृहीतविशेषस्य
उपनीतविषयविशेषभानेऽनन्तर्गतरूपेणोपनायकज्ञानहेतुत्वसंभवाच्चेति इदंतुबोध्यमनुमितावुपनीतभाना
स्वीकारेवह्न्याद्यवृत्तिकांचनमयत्वादिनेवतद्वतिमहानसीयत्वादिनापिपर्वतादौवह्न्याद्यनुमितेशुद्धवह्न्या
दिव्याप्यवत्तापरामर्शतःसंभवेनतद्विरोधितयासमानाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावरूपबाध
स्यापिप्रसक्तौदोषतादवस्थेतिवह्निव्याप्यधूमवान्पर्वतइत्यादिपरामर्शात्महानसीयवह्न्यादिबोधादेवनपर्वतादौभ
सतइतिबाधस्यपृथग्दोषत्वमितिपरस्यधर्मतावलेनेत्यादिमूलोपदर्शितसिद्धान्तेउपाध्यायोक्तरूपेणशंकातेनवि
तिविशेषतः महानसीयवह्नित्वादिनातथासिद्धिः तादृशविशेषधर्मप्रकारकासिद्धिःसामान्यतःव्यापकताव
च्छेदकवह्नित्वादिनाविशेषितोबाधः महानसीयवह्नित्वाद्यवच्छिन्नाभावग्रहंभिन्नप्रकारकत्वात् अभावप्रति
योगितावच्छेदकतयाग्राह्यतानवच्छेदकरूपप्रकारावगाहित्वात् समानप्रकारकत्वस्यैवप्रतिबंधकतायांतन्त्रत्वादि
तिभावः समानविषयकत्वमेवेतिअभावप्रतियोगितावच्छेदकतयाग्राह्यव्याप्तिधर्मावगाहित्वमेवेत्यर्थ नतु
अभावप्रतियोगितयाग्राह्यविषयकत्वमेवेत्यर्थः नत्वभावप्रतियोगितयाग्राह्यविषयकत्वमेवेत्यर्थः वह्नि

मा

गदा० नीरूपमित्यादिसामान्याभावबुद्धौ महानसीयवह्न्यादेः प्रतियोगितयाऽभावे महानसीयवह्न्यादिज्ञानविरोधित्वानुप-
पत्तेः न च सामान्यप्रत्यासत्तितः सामान्याभावबुद्धौ सकलप्रतियोगिभानं नियतं समानज्ञाने सत्यपि तस्य-
102 कारकलौकिकप्रत्यक्षसामग्रीसत्त्वे सकलसामान्याश्रयभानासंभवात् अनुपस्थितव्यक्तीनां विशेषणज्ञा-
नरूपकारणविरहेणाभावांशे प्रतियोगितायाः प्रकारत्वायोगाच्च एवकारेण समानप्रकारकत्वं तत्र नाव-
च्छेदः अनुमितावेवचेत् समानविषयकत्वेन विरोधितोच्येते तत्राह रूपवानित्यनुमितेश्चेति रूपं रूपमिति
शाब्दिकसारोपि तवेति वाकारोऽनुमाष्यायां रूपत्वांशे निर्धर्मितावच्छेदकतत्तदवच्छिन्नविशेषणताकबुद्धा-
रूपत्वप्रकारकज्ञानत्वेन तन्निश्चयतेनोपायथायोरेव हेतुत्वात् तयोः संशयानुमित्योरनुभविकत्वादिति त-
यावानायत्यात तत्र रूपविषयत्वस्वीकारेणीयतया संशयानविषयकत्वेन विरोधितत्वात् तदनुपपत्तिरिति भावः
नत्रपूर्वं रूपत्वेनारूपज्ञानविरहेऽपि ताहृशसंशयादौ विशेष्यविशेषणाभिति तदन्यधर्मिविशेषणतया सम्भा-
नेः रूपे रूपत्वभाने संभवतीत्याशयात्कवाधकं तत्र माहृदोषवशादिति श्वेतं इत्यादिति इत्यादं श्वेतपदस्य-
सिपरत्वालाभाव इति पीत इति यद्यपि ग्राह्यशंखवृत्तिश्वेतत्वावच्छिन्नाभावग्रहे इह शंखे इति पीतत्वाविषय- ०.७
कग्रहस्याप्यनुपपत्तिः तथापि भ्रमस्य स्वाप्नत्वात्कारिज्ञानविरोधिताप्रयोजकापित्तादिदोषजन्यतायाः श्वेत्य
प्रकारेण शंखग्रहस्य तत्राजन्यत्वात् शंखग्रहे श्वैत्याविषयकत्वस्य चलाभाय पीत इति प्रत्ययादिति साक्षा-
त्कारिप्रत्ययादित्यर्थः अत्र शंखत्वेनासंनिकृष्टस्योपनीतशंखस्य न भानोपकरणसंभवः शंखं साक्षात्करोमी-
त्यनुभवात् नापि लौकिकसन्निकर्षाश्रयस्य विरशंखस्य तदानीं तत्रासत्त्वात् साक्षात्कारसामग्रीसत्त्वेन
शंखत्वसाक्षात्कारसामग्रीसत्त्वेन शंखत्वग्रहासंभवात् एतस्तत्र शंखत्वेन शंखस्यैव भानसमीकार्यं तच्च

शुक्लाभावग्रहदशायां भवतो न संभवतीति भः तत्रापि ज्ञानादिना प्रतिबंधात् शंखादौ श्वैत्याद्यग्रहेणैव शंखः श्वेतपी
त्वरूपत्यादिना ज्ञानाकारविरहोपपत्तेर्दोषनाशे च सति तादृशभ्रमसत्वेपि लक्षणेनादृशज्ञानाकारोपगसंभवाद्दोषवि-
शेषजन्यभ्रमस्यालौकिकप्रत्यक्षस्य प्रतिबंधकत्वे सविवादमित्याशंक्य बाधकांतरमाह घटो नेत्याद्यपर्याप्त्यधर्मा-
वच्छिन्नाभावग्रहस्य प्रतिबंधकत्वोपगमे घटो न रक्तः इत्यत्र परंपरासंबंधेन द्वित्वाभावस्य विषयत्वोपगमात् मते च घट
पटौ न स्त इति ग्रहे घटोस्तीति ज्ञानस्यानुपपत्तिरित्यतो विशिष्टाभावग्रहदशायां विशेष्यप्रतीतिपर्यंतानुपपत्ति
प्रदर्शनेयद्यपि विशेषणाभावविषयकत्ववादिनां प्राचामेव मतमनुपपन्नं वस्तुतः समानप्रकारकत्वेन विरोधिता-
मतेपि दंडविशिष्टाश्चैत्रो नास्तीति ग्रहदशायां दंडोपलब्धादिनैव चैत्रवत्ताप्रत्ययस्य समानप्रकारकस्यानुपपत्तिरित्यपलक्ष-
णीभवत्तद्धर्मप्रकारकप्रतियोगिमत्ताग्रहे तद्धर्मविशिष्टाभावीयप्रतियोगिताविलक्षणतद्धर्मावच्छिन्नप्रतियोगिता-
विषयकाभावग्रहस्य तद्विशिष्टप्रतियोगिमत्ताग्रहे च विलक्षणप्रतियोगितावगाहिविशिष्टाभावग्रहस्य प्र-
कृप्रतिबंधकतावाच्या तथा च समानविषयत्वेन विरोधितामतेपि तद्वत्ताग्रहसामान्ये विरोधिता यो विशिष्टाभा-
वीयप्रतियोगितावैलक्षण्यात् तद्वृत्तिधर्मावच्छिन्नप्रतियोगितावगाहित्वं विशिष्टवैशिष्ट्यप्रत्यये विरोधिता यो च विशि-
ष्टाभावीयविलक्षणप्रतियोगितावगाहित्वेनैव मिश्रकोनोक्तदोषावसरः तथापि तन्मते तद्वत्ताज्ञाने प्रतिवास्त
वन्नवृत्तिधर्मावच्छिन्नप्रतियोगितावगाहित्वेन प्रतिबंधकत्वे पीतो नास्तीति ग्रहे पीतः शंखोस्तीत्यनुमानिकादि
प्रतीत्यापत्तिः पीतत्वस्य वस्तुतः शंखावृत्तित्वात् शुक्लत्वस्य शंखावृत्तित्वभ्रमदशायां शुक्लो नास्तीति ग्रहे-
पि तादृशप्रतीत्यनुपपत्तिश्चेति तद्वृत्तित्वस्थाने तद्वृत्तितया गृह्यमाणत्वं धर्मविशेषणं देयं तथा च कालांतरीयय-
द्रूपांतरीयज्ञानव्यावर्तनाय तत्तत्कालघटकनिवेशावश्यमहागौरवम् न समानप्रकारकत्वेन विरोधितामते तत्तद्वति

गदा॰ त्वप्रकारकप्रतियोगिमत्ताग्रहे तत्त्वाक्रान्तावच्छिन्नप्रतियोगिकाभावज्ञानस्य पापावगत्यप्रतिबंधकतापत्तावत्यावद्वा॰
धत्वकप्रतिबंधकताः समानविषयकत्वेन विरोधितामते समानप्रकारत्वेन प्रतिबंधकतामते च घटपटत्वादिह
पप्रकारान्तरान्तर्भावेण्याप्रतिबंधकतानामाधिक्यमिति वा व्यं समानविषयत्वेन विरोधितामते अक्रमेण ज्ञा
103 नव्याक्तिभेदेन प्रतिबंधकताभेदादिति गौरवात्तवायोरूपविशेषाभावकूटग्रहदशायां वायोरूपान्यत्तत्किमपि
समवायेनास्तीति भ्रमस्त्वेवारूपवान्नवेति संशयादेरत्रपपत्तिरिति तन्मते ऽरूपव्याख्यानं तु समानप्रकारत्वेन वि॰
रोधित्वे पर्वते महानसीयवह्निर्नास्तीत्यादिविशेषबाधावत्तादशायां हृदलिङ्गपरामर्शाद्वह्नित्वादिना सामान्य॰
धर्मेण पर्वतादौ महानसीयवह्न्यादिविषयकभ्रमानुमितिप्रसंगः समानविषयकत्वेन विरोधित्वेन विरोधि
त्वेन ग्राह्यकेन च बाधादिसत्त्वेऽपि विशेषबाधादेर्न तत्र न तदानुमानं गरस्य तत्र ग्राह्यसदिति विशेषबाधावत्तानवत्तायोः
समानत्वमिति समानप्रकारकत्वेन विरोधितामते यथा विशेषबाधावत्तादशायां तत्प्रसंगस्तथा विशेषाभासकेन
च बाधायसत्त्वे विशेषबाधानवत्तादशायां न तत्प्रसंगोऽस्तीत्यर्थः समानसमाधानमिति यथा समानविषयकत्वेन वि॰
रोधितामते बाधितेन च बाधायसत्त्वे विशेषबाधानवत्ताले न तादृशानव बाधादिरूपदोषविरहादेव न तादृशभ्रमानुमि॰ १०३
तिसमाधानं तथा समानप्रकारत्वेन विरोधितामतेऽपि तदेव समाधानमित्यर्थः यद्यपि समानप्रकारकत्वेन विरोधिता॰
मते प्रितदेव समाधानं योग्यो न च बाधादितो विशेषरूपेणैव पक्षे बाधितविशेषभानमभ्युपगम्य बाधासंकरस्य बा॰
धावरहलाघ्यं न तथाभवन्मते उक्तदोषस्य नातिप्रसंगवारणसंभवः तादृशबाधादिरूपदोषस्य समाधानं तत्साम॰
ग्रावकल्पनेन न तत्प्रसंगः प्रत्यक्षे प्रसिद्धस्य सामान्यरूपेणावगतविशेषभानस्यानुमितावभावश्च तादृशसामग्री॰
विरहप्रयोज्य एवेति पश्चापि साध्यतावच्छेदकप्रकारेण प्रसिद्धमिवाप्रसिद्धमपि साध्यं धूमगोत्वादिकं साधये॰

दिति मूललिखनात् साध्यतावच्छेदकवह्नित्वादिप्रकारकत्वाधितविशेषसिद्धिविरोधितया वा पक्षहेत्वाभा
सत्वं मूलकाराभिप्रेतं तथापि समानविषयकत्वेनाविरोधितया विचारसहत्वात् तद्रूपेण सहाकारविशिष्टविशेषावगाह्या
यकत्वानवच्छेदकप्रकारेणापि साध्यस्यानुमितौ भानस्वरूपसंभवरूपेणोपस्थितेर्लाघवग्रहे सत्यनुमितेरुपप
द्यकवह्निः सत्वसिद्धेरनुमानतो निर्वाहादित्यर्थः तथा सति संशयकरणकारणकार्यापत्तेर्मिथःकारणं नोपप
द्यत इति भावः ननु तत्तत्सामान्यरूपेण ज्ञातविशिष्टसिद्धौ विशेषसंशयनिवृत्त्या मानसोऽहं तत्सिद्धिरित्यपि मणिकार
राभिप्रायः संभवतीति समानविषयकत्वप्रयुक्ताविरोधित्वाभिप्रायकत्वेनापि तन्मूलव्याख्यासंभवादनुमितेर्व्या
पकतानवच्छेदकप्रकारकत्वस्य मणिकारानुमतत्वेन लभ्यत इत्यनुशयेन दृष्टान्तं तत्रानुसरणमेवमिति हि नि
कार्तरेकत्वमपीति इष्टवरानुमानेनेत्यादिप्रकारेण भवतीत्यनुषङ्गादिनान्वयः तत्रैकत्वस्याप्रकारत्वे चेष्टैक
कत्वानेकत्वयोर्नित्यसंशय इति पूर्ववद्व्याप्तित्वालाघवस्य प्रमाणसहकारित्वासिद्धान्ते प्रणयतो मणि
कृतानुमततापत्तिमाहात्म्यथेति हितिकार्तरेवचन हितिकार्तनिष्ठभेदाप्रतियोगित्वेश्चान्यत्र तदसिद्धेः हितिका
र्तनिष्ठभेदाप्रतियोगित्वेश्चान्यत्र तदसिद्धेः हितिकार्तरि च लाघवज्ञानादिना तदसिद्धेः श्रवणपस्थितेन च लाघवज्ञा
नासंभवात् न च व्यणुकादिकार्तरि सकर्तृकादिकार्तत्रे भेद एव हितिकार्तरेकत्वं सकर्तृकादिकर्तृभेदस्याजन्यादिकार्तेविशि
ष्टेन तत्रैव प्रसिध्यति इत्युपस्थितेन तत्रैव ज्ञानसंभववेन तत्सहकृतेन व्यणुकादिपक्षकसकर्तृकत्वानुमा
नात् व्यणुककर्तृरादावकृतादिकर्तृभेदरूपं तत्रैकत्वं सिद्धमिति वाच्यं कार्यत्वादिलिंगेनाकृतादौ विशिष्य सक
र्तृकत्वस्य प्रथमतः सिद्धावपि प्रत्येकमकृतादावुभयकर्तृकत्वसंशयसंभवेन तत्त्वघटनिष्ठभेदाप्रतियोगि
त्वप्रसिध्यसंभवात् किं तु आत्मानात्मोभयवृत्तिरिदं त्वाऽसमानाधिकरणद्वित्वशून्यत्वं तदपेक्षद्वित्वं आत्मेतरद्व्यवृ

गदा. ये प्रसिद्धे तच्छून्यत्वेच ग्रहणाद्दर्शवि नितु लाघवज्ञानात् सामान्येनैवरूपेणात्वह्न्यर्थविषयिणी अनुमितिरस्तु नतु-
व्यापकतानवच्छेदकधर्मेणालङ्कृतवह्न्यौ विपरीतेसंशये च लाघवधीरेवानिवर्तयिष्यतीत्याशंक्य उपकृतं तरमाहुः अनुमि-
104 तेश्चेतिताहृशेणेति लाघवधीनिष्ठयतावच्छेदकमहानसीयवह्नित्वादिरूपेणेत्यर्थः तथाविधानुव्यवसायावि-
रहात् महानसीयवह्निमनुमिनोमीत्यनुव्यवसायासंभवात् नसिद्धो निर्वह्निमनुमिनोमीत्यादिप्रतीतेर्वह्नि-
विषयकत्वादिमात्रसाधकतया विशेषतो महानसीयवह्न्यादिविषयकत्वासाधकप्रतीतिविरहादितिभावः भव-
त्तलाघवज्ञानादिवण्ह्यापकतानवच्छेदकप्रकारेणसाध्यानुमितिस्तावन्नाकिमापादनमित्याकांक्षायामाहुरि-
त्थंचेति महानसीयवह्नौ लाघवमित्यादि लाघवज्ञानसहकृतात् वह्निव्याप्यवान् पर्वत इत्यादिपरामर्शात् महा-
नसीयवह्न्यादिबाधग्रहदशायामिवतद्ग्रहदशायामपि पर्वतो महानसीयवह्निमानित्यनुमितिः स्यात्पदितामा
प्रतिबंधको भवेदिति बाधः स्पष्टदोषइत्यर्थः शंकते सल्लिंगपरामर्शादितिकथं भ्रान्तानुमितिरिति दोषविरहा-
दितिभावः उभयत्रैकमन्तरमाहुः बाधानवतारइतिसल्लिंगपरामर्शाभावेपिबाधानवतारसहकृतात्ह्यधिके
ष्टेविषयकलाघवज्ञानरूपाहार्यदोषाइतोरेवमन्त्रांतनुमितिबाधग्रहपोतेजकाभावविशिष्टताहशदोषरूपप्रतिबं-
धकसत्वात्समानुमित्यनुत्पादस्त्वेनोपपद्यत इत्यर्थः अद्यपिधूमरूपपरामर्शविरहेपि व्याप्याभाववद्विशेष्यकव्या-
प्यवत्ताज्ञानरूपासिद्धिगपरामर्शस्तत्रास्पतपर्वतव्यापिनतन्मात्राकतावाच्या तथाचपर्वतचत्वरादिविशेष्य- ०५
कंपर्वतीयचत्वरीयवह्न्यादिविषयकानुमितित्वेन प्रतिबध्यत्वं पर्वतीयचत्वरीयवह्न्यादिधर्मिकलाघवज्ञान-
विरहविशिष्टमहानसीयवह्न्यादिधर्मिकलाघवज्ञानत्वेन प्रतिबंधकत्वमुपेयमित्येकैकविधलाघवज्ञानप्रति-
बंधकत्वस्यपदभेदेनानंत्य नव्यमतेच वह्नित्वपर्यासविधेयताच्छेदकताकानुमितित्वलाघवज्ञानस्यप्रति

बध्यतावच्छेदकं पर्वतीयवह्नौ लाघवमित्यादिलाघवज्ञानात् पर्वतादौ पर्वतीयवह्नित्वेनैवानुमित्युत्पाद
त् तस्मात् स्वरूपवह्नित्वावच्छिन्नाविधेयकत्वघटितलाघवज्ञानस्योत्तेजकत्वं तदेकेनैव निर्वाह इति न पक्षभेदेन
प्रतिबंधकताभेदः वह्नित्वादौ विधेयतावच्छेदकत्वस्य यथाभिनिवेशश्चाप्यायाममतेः आवश्यकः अन्यथा प
र्वतीयवह्नित्वादिना पर्वतीयवह्न्यनुमितेरनिर्वाहात् अन्यथा पर्वतादौ महानसीयवह्न्यादेर्बाधग्रहदशायां त
द्व्यक्तिलाघवज्ञानसत्त्वेऽपि तत्र पर्वतीयवह्न्यादेरेवानुमितिर्न स्यादिति तादृशबाधग्रहस्य लाघवज्ञान
प्रतिबंधकतायामुत्तेजकत्वमावश्यकं तथा च पर्वतादौ महानसीयवह्न्यादेः इतः एवं सर्वत्र निरुक्तरूपस्य
बाधग्रहेऽपीत्यादिकं बोध्यं इत्थं बाधसहकृततत्सामान्यतो दृष्टस्याव्यापकतानवच्छेदकप्रकारकानुमितिजन
कतया उक्तत्वान्न जन्यविशेषधर्मप्रकारकानुमितिविरोधितया मिथ्याबाधस्य हेत्वाभासत्वं व्यवस्थापयति न
च इति सामान्यतो दृष्टात् सामान्यधर्मावच्छिन्नव्याप्यत्वज्ञानात् तदितरप्रसिद्ध्याशेषविशेषबाधसह
कृतादिति यद्विशेषरूपावच्छिन्नं सामान्यप्रसिद्धं तदेकतररूपभिन्नसकलरूपावच्छिन्नस्य बाधसहकृ
तादित्यर्थः क्षिप्यमाणप्रसिद्धप्रकारकेति यद्विशेषरूपावच्छिन्नस्य बाधो वक्ष्यते तद्धर्मावच्छिन्नप्रकार
केत्यर्थः तदानीमप्रतीतस्यात्मवृत्तित्वस्य बाधाग्रहेऽपि गुणत्वादिना द्रव्यान्तरवृत्तित्वस्य बाधग्रहे विशे
षतो मनोवृत्तित्वानुमित्युत्पत्त्या सहकारिशरीरे प्रसिद्धनिवेशः तथा भोजनप्रसिद्धदशायां चित्रभोजन
मात्रबाधग्रहादविशेषतोऽविभोजित्वस्यापीनत्वेनासिद्धावसाध्यनिवेशः अज्ञाततत्सुरभिगंधस्य सुरभिविजा
तीयगंधवा त्वत् पृथिवीत्वेन सुरभिगंधत्वावच्छिन्नप्रकारकानुमित्युत्पत्त्या प्रसिद्धेः सहकारिता लाभा
वक्षिप्यमाणे प्रसिद्धिविशेषणमुपात्तं अत्रेदं बोध्यं यादृशसामग्रीबलादात्मवृत्तित्वप्रसिद्धिस्थले तद्बाधाय

गदा॰ ह्यपि मनोवृत्तित्वानुमितिस्तादृशी सामग्री ॰ गृहीतव्याप्यस्यात्मवृत्तित्वानुमितिस्तादृशी स्वमासिद्धिदशायामपि तत्कथं
तदानीं न मनोवृत्तित्वानुमितिः नहि मनोवृत्तित्वानुमितावात्मवृत्तित्वप्रसिद्धेः प्रतिबन्धकता संभवति येन तं तत्र तयोर्ज-
न्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशात् लाघवज्ञानजन्यानुमितौ महानसीयवह्निव्याप्यवत्तापरामर्शस्य तज्ज-
105 न्याऽनुमितौ च लाघवज्ञानस्य व्यभिचारः केचित्तु लाघवज्ञानोपनीतमहानसीयत्वादेर्न विधेयतावच्छेदकतारूप-
विलक्षणविधेयतास्वीक्रियतेऽत्रापि प्रकारतामात्रं पर्वतो वह्निमानिति सिद्धदशायां तादृशानुमितिर्जायत एव महा-
नसीयवह्निव्याप्यवत्ताज्ञानजन्यानुमितौ च महानसीयत्वसहितं वह्नित्वादिकमेव विधेयतावच्छेदकमिति कार्य-
वैविध्यान्न परस्परं व्यभिचार इति तन्न लाघवज्ञानादधिकविषयकानुमितेः साध्यतावच्छेदकावच्छिन्नप्रकारकसि-
द्धेप्रतिबध्यत्वे द्वेष्टतज्जीवनमरणान्यतरप्रतियोगित्वसामान्यानिश्चयदशायां लाघवज्ञानाज्जीवित्वस्य विशेषणतोऽ
सिद्ध्याबहिः सत्त्वानुमानानानुपपत्तेः एवं च तादृशसिध्यभावघटितलाघवज्ञानसहकृतसामान्यधर्मावच्छिन्नव्या-
प्यवत्ताज्ञानघटितसामग्र्या भिन्नविषयकप्रत्यक्षादेः प्रतिबन्धकताधिकं प्रामाणिकत्वान्न दोषायेति संक्षेपः
लाघवज्ञानप्रतिबन्धकतायां बाधविशेषस्योत्तेजकत्वानुपगमे लघ्वर्थबाधग्रहदशायां लाघवज्ञानसत्त्वेऽनुमितिवि- ०.५
वत्स्यात् प्रमायाश्रमस्य प्रतिबन्धकसत्त्वादिति बाधग्रहाभाववैशिष्ट्यं प्रतिबन्धके निवेशितं बाधग्रहस्य विरोधिग्रहमा-
त्रोपलक्षणं तेषां च महानसीयवह्न्यादिमत्त्वग्रहविरोधित्वेनैकाभावः प्रातिस्विकरूपेणाभावकूटं वा निवेशनीयमित्य-
न्यदेतत् प्रतिबध्यतावच्छेदककोटौ च न यथार्थवह्न्यनुमितित्वं यथार्थत्वस्य तद्वति तत्प्रकारकत्वस्य तत्तद्व्यक्तिभेदेन भिन्नत्वा-
त् नापि वह्न्यंतरानुमितित्वं वह्निद्वये लाघवज्ञानसत्त्वे परस्परप्रतिबन्धेनानुमित्युच्छेदप्रसंगात् एकलाघवज्ञानेऽप-
रलाघवज्ञानानामनुत्तेजकत्वे गौरवात् किंतु [illegible]त्वावच्छिन्नविधेयताकानुमितित्वमेवातोऽपि महानसी

यत्त्वादिमानसिद्धिरितिदिक् इतः परं साकाङ्क्षस्य वह्निव्याप्यधूमवान् पर्वत इत्यादौ न्यायादिके बोध्यम् बाधग्रहेपि
उक्तलाघवज्ञानसत्त्वेपि वत्त्वरादौ चत्वरीयवह्न्यनुमित्यनुदयात्तद्धर्मिकात्तद्बाधितवह्न्यनुमितौ तद्धर्मिकमहानसी-
यवह्न्यनुमितिप्रतिबन्धकबाधग्रहस्यैवोत्तेजकीकृत्यापत्तेर्भेदेन लाघवज्ञानस्यापि भिन्नप्रतिबन्धकताकल्पनेन नव्यानाम
आवश्यकमिति चेत्सत्यं एवमपि पर्वतादिविशेष्यकसमुद्रवह्नित्वावच्छिन्नविधेयताकानुमितित्वे बाधितवह्निध
र्मिकलाघवज्ञानप्रतिबध्यतावच्छेदकं नव्यमते उपाध्यायमते च पर्वतादिधर्मिकसमुद्रवह्नित्वाद्यवच्छिन्नपर्वती
यवह्न्याद्यनुमितित्वे अन्यथा पर्वतादौ महानसीयवह्न्याद्यनुमितेरपि तद्धर्मिकलाघवज्ञानादनुपपत्तेरिति प्र
तिबध्यतावच्छेदकलाघवावगाहमानमेव साधीयः नच महानसीयवह्न्यादिधर्मिकलाघवज्ञानप्रतिबन्धकता-
यां तद्धर्मिकज्ञानप्रतिबन्धकबाधतदभावव्याप्यवत्ताज्ञानतदभावावच्छेदकधर्मदर्शनानामनेकेषां नव्यमते उत्तेजकतया
गौरवं उपाध्यायमते च पर्वतीयवह्न्यादिधर्मिकलाघवज्ञानमात्रस्योत्तेजकत्वेनादृष्टबाधादिग्रहदशायामपि प
र्वतादौ महानसीयवह्न्यादेरेव वह्नित्वादिना भानसंभवेन पर्वतीयवह्न्यादेस्तत्र भानानुपगमेन तादृशबाधादिबुद्धेर
नुत्तेजकत्वमिति लाघवमिति वाच्यं बाधादिबुद्धीनां महानसीयवह्न्यादिमत्ताग्रहविरोधित्वेनुपगमस्यानुत्तेजकत्व-
संभवात् नव्यमतेपि तेषां पृथगुत्तेजकत्वविरहात् उपाध्यायमते पर्वतीयवह्न्यादिधर्मिकलाघवज्ञानादेर्यथोत्तेज
कता न तत्र पर्वतीयान्यवह्न्यभाववानिति बाधादिबुद्धेरपि तद्दशायां पर्वतीयवह्न्यादिभाननिर्वाहायोत्तेजकताया आव
श्यकतया गौरवाच्च इतः परं प्रकमात्र व्यवहितोत्तरपत्रसाकाङ्क्षस्य तत्र बाधग्रहकाले इत्यादि बोध्यं वह्निव्याप्यधूमवा
न्पर्वत इत्यादिपरामर्शात् महानसीयवह्नौ लाघवमित्यादिलाघवज्ञानदशायां पर्वते बाधितमहानसीयवह्न्याद्यनु-
मितिर्बाधानवतारदशायां जायते न तु तदवतारे इति विषयबाधयोः संकीर्णतया हेत्वाभासः समानधर्मावच्छिन्नसा

गदा:

106

धकानुमितौ निवेशाव्यभिचारस्यादोषत्वादिति मणिकृतः अत्रोपाध्यायाः लाघवज्ञानादिसत्वेपि व्यापकतावच्छेदकत
याऽगृहीतेनैव रूपेणानुमितिरिति महानसीयवह्नित्वादिना न महानसीयवह्न्यनुमितिर्जायते अपितु शुद्धवह्नित्वादि
नैव तत्र च महानसीयवह्न्यऽभावयोर्न विरोधिनी द्वित्वाद्यवच्छिन्नाभावनिश्चयदशायामपि प्रत्येकं संशयादेरनुभवसि
द्धतया ग्राह्यतावच्छेदकाऽवच्छिन्नाभावनिश्चयस्यैव विशिष्टधीविरोधित्वादतो विशेषबाधस्यादोषत्वासंभवः नच बाध
बुद्धेः प्रतिबंधकतायां समानप्रकारकत्वस्य तंत्रत्वे लाघवज्ञानादिजन्यमहानसीयवह्न्याद्यनुमितिर्यदि शुद्धवह्नि
त्वादिनैव तमवगाहते तदुत्तरं महानसीयवह्निमान्न वा पर्वत इति संशयः स्यादिति लघ्वर्थभासकमपि लाघवज्ञानम
नुपयुक्तं स्यादिति समानविषयकत्वेनैव बाधबुद्धेर्विरोधित्वं अनुमितौ विशेषवल लघ्वर्थविषयकत्वं वा आवश्यकमिति
उभयथैव विशेषबाधो हेत्वाभासो भवेदिति वाच्यम् लाघवज्ञानस्यैव तादृशसंशयविरोधित्वात् लाघवज्ञानजन्या-
नुमितिनाशानंतरमिव लाघवज्ञाननाशानंतरमपि तादृशसंशयोपगमे क्षतिविरहात् अत्र नव्याः लाघवज्ञानना
शे लाघवज्ञानजन्यानुमितिसत्वेपि यत्र तत्र संशयः स्वीक्रियते तदा लाघवज्ञानस्य लघ्वर्थसाधकत्वमेवोच्छिद्येत तज्ज
न्यानुमितौ लघ्वर्थविषयतायाः व्यर्थत्वात् वह्निमनुमिनोमीत्याकारकव्यवसायस्य स्यात् नच तस्याः फलांतरास-
त्वेपि लघ्वर्थविषयकत्वेनानुमितेरनुव्यवसायाल्लघ्वर्थविषयकत्वमिति वाच्यं पर्वतो वह्निमानित्यनुमितेरनुव्यव-
सायस्य वह्निमनुमिनोमीत्याकारकत्ववन्न तु महानसीयवह्निमनुमिनोमीत्याकारकतेति तस्य तदवगाहिताया एवा
सिद्धेः एवं महानसीयवह्नौ लाघवज्ञानसत्वेन दसत्वदशायामिव सल्लिंगपरामर्शदशायामिव सल्लिंगपरामर्शाद्यमानु
मितिः स्यात् इति लाघवज्ञानस्य प्रमानुमितिबंधकत्वमुभयपक्षावश्यकं तत्र चोपाध्यायमते पर्वतीयवह्नौ च लाघ-
वमित्येतादृशलाघवज्ञानदशायां पर्वतो पर्वतीयवह्न्यनुमितिनिर्वाहाय बाधितार्थविषयकलाघवज्ञाने प्रतिबंध-

कतायां अवाधितार्थविषयकलाघवज्ञानस्योत्तेजकतावाच्या तथा च पर्वतत्वत्वादिविशेष्यकं पर्वतीयच
त्वरीयवह्न्यादिविषयकानुमितित्वेन प्रतिबध्यत्वं पर्वतीयचत्वरीयवह्न्यादिधर्मिकलाघवज्ञानविरहविरहः
विशिष्टमहानसीयवह्न्यादिधर्मिकलाघवज्ञानत्वेन प्रतिबन्धकत्वमेवमित्येकैकविधलाघवज्ञानप्रतिबन्धक
त्वस्य पक्षभेदेनानन्त्यं नव्यमतेतु वह्नित्वपर्याप्तविधेयतावच्छेदकताकानुमितित्वेन लाघवज्ञानस्य प्रतिबध्यता
वच्छेदकं पर्वतीयवह्नौ लाघवमित्यादिलाघवज्ञानात् पर्वतादौ पर्वतीयवह्नित्वेनैवानुमित्युत्पादात् तस्या
अप्युक्तवह्नित्वावच्छिन्नविधेयकतया लाघवज्ञानस्योत्तेजकत्वमतेऽप्येवं निर्वाहः इति न पक्षभेदेन प्रतिबन्धकताभेदः
वह्नित्वादौ विधेयतावच्छेदकतायाः पर्याप्तिनिवेशश्चोपाध्यायमते आवश्यकः अन्यथा पर्वतीयवह्निव्याप्यवानयं
पर्वत इति परामर्शान्महानसीयवह्नौ लाघवज्ञानदशायां पर्वतीयवह्नित्वादिना पर्वतीयवह्न्यनुमितेरनिर्वाहात् १
अथ पर्वतादौ महानसीयवह्न्यादेर्बाधग्रहदशायां तद्धर्मिकलाघवज्ञानसत्त्वेऽपि तत्र पर्वतीयवह्न्यादेरेवानुमिति
र्नव्यमते इति तादृशबाधग्रहस्य लाघवज्ञानप्रतिबन्धकतायामुत्तेजकत्वमावश्यकं तथा च पर्वतादौ महानसीय
वह्नेरितरः परं स्वपक्षनिरंकपृष्ठस्य बाधग्रहेऽपीत्यादिकं बोध्यं इतरबाधसहकृतसामान्यतो दृष्टस्यापि व्यापकतान
वच्छेदकप्रकारकानुमितिजनकतया उक्तत्वात् तज्जन्यविशेषधर्मप्रकारकानुमितिविरोधितयापि बाधस्य हेत्वाभासत्वं
व्यवस्थापयति तथेति सामान्यतो दृष्टात् सामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानात् तदितरप्रसिद्धाशेषविशेषबा
धसहकृतादिति यद्विशेषरूपावच्छिन्नं सामान्यं प्रसिद्धं तदेकतररूपभिन्नसकलरूपावच्छिन्नस्य बाधसहकृता
दित्यर्थः शिष्यमाणप्रसिद्धप्रकारकेति यद्विशेषरूपावच्छिन्नस्य बाधो वह्निहीनस्तद्धर्मावच्छिन्नप्रकारिकेत्यर्थः तदा
मीमप्रतीतस्यात्मवृत्तित्वस्य बाधाग्रहेऽपि गुणत्वादिना दिगन्तरस्य वृत्तित्वस्य बाधग्रहे विशेषतो मनोवृत्तित्वानुमितेः

गदा०

107

नात्मासहकारिशरीरे प्रसिद्धनिवेशः संध्याभोजनप्रसिद्धस्यायोदिभोजनमात्रबाधग्रहाद्विशेषतो रात्रिभोजित्वस्यापी
नत्वेनासिद्ध्या साकल्यनिवेशः सुरभिगंधस्य सुरभिविजातीयगंधबाधग्रहात् पृथिवीत्वेन सुरभिगंधवत्त्वावच्छि
न्नप्रकारकानुमित्यनुत्पत्त्या प्रसिद्धेः सहकारितालाभावविशिष्टमनात्मप्रसिद्धिविशेषणमुपात्तं ग्रंथे इदं बोध्यं यादृ
शसामग्रीबलादात्मवृत्तित्वाप्रसिद्धिस्थले तद्बाधग्रहेपि मनोवृत्तित्वानुमितिस्तादृशी सामग्री गृहीतबाधस्या
त्मवृत्तित्वस्याप्रसिद्धिदशायामपि तत्त्वाथं तदानीं न मनोवृत्तित्वानुमितिः नहि मनोवृत्तित्वानुमितिचात्मवृत्तिप्र
सिद्धेः प्रतिबंधकता संभवति येन तत्सत्त्वात्सामग्रीविरहः तथा सति तद्बाधग्रहेपि मनोवृत्तित्वानुमित्यनुपपत्तेः ।
न च तत्तद्विशेषबाधग्रहाभावविशिष्टतत्तद्विशेषप्रसिद्धेः प्रतिबंधकत्वान्नायं दोष इति वाच्यम् तथा सति नरबाधग्र
हहेतुताया निर्युक्तिकतापत्तेः उत्तेजकतयैव तदुपयोगोपपत्तेः यत्र विशेषांतरमात्रस्यैव न प्रसिद्धिस्तत्रोपस्थित
विशेषप्रकारकानुमितेर्वारणाय विशेषांतरप्रसिद्धेरेव हेतुताकल्पनौचित्यात् तस्मात्तद्धर्मविशेषितसामान्य
धर्मावच्छिन्नविषयकानुमितौ तद्विपरीतधर्मसहितसामान्यधर्मावच्छिन्नाभावग्रह एव हेतुः नतु विशेषधर्मांतर
विशेषितसामान्यधर्मावच्छिन्नाभावग्रहः तद्विपरीतं च तदत्यंताभावस्तद्भिन्नत्वं च तदत्यंतान्योन्याभावयोश्च विपरीता १०७
प्रतियोगितत्वावच्छेदकोऽभावग्रहेपि धर्मे प्रतियोगिनि विपरीतं तद्धर्मस्य यादृशविशेषणत्वेन तादृशमेवानुमितौ त
द्धर्मस्य सामान्यधर्मावच्छिन्नविशेषणत्वं महानसीयभिन्नवह्न्यभाववान् नित्यत्वबाधग्रहे महानसीयत्वविपरीतस्य महा
नसीयान्यत्वस्य प्रतियोगिनि साक्षादेव विशेषणतेति साक्षान्महानसीयत्वविशेषितस्य वह्नित्वावच्छिन्नस्य महान
सीयवह्निमान्नित्यनुमितौ भानं विशेष्याभावान्यविशिष्टाभाववद्वृत्तित्वादिबाधग्रहे विशेष्याभावान्यत्वादेरन्यत्वादि वि
शेषणकोटिविष्टेः भावांशे विशेषणत्वमिति तदधीनविशिष्टव्यभिचारानुमितावपि तादृशाभावांशे विशेष्याभा

वान्यत्वादेर्व्यंत्यादिविशेषणकोटिप्रविष्टेः भावादौ विशेषणत्वमिति तदधीनविशिष्टव्यभिचारोऽयमनुमितावु
पिताहेत्वभावादौ विशेष्याभावत्वादिधर्मस्य विशेषणतयाभानाद्विशेष्यव्यभिचारादिसिद्धिः एवंचनायं रात्रिभिन्न
भोजीद्रव्यानमनोभिन्नद्रव्याश्रितत्वादिसामान्याभावावगाहिबाधग्रहदशायामिवधीनत्वगुणत्वादिना रात्रिभोजि
त्वमनोरूपद्रव्यत्वज्ञानित्वादिप्रकारकानुमितिः दिवानभुंजानेन संध्यायांभुंजानेन पृथिवीवृत्तिर्नजलवृत्तिरित्यादिविशेषा
भावकूटग्रहस्य सामान्याभावग्राहकतयैवोपयुज्यत इति यद्यप्येकविशेषाभावग्रहस्थले तद्विशिष्टसामान्यसाध
कहेतौ तत्तद्विशेषांतरप्रकारकसिद्धिः संभवति तथापि यत्र तद्विशिष्टसामान्यसाधकहेतौ विशेषांतरव्याप्तिग्रहोऽ
प्रामाणिकस्तत्र तत्सिद्ध्यर्थं ईदृशसामग्र्यंतरकथनं नच तत्रापि फलानुरोधात्तादृशव्याप्तिग्रहकल्पनमेवोचितमि
ति वाच्यम् यत्र पूर्वं विशिष्टहेत्वाद्यनुपस्थित्या व्याप्तिग्रहो बाधितस्तत्र कल्पनस्यासंभवात् नच विशेषणविशेष्ययोरुप
स्थितौ मानसविशिष्टोपस्थितिसंभवात्कालविलंबेन व्याप्त्यादिग्रहेऽनुमितिः शक्यते कल्पयितुं यत्र च न व्याप्त्यादि
ग्रहः प्रमाणांतरसिद्धस्तत्र फलमपनीयमिति वाच्यम् यत्र धूमत्वादिकमनुपस्थितमथ च शब्दादिना वह्निव्याप्य
महानसीयान्यवह्न्यभावोभयत्वादिना महानसीयवह्न्यादिव्याप्तिपक्षधर्मताग्रहस्तत्र सर्वमतसिद्धमहानसीयवह्न्या
द्यनुमित्यर्थं तादृशव्याप्तिज्ञानतादृशानुमितिसामग्रीत्वमकल्पयित्वा महानसीयवह्न्यभावादिग्रहसहकृतवह्न्या
दिव्याप्यवत्ताज्ञानस्यैव तादृशानुमितिसामग्रीत्वकल्पनादेवोपपत्तेः फलापन्नात्वादेरन्याय्यत्वादिति यथा विशेषां
तरबाधग्रहसहकृतसामान्यज्ञानसामग्री व्यापकतानवच्छेदकविशेषधर्मप्रकारेण व्यापकानुमितिं जनयति त
था सामान्यज्ञानसहकृता विशेषांतरबाधसामग्र्यपि विशेषधर्मप्रकारेण व्यापकमनुमापयति स्वस्य न द्वयमेव विशेष
धर्मप्रकारकसंशयानुमानादृशस्यानुभविकत्वात् तथाविधसामग्र्यास्तादृशानुमितिजनकत्वोपगमे वह्निमहानसीयान्य

गदा॰ वह्न्यभाववद्व्याप्यीभयादिलिंगकमहानसीयवह्नित्वाद्यवच्छिन्नसाध्यकपरामर्शस्य महानसीयवह्नित्वाद्यवच्छि
न्नविषयकानुमितौ हेतुत्वांतराकल्पनेन लाघवाच्चेति मतमवलंब्य मणिकृता ऽरोवर्त्तिविशेष्यकवह्नित्वप्र
कारकज्ञानत्वावच्छिन्ने वह्नित्वाभाववति वह्नित्वप्रकारकत्वाभावादनुमानाद्वह्नित्ववति वह्नित्वप्रकारकत्वरू
108 पप्रामाण्यसिद्धिरंगीकृतेत्यवधेयं व्यभिचारवारणाय रेरत्यंताभावत्वेनाभावानिवेशनेऽपि आवश्यकप्रतियोगिवैय
धिकरण्यादिविशेषणेन ध्वंसप्रागभाववारणात् किंच साध्यात्यंताभाववद्वृत्तित्वमिति मूलमसंगतमित्यभिसंधा
ना किंच साध्येत्यादिकमापातत इति प्रतियोग्यसमानाधिकरणविशेषणेन च साध्यतावच्छेदकसंबंधावच्छिन्न
प्रतियोगिताकत्वविशेषणेनापि ध्वंसप्रागभावादिव्यावृत्तिः संभवति ध्वंसप्रागभावयोरत्यंताभावाविरोधित्वम
तेऽपि तयोर्धर्मविशेषसंबंधविशेषावच्छिन्नप्रतियोगिताकत्वे मानाभावादिति दर्शयितुं साध्याभावे प्रतियोग्यस
मानाधिकरणमिव संबंधविशेषाद्यवच्छिन्नप्रतियोगिताकत्वमपि विशेषणं प्रदर्शितं स्वध्वंसस्वप्रागभावा
वच्छिन्नस्वाश्रयस्य सामवायिकात्यंताभावावच्छिन्नत्वसत्वादत्यंताभावं परित्यज्य ध्वंस ˘ भावोपपादनम
युक्तमित्याशंक्याह स्वप्रागभावेत्यादिकमिति स्पष्टत्वेनेति तयोः प्रतियोग्यधिकरणवृत्तितायाः सर्वमतसि
द्धत्वादिति भावः उत्पत्त्यादिकाले घटादौ गंधादेरत्यंताभावामतेनेत्यंधत्व ˘˘ साध्यतायां प्रागभावादिकमादा ०३
य बाधसमर्थनेऽपि रूपत्वगंधत्वादिसामान्यप्रकारेण साध्यतायां न बाधनिर्वाह इति प्रागभावादिमत्यत्यंताभा
वस्वीकारस्यावश्यकत्वेत्याह घटएवेति अतएव ध्वंसप्रागभावसमये न दत्यंताभावसत्वादेव अन्यथा रूपादिसामा
न्यभावज्ञानस्यैव स्वतो रूपत्वाद्यवच्छिन्नवत्ताज्ञानविरोधितया ध्वंसप्रागभावयोर्विरोधित्वासंभवेन उक्तस्थले बाधा
नवकाशाद्युपष्टंभः संगच्छते नहि साध्यप्रतियोगिकाभावमात्रज्ञानमेव साता साध्यतावच्छेदकावच्छिन्नसा

ऽधीविरोधितत्तत्साध्यव्याप्यभावज्ञानस्यापि साध्यसामग्रीप्रतिबंधकतापत्तेः किंतु साध्यतावच्छेदकाव
च्छिन्नाभावज्ञानमेव नहि ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नसाध्यकस्थले तथात्वं सामान्यधर्मस्य तत्प्रति
योगितानवच्छेदकत्वादिति मूले अवच्छेद्येत्यसिद्धसाधनमिति विशिष्टकोविशिष्येच्छादौ साध्यसामान्ये सिद्धस्या
बाधितत्वे च साधनप्रमाहृदृष्टेर्वा प्रमितिरिति यावत् तस्याघ्ननन्नवायोदोयवहति अवच्छेदके ध्वंसप्रागभावादिरू
पविशिष्टघटविशेषणेह्यसिद्धः पृथिवीत्वादिहेतोर्वा सिद्धि तथाचनन्यत्वलान्तमते बाधस्यासंकरइति भा
वः नचविशेष्यविशेषणपक्षकेः संकीर्णबाधानभवेपि विशिष्टपक्षकेसम्भावनाः मसहेतेत्यत आह विशिष्टे
चेति नान्यदितिविशेषणविशेष्याभ्यामितिशेषः गंधादौ गंधप्रागभावाद्युपलक्षितघटादिवृत्तित्वसत्वेपि न त
द्विशिष्टघटादिवृत्तित्वं नहितद्वृत्तितत्त्वेत्यापकसमयावच्छिन्नतद्वृत्तित्वरूपं तद्विशिष्टवृत्तित्वं निर्वंदतिति न
ऽप्यसतिप्रतियोगिनो ध्वंसप्रागभाववृत्तितयापकसमयावच्छिन्नतत्सामानाधिकरण्यमपि स्यादिति त
द्विरोधोभज्येत यद्विद्ध्वंसप्रागभावयोः प्रतियोगिनस्त्वपकाधिकरणेवृत्तौ पकसमयो नावच्छेदकत्वेकास
मयावच्छेदेनेकान्त्यावर्तमानत्वप्रतियोगिप्रसिद्धापसत्ताव्यच्छेदकध्वंसादिसमयावच्छिन्नतद्वृत्तित्वरूपं तद्विशि
ष्टवृत्तित्वं प्रतियोगिनोद्वयोः संकीर्णमनत्र दोष एव पृथिवीत्वादिहेतोस्तद्विशिष्टत्वमिविना सिद्धिविरहादिति
समाधत्ते तहीत्यादि अधिकरणेत्येनावच्छेदकत्वेवाधर्वातत्माह अन्यथेति अवच्छेदकभेदेन वृत्तिः
विति एकास्मिन्नप्यधिकरणे विभिन्नावच्छेदेन वृत्तिरित्यर्थः दीधितौ साध्यवत्तानवच्छेदकेत्यादि वह्निमन्ना
नवच्छेदकाशिरवच्छेदेन पर्वतादौ धूमादिनावह्न्यादिसाधने दीत्यर्थः तत्र पक्षतानवच्छेदकाशिखरावच्छि
न्ने धूमादिमत्वस्यतदवच्छेदेन वह्न्याद्यनुमितिजनकज्ञानविषयस्यासत्वाद्धेत्वसिद्धिरितिज्ञतो बाधस्यासंकी

६

गदा० पक्षतावच्छेदकसामानाधिकरण्यमात्रेण हेतुमज्ज्ञानस्यावच्छेदकावच्छेदेनानुमितिजनकत्वे भागासिद्धेर
दोषत्वाप्रसंगादिति शंकते यथेत्यादि घटत्वादेरिति पंचमी पृथिवीत्वाद्यवच्छेदेन रूपादिसिद्धिप्रसंगादिति पृथिवी
१०१ दिसामानाधिकरण्यमात्रेण पटादौ घटत्वाद्यभावरूपासिद्धिग्रहेऽपि तत्सामानाधिकरण्यमात्रेणानुमितावग्रहसंभवा
दिति भावः भागासिद्धेर्दोषत्वानुरोधेन पक्षतावच्छेदकपृथिवीत्वांशे पक्षे साध्यस्यानतिरिक्तवृत्तित्वरूपावच्छेदक
त्वावगाहिन्यामनुमितौ तत्र हेतौ तादृशावच्छेदकत्वावगाहिपरामर्शत्वेन हेतुत्वमास्तां पक्षतावच्छेदकदेश
कालयोः स्वरूपसंबंधरूपसाध्याद्यवच्छेदकत्वावगाहिन्यामनुमितौ च न तादृशावच्छेदकत्वावगाहिपराम-
र्शत्वेन हेतुता तदवच्छेदेन बाधबुद्ध्यादिरूपप्रतिबंधकाभावसहितसामानाधिकरण्यमात्रावगाहिविषयकानुमितिसा
मग्रीसत्त्वात् तादृशानुमितिस्वीकारे क्षतिविरहात् अवच्छेदकत्वपदार्थयोर्भेदेनैकस्य कार्याभावस्वीकारेणाप्य-
न्यस्य भाने अधिकापेक्षायां बाधकाभावादिति समाधत्ते अवच्छेदकत्वयोरिति शिखराद्यवच्छेदेन वह्न्याद्यनु
मितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुत्वमभ्युपेत्यापि तत्र बाधस्य दोषत्वं व्यवस्थापयति अवच्छिन्नवृत्तेरिति
शिखराद्यवच्छेदेन धूमाद्यसत्त्वेऽपि तदवच्छिन्नत्वभ्रमविषयधूमादित एतदवच्छेदेन वह्न्याद्यनुमित्युत्पत्तिर्वा
धकस्यैव विनाशकत्वादिति बाधो दोष इत्यर्थः बाधबुद्धेः प्रमात्वाभिधानं च तद्विषयरूपदोषप्रसिद्धिं सूचयितुं तथा ०.१
पि तत्र स्वरूपसद्दोषसिद्धिसंस्कारपक्षे त्यागाशक्यतत्संस्कारस्य किंचित्करतामाह संस्कारेऽपि वर्त्तन इति ज्ञानासंस्कारादि
ति असिद्ध्यज्ञानदशायां बाधज्ञानस्यैवानुमित्यनुत्पादनप्रयोजकत्वादित्यर्थः वस्तुतः संस्कारस्य फलमप्याह
स्वावयवावच्छेदकेति स्वावयवावच्छेदकं यत्नाश्रयीयशरीरादिकं शरीरव्यक्तिविशेषादिर्वा तदवच्छेदवच्छे
देनानुमित्यादिरूपपत्तेः समवायेन स्वावादिरूपसाध्यव्याप्यस्य तत्त्वादिहेतोर्वर्त्तमानत्वादित्यर्थः तथाचैतादृ-

ग्रहेतावसिद्धिविरहात् पक्षतावच्छेदकशरीरघटकीभूतविशेषणादिर्वा तदवच्छेदेन साध्याभावोऽसिद्ध्यसंकीर्णो
बाध इति भावः व्याप्यहेतोः सर्वावयवावच्छिन्नवृत्तिकत्वे मूलावच्छिन्नो वृक्षः कपिसंयोगी एतद्वृक्षत्वादित्यादावपि
मूलाद्यवच्छिन्नवृत्तिककपिसंयोगाद्यभावरूपबाधस्यासंकर इत्याह कथमिति न च सर्वत्रानुमितौ साध्ये पक्षतावच्छे
दकस्य सामानाधिकरण्यमेव भासते पक्षधर्मताबलात् व्याप्यस्य हेतोः पक्षतावच्छेदकसामानाधिकरण्यमेव भास
ते पक्षधर्मताबलात् व्याप्यस्य हेतोः पक्षतावच्छेदकसामानाधिकरण्यरूपपक्षधर्मतायाः व्यापकस्य साध्यस्य पक्षतावच्छे
दकसामानाधिकरण्यं विनाऽनुपपद्यमानत्वात् न तु पक्षतावच्छेदकावच्छिन्नत्वमपि साध्यस्य तदवच्छिन्नत्वं विनापि
हेतोः पक्षधर्मतोपपत्तेस्तद्बलविरहात् बाधाभावबलात् तदाने ऽन्यदपि अबाधितं साध्यांशो किं न भासते अथ व्याप्या
स्य पक्षतावच्छेदकव्यापकत्वरूपतदवच्छिन्नत्वं साध्यस्य तादृशतदवच्छिन्नत्वं अन्तरेण नोपपद्यत इति तदवगाहि
नः परामर्शात् साध्यस्य पक्षतावच्छेदकव्यापकत्वरूपतदवच्छिन्नत्वावगाहि अनुमितिर्यत्नैव श्रुतपक्षभागा
सिद्धेर्दोषतापत्तिरिति चेत् भवतु तादृशपरामर्शात् तादृशावच्छेदकावच्छेदेनानुमितिः न च तावता संकीर्णबाधसौल
भ्यं हेतोः पक्षतावच्छेदकधर्मव्यापकत्वे बाधासंभवात् एवं यत्र तदवच्छेदेन हेतुस्तत्र तदवच्छेदेन साध्यमिति व्याप्ते
गृहीतायां देशकालरूपपक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानात् तदवच्छेदेन साध्यानुमितिः स्यादेव तादृशव्या
प्तिमतो हेतोः पक्षतावच्छेदकदेशकालावच्छेदेन सत्त्वाया स्तदवच्छेदेन साध्यवत्त्वमन्तरेणानुपपत्तेस्तादृशपक्ष
धर्मताबलसंपन्नेरेतत्त्वादित्येतावतापि न बाधासंकरसौलभ्यं साध्यानवच्छेदकदेशकालावच्छिन्नवृत्तिके हेतौ
दर्शितावा अवच्छेदकातभावेन व्याप्तेरसिद्धिः तिरुपाध्यायानुयायिनामाहेयमनुभवावलंबनेन परिहरति अत्रचे
ति प्राह्यादिनेवेत्यन्तेन दृष्टान्ताभिधानमनुभवरहाणोय इदं त्वबोध्यं यादृशव्याप्तिज्ञानात् पक्षतावच्छेदकसाध्ययोः केव

गदा॰ 110

लमेकत्रद्वयमितिवैशिष्ट्यविषयिणीप्रमात्रमानिस्तत्यमानएवचेद्बाधविशेषाभावसहकृतान्यत्वावच्छेदकाला॰
दिविशिष्टात्रयोगिकसाध्यविशिष्टविषयाप्रमात्रमितिर्भवेत्तदाग्रगणादौद्रव्यत्वादितत्वादयपलक्षितसत्त्वादिवैशि
ष्ट्यविषयकात्रमित्यौपाधिकजात्यादिलिंगकप्रतियोगितावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिवैयधिक
रण्यघटितव्याप्तिप्रमानोऽस्तिबाधाचत्वात्तेनद्विशिष्टवैशिष्ट्यविषयप्रमात्रमितिरपितन्मूलप्रमयानुचितेति॰
व्याप्तौप्रतियोगिमत्त्वावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशनमनर्थकंस्यादितिदिक् ॥ गिरीशाङ्घ्रिहितत्वं
मस्तरवरावनेसीभवत्पदेवुजाजः कलाकालितत्तीव्रणाधीसंपदा मयादरविनिर्मिताकठिनदुर्गतत्कौटवीनपद्धवी॰
मुदेविनुतांसदाधीमताम् ॥ ॥ इतिश्रीगदाधरभट्टाचार्यचक्रवर्तिविरचितानुमानमणिदीधितिटिप्प॰
णीसमाप्ता ॥ शुभमस्तुसर्वजगताम् ॥ ॥ श्रीकृष्णेनलिखितं कश्मीरमध्ये ॥ ॥